०॥ गादाधर्यां अवयवप्रारंभः॥ श्रीरस्तु ॥०

श्रीगणेशाय नमः॥ अनुमानं निरूप्य न्यायतदवयवनिरूपणं प्रतिजानीते मूले तच्चेति तत्र निरुक्तमनुमानं परार्थे
विचारदशायां मध्यस्थस्य विवादविषयसाध्यनिश्चयरूपप्रयोजनसाधनं न्यायसाध्यमिति न्यायप्रयोज्यमित्यर्थः
वादिप्रयुक्तन्यायजन्यशाब्दबोधेन मध्यस्थस्य चरमकारणलिंगपरामर्शरूपानुमानजननादिति भावः ज्ञायमा
नलिंगस्यानुमानत्वे तु तद्विशेषणस्य परामर्शस्य न्यायाधीनत्वात्तद्विशिष्टस्य तथात्वमित्यवधेयं अथवाऽनुमा
नमनुमितिः परार्थे मध्यस्थस्य साध्यसंशयनिवृत्तिरूपप्रयोजनसाधनं परस्य प्रतिवादिनो यो निवृत्तिर्यस्मादि
ति तादृशं वा एतेन निरूपणप्रयोजनमुपदर्शितं न्यायप्रयोगद्वारा मध्यस्थानुमितेरेव न्यायज्ञानप्रयोजनत्वात्
कारणत्वं स्मरणप्रयोजकसंबंधकथनेन प्रसंगो वा संगतिरपि दर्शिता समस्तरूपेति पक्षसत्त्वादिरूपेत्यर्थः। उपन
येन पक्षसत्त्वस्योदाहरणेन व्याप्तिघटकसपक्षसत्त्वविपक्षासत्त्वयोर्निगमनेन चाबाधितत्वासत्प्रतिपक्षितत्वयोः
प्रतिपादनाल्लक्षणसमन्वयः। अन्यैवेति समस्तरूपोपपन्नं लिंगमित्यन्वेवेत्यर्थः। अतिव्याप्तेरिति इदमुपलक्षणं उ
दाहरणादित्रिकस्यापि न्यायत्वापत्तिर्द्रष्टव्या अनुमितीति अनुमितिचरमकारणं यो लिंगपरामर्शः व्याप्तिप्रकार

एपक्षेयल्लिंगज्ञानंतत्प्रयोजकंयच्छाब्दज्ञानंतज्जनकंवाक्यमित्यर्थः॥अत्रप्रयोजकांतंप्रतिज्ञादिसकलावयवजन्यम
हावाक्यार्थबोधस्यतावदर्थगोचरसमूहालंबनबोधस्यवापरिचायकमात्रेणनतुपरामर्शप्रयोजकत्वेनशाब्दज्ञा
नस्यलक्षणघटकता किंतुतावदर्थविषयकबोधत्वेनैव अतोधूमवान्पर्वतइत्यादिवाक्यमालजन्याया अपिबु
द्धेरुपनायकज्ञानादिविधयामानसपरामर्शप्रयोजकतयातत्रातिव्याप्तिरितिनिरस्तं तादृशयत्किंचिच्छाब्दबो
धंप्रतियादृशयादृशधर्मप्रकारकज्ञानत्वेनशाब्दज्ञानस्यकारणताप्रत्येकंतत्तद्धर्मावच्छिन्नवाक्यसमुदायत्व
स्यतादृशयत्किंचिच्छाब्दबोधनिरूपितशाब्दज्ञाननिष्ठायायाकारणतातत्तदवच्छेदककोटिप्रविष्टस्य यत्किंचिज्ज्ञा
नीयविषयताश्रयवर्णत्वव्यापकसमुदायत्वपर्यवसितस्यविवक्षितत्वान्नास्माकंन्यायैकदेशेऽतिव्याप्तिः ता
दृशधर्माश्चप्रतिज्ञादीनामानुपूर्वीविशेषाएवपर्वतोवह्निमानित्याद्याकारकबोधे पर्वतोवह्निमान्पर्वतोव
ह्नवानित्याकारकद्विविधानुपूर्वीप्रकारकज्ञानानामेवहेतुतयातथाविधैकैकानुपूर्व्यवच्छिन्नवाक्यपंचक
स्यन्यायत्वानुपपत्तिरितोयत्किंचिच्छाब्दबोधनिवेशः समानानुपूर्वीकनानावाक्यविषयतानामेवानुगतत्

(तादृशसमुदायनिष्ठन्यूनवृत्तितानिरूपकत्वमित्यनेन स्वाभाववद्वृत्तिस्वसमानाधिकरणाभेदप्रतियोगितावच्छेदकतादृशसमुदायत्वकंयद्यत्तत्तद्भेदकूटत्वे वविवक्षितः अतो नानाव्यायघटकप्रतिज्ञादिवृत्ति
(वाक्यांतरवृत्तिसमुदायत्वनिष्ठन्यूनवृत्तिता निरूपकत्वस्य न्यायत्वे सत्वेपि नासंभवः न वाऽऽकेकेसादिनावक्ष्यमाणेति प्रसंगासंगतिः॥)

यत्रैककारणतायामवच्छेदकत्वात्सर्वतो वन्हिमानित्याद्येकैकवाक्यव्यक्तिघटितवाक्यपंचकवृत्तिसमुदायत्वस्य न
तादृशकारणतावच्छेदकविषयताश्रयवर्णत्वव्यापकत्वमिति यत्किंचिदानीयविषयतानिवेशः न चैवं वाक्यां
तरसाधारणसमुदायत्वमादाय वाक्यांतरघटितसमुदायेतिव्याप्तिरिति वाच्यं। तादृशसमुदायत्वनिष्ठन्यूनवृत्तिता
निरूपकत्वेन निरुक्तसमुदायत्वस्य विवक्षणीयत्वात् न चैवमपि व्युत्क्रमप्रयुक्तप्रतिज्ञादिसमुदायेतिव्याप्तिस्तदवस्थै
वेति वाच्यं। व्युत्क्रमप्रयुक्तप्रतिज्ञादिवृत्तियद्यत्समुदायत्वंतावद्भेदकूटेन निरुक्तसमुदायत्वस्य विशेषणीयत्वात् न
चैवमप्येकैकन्यायघटकं यद्यत्प्रतिज्ञादिवाक्यं तादृशसमुदायेतिव्याप्तिरिति वाच्यं। स्वाश्रयीभूतयत्किंचित्प्रति
ज्ञाद्यव्यवहितोत्तरत्वविशेष्यत्वहेत्वादिवृत्तियद्यत्समुदायत्वं तत्तदन्यत्वस्य समुदायत्वे विशेषणीयत्वादिति दिक्न्याय
जन्यबोधस्य परामर्शप्रयोजकतां संगमयति प्रतिज्ञादीति एकवाक्यतयेति विशेषणे तृतीया तथा चैकवाक्यतापन्नैरित्यर्थः एकवाक्यत्वं च विशिष्टैकार्थप्रतिपादकत्वं तदुत्थाप्याकांक्षानिवर्तकत्वतन्निवर्तनीयाकांक्षोत्थापकत्वान्यत
रवत्वं वा तेन पंचवाक्यजन्यमहावाक्यार्थबोधासंभवेपि न क्षतिः। स्वार्थविशिष्टज्ञानं तत्तद्वाक्यार्थविषयकज्ञानं

वगाहि

तच्चसमूहालंबनमन्यथावेसन्यदेतत्तु। विशिष्टवैशिष्ट्यावगाहिमानांतरं विशिष्टवैशिष्ट्यबोधात्मकपरामर्शजनकंमनः
[illegible]त्मकसहकारिसंपन्नीक्रियते तेन तथाविधेनमनसापरामर्शउत्पाद्यतइत्युपाध्यायः अन्येतुतदेवज्ञानंपरामर्श
रूपमुपनयार्थविषयकत्वादित्याहुस्तिष्टउपनयवाक्यस्यव्याप्त्यंशेनतात्पर्यंतथासतिन्यायजन्यबोधेउदाहरणार्थतयोपनयार्थत
याचव्याप्तिभानेपौनरुक्त्यंस्यात् किंतुपक्षधर्मत्वमेवोपनयेनविवक्षितंतथाचोदाहरणार्थव्याप्तेरुपनयार्थपक्षधर्मतायाः
श्चविशृंखलमेवभानमितिनन्यायजन्यबोधस्यव्याप्तिविशिष्टवैशिष्ट्यावगाहिताव्याप्यःपक्षेवर्ततेनवेत्याकांक्षानुरोधे
नैववन्हिव्याप्यादिपदघटितमुपनयवाक्यंप्रयुज्यतइतिसएवसमाहितवान् अन्येतुचिंतयंते यदिव्याप्तिविशिष्टेपक्षध
र्मत्वमेवाकांक्षितंतदाव्याप्तिविशिष्टविषयकएवबोधस्तादृशाकांक्षांनिवर्तयिष्यतीतितथाविधबोधएवोपनयता
त्पर्यमावश्यकंनचैवमप्याकांक्षानिवृत्तयेवांतरवाक्यार्थबोधस्यव्याप्तिविशिष्टवैशिष्ट्यावगाहित्वोपगमेपिन्यायज
न्यमहावाक्यार्थबोधेउपनयाद्व्याप्तिभानंनोपेयते उदाहरणादेवतज्ज्ञानादवांतरवाक्यार्थधियःपरामर्शरूपत्वेपिनि
गमनजन्याबाधितत्वादिप्रतिपत्तेरनुमितावपेक्षिततयातावत्पर्यंतंतदसत्वेनपरामर्शांतरस्यापेक्षेतिवाच्यं। अवांत

रवाक्यार्थबोधे व्याप्तिभानानुरोधेन तदंशेप्युपनयस्य तात्पर्यकल्पनाया आवश्यकत्वे महावाक्यार्थबोधे तद्भानेपि बाधका
भावादिति न्यायजन्यज्ञानस्यवादिवाक्यजन्यत्वेनाप्रामाण्यशंकाकबलिततयानुमितिजननायोग्यतया परामर्शांतरस्वी
कार इति मिश्राः नव्यास्तु पक्षांशे व्याप्तिविशिष्टहेतुवैशिष्ट्यावगाहिज्ञानमेवानुमितिहेतुः न तु व्याप्त्याभिन्नहेतुमद्भे
दज्ञानं तादृशवैशिष्ट्यावगाहितायाश्च न्यायजन्यबुद्धेर्नामार्थयोर्भेदेनान्वयबोधस्यानुपपन्नत्वात् । अतो व्याप्यत्वावच्छि
न्नहेतुनिष्ठप्रकारताकबोधहेतुहेतुविशिष्यकव्याप्तिरूपविशेषणतावच्छेदकप्रकारकमानसज्ञानान्मानस एव ता
दृशपरामर्शोऽवश्यमंगीकर्तव्य इत्यभिप्रायेण तेन चेत्याद्यभिहितं विशिष्टवैशिष्ट्यावगाहिमानांतरं च विशिष्टवै
शिष्ट्यबोधजनकं विशेषणतावच्छेदकीभूतव्याप्तिप्रकारकधूमत्वाद्यवच्छिन्नविशेष्यकं ज्ञानं [illegible]प्यते जन्यते तेन
तादृशविशेषणतावच्छेदकप्रकारकज्ञानेन परामर्शो जन्यत इत्यर्थः न चैवं तेन परामर्शस्य जननादिति ग्रंथासंग
तिः तत्र परामर्शपदस्य व्याप्त्याभिन्नहेतुमद्भेदबोधपरत्वादित्याहुः श्रूध्य हेतुतावच्छेदकावच्छिन्ने पक्षधर्मत्वा
कांक्षया तत्र पक्षधर्मत्वबोधमात्रतात्पर्यकं व्याप्त्यर्थकपदाघटितमेवोपनयवाक्यं प्रयुज्यत इति प्राचीनमताऽ

भिप्रायकमिदं अत एव दीधितिकृता तन्मताभिप्रायेणैवोदाहरणोपनययोरेव तत्पर्यवस्यनीयत्वोदाहरणांशभावेणे
व परामर्शप्रयोजकत्वपर्यवसानमुक्तं न तूपनयमात्रस्येत्यपि वदंति। अत्र परामर्शप्रयोजकत्वेन शाब्दज्ञानस्य
लक्षणघटकत्वे स्वयमनुपपत्तेर्वक्ष्यमाणतया शाब्दज्ञानपदं प्रतिज्ञादिप्रतिपाद्यतत्तद्विशिष्टार्थज्ञानपंचकपरं
जनकवाक्यपदं च प्रत्येकं तत्तद्बोधजनकवाक्यपंचकपरम् अतः प्रतिज्ञादिवाक्यपंचकलाभः प्रयोजकांतं च बोधवि
शेषाणां परिचायकमात्रं यद्यप्येवं प्रतिज्ञादिपंचवाक्यैरेकज्ञानाजननेपि एतादृशलक्षणानिर्वाहविरहः तथापि
प्रतिज्ञाजन्यबोधानां परामर्शप्रयोजकतालाभायैव संभवाभिप्रायेण तावदर्थविषयकैकज्ञानं परामर्शप्रयो
जकत्वेनाभिहितमित्यभिप्रेत्य दीधितिकृत्पर्यवसितन्यायलक्षणमाह। उचितेति। उचितानुपूर्वीकानि प्रतिज्ञादिपं
चयत्र समुदाये तत्त्वं तादृशपंचपर्याप्तसमुदायत्वमिति यावत्। पंचपदं निगमनांतानां विशिष्यनिवेशलाभा
य न तु पंचत्वेनापि तेषां निवेशः प्रयोजनाभावात् व्युत्क्रमप्रयुक्तप्रतिज्ञादिपंचकेतिव्याप्तिवारणाय उचितानु
पूर्वीकेति उचितानुपूर्वी प्रतिज्ञोत्तरहेतूत्तरोदाहरणोत्तरोपनयोत्तरनिगमनत्वरूपा ननु किमिदमुचितानुपू

वीकेतिउचितानुपूर्वीप्रतिज्ञान्तरहेत्वन्तरोदाहरणान्तरोपनयान्तरनिगमनत्वरूपा ननु किमिदमुचितानुपूर्वीकत्वं
न तावत्तादृशानुपूर्व्याश्रयत्वं दर्शितानुपूर्व्या निगमन एव विश्रान्तेः नापि तादृशानुपूर्वीघटकत्वं घटकतायाः दुर्निर्व
चत्वात् तद्भिन्नस्याविषयकप्रतीतीयविषयतादृशानुपूर्वीकत्वं प्रतिज्ञाद्यविषयकप्रतीत्यारूढस्य निगमनत्वस्य विषयी
करणात् विशिष्टनिगमनत्वे तादृशप्रतीतीयविषयत्वानुपपत्तेः विशेष्यवृत्तेर्विशिष्टानुयोगिकाभावानभ्युपगमात्
नापि तादृशानुपूर्वीविषयिताव्यापकविषयिताकत्वं शब्दव्यक्तिभेदेन प्रतिज्ञादेर्भिन्नतया कस्याश्चिदपि प्रतिज्ञाव्य
क्तेर्विषयितायास्तादृशानुपूर्वीविषयितासामान्यव्यापकत्वासंभवात्। प्रतिज्ञादिवाक्यान्तरघटितन्यायविषयक
ज्ञाने पि तादृशानुपूर्वीविषयितासत्त्वात् यत्किंचिदानुपूर्वीविषयिताव्यापकत्वस्य व्युत्क्रमप्रयुक्तप्रतिज्ञादिवि
षयितासाधारणत्वात्तादृशप्रतिज्ञादिविषयकन्यायविषयकज्ञानीयतथाविधानुपूर्वीविशेषविषयितायाए
व तादृशविषयिताव्याप्यत्वात्। ~~विषयज्ञानभेदेन विषयिताव्याप्यत्वात्~~ तेन च ज्ञानभेदेन विषयिताभेदानभ्युपगमा
न्नैवमिति वाच्यं। तादृशप्रतिज्ञादिव्यक्तिसमानाधिकरणत्वादिना आनुपूर्वीविशेषावच्छिन्नन्यायविषयकज्ञा

नीयानुपूर्वीविशेषविषयितायास्तादृशप्रतिज्ञादिव्यक्तिविषयिताशून्यावृत्तित्वात्तस्यास्तव्याप्यत्वानपायात्। अथ निगम
नपूर्वोपनयपूर्वोदाहरणपूर्वहेतुपूर्वत्वरूपानुपूर्व्याश्रयत्वेन प्रतिज्ञायाः तादृशोदाहरणपूर्वत्वे सति प्रतिज्ञोत्तरत्वादिरूपा
नुपूर्व्याश्रयत्वेन हेत्वेवयवादीनां निवेशान्नानुपपत्तिः अथवा तादृशैकविधानुपूर्वीविशेषावच्छिन्नभेदप्रतियोगिता
वच्छेदकत्वमेव तादृशानुपूर्वीघटकत्वमिति नैवमप्येकैकन्यायघटकं यत्प्रतिज्ञाद्येकैकवाक्यं तत्समुदायेति प्रसंगो
दुर्वार एवेति चेन्नैवं स्वाश्रयीभूतप्रतिज्ञाद्यव्यवहितोत्तरत्वसंबंधेन हेत्वादिवृत्तिर्यद्यत्समुदायत्वं तत्तदन्यत्वस्य समु
दायत्वविशेषणत्वे तात्पर्यात् अनुक्रमप्रयुक्तप्रतिज्ञादिनिष्ठस्य नानान्यायांतर्गतप्रतिज्ञादिपंचनिष्ठस्यापि समुदा
यत्वस्य तत्तदन्यत्वविरहान्नातिप्रसंगः। एवं च घटमानयेत्यादिवाक्यवृत्तिसमुदायत्ववारणाय प्रतिज्ञादिवृत्तित्व
विशेषणमपि सार्थकमित्यवधेयं प्रतिज्ञादिवृत्तित्वं च प्रतिज्ञात्वादिपर्याप्त्यवच्छेदकधर्मपंचकव्यापकत्वमतः प्रति
ज्ञादिपंचकैकदेशसमुदायेनातिप्रसंगः प्रतिज्ञात्वादेर्व्यासज्यवृत्तित्वात्तदाश्रयैकदेशमात्रवृत्तेस्तत्पर्याप्त्यनवच्छे
दकत्वात् समुदायत्वं चानेकपर्याप्तिधर्मस्तस्य पर्याप्तिसंबंधेन न्यायपदप्रवृत्तिनिमित्तत्वान्नैकदेशे न्यायव्यवहा

रप्रसंग इति तु विभावनीयं ननु प्रतिज्ञादिलक्षणे न्यायांतर्गतत्वविशेषणस्य प्रवेशनीयतयान्योन्याश्रयप्रसंग इत्यत
आह। प्रतिज्ञात्वादिकं त्विति उदासीनेवारकेति न्यायानंतर्गतवाक्यवारणमात्रप्रयोजनके इत्यर्थः। एतेन न्यायानंत
र्गतप्रतिज्ञादिपंचकसमुदाये उचितानुपूर्वीकत्वविरहादेव न्यायत्वाप्रसक्तेर्न्यायघटकप्रतिज्ञादिशरीरे तादृशविशे
षणानुपादानेन क्षतिरिति सूचितं क्रमप्रयुक्तविभिन्नपक्षसाध्यहेतुकप्रतिज्ञादिपंचके तिव्याप्तिशंकां निराकरोति
साध्यादीति तत्साध्यपक्षहेतुकन्यायलक्षणे तत्साध्यपक्षकप्रतिज्ञा तत्साधनकहेतु तत्साध्यसाधनकोदाहरण त
त्साध्यपक्षसाधनकोपनय तत्साध्यसाधनकनिगमनानि निवेशनीयानीत्यर्थः। नन्वेवं न्यायपदार्थस्याननुगततया
न्यायपदस्य नानार्थकतापत्तिरित्यत्रेष्टापत्तिमाह। व्याप्त्यादेरिति व्याप्तिपदार्थस्येत्यर्थः। साध्याद्यननुगमात्। स्व
घटकसाध्यादीनां भिन्नभिन्नरूपेण निवेशनीयत्वात्। अननुगमः अनुगतप्रवृत्तिनिमित्तविरहः न्यायादेः न्या
यादिपदार्थस्य आदिपदादवयवादिपरिग्रहः इष्टत एवेति गत्यंतराभावादिति भावः। यथाश्रुतमूलस्वरससिद्धवा
क्यपंचकजन्यमहावाक्यार्थबोधमादाय लक्षणसमन्वयं निराचिकीर्षुः वाक्यपंचकस्यैकविशिष्टार्थबोधकत्वं खंड

४ अत्र केचित् असाधकतास्थलीयन्यायेव्याप्तिः तत्र व्याप्त्युभयवादिसिद्धस्थले नोदाहरणाभावेन पंचावयवाभावादिति तन्न साध्यसाधनभेदेन न्यायभेदाच्चतुरवयवस्यैव
न्यायत्वादिति। यदपि च सर्वत्रैव समयबंधस्थले पंचावयवप्रयोग इति मन्यते तदा स्वकर्तव्यनिर्वाहाय समयबंधं विनापि सर्वत्रैव पंचावयवप्रयोग इति मतं स्वीकरणीय
मिति ४

यतिप्रतिज्ञानिगमनयोरितिन संभूयैकार्थप्रतिपादकत्वमित्यग्रे तेनैकान्वयः प्रतिज्ञार्थे वन्हिमति पर्वते निगमनार्थ
स्य विशिष्टहेतुज्ञानज्ञाप्यसाध्यवत्तस्यान्वयबोधोपगमे साध्यवत्तांशमादाय पौनरुक्त्यप्रसंगात् दंडवान् रक्तदंडवा
निसादावित्र विधेयांशेऽधिकाऽवगाहिनस्तादृशबोधस्य संभवेपि शुद्धपक्षतावच्छेदकविशिष्टबाधितत्वादिविशिष्टसा
ध्यवत्तावगाहिन्याः प्रतीतेरेवापर्यायोगित्वेन साध्यविशिष्टपक्षे तादृशसाध्यवत्वान्वयबोधस्यानाकांक्षिततया वादि
तात्पर्याविषयत्वाच्च। यत्तु वन्हिविशिष्टपर्वतोद्देश्यकबोधे वन्हिमत्पदोत्तरपर्वतपदोपस्थितिरपेक्षिता नीलो घटः
स्कंदर इत्यादाविव घटो नीलः स्कंदर इत्यादौ नीलान्वित घटाद्यंशे विधेयाभानादुद्देश्यतावच्छेदकवाचकपदस्यो
द्देश्यवाचकपदपूर्ववर्तितायाअपेक्षणीयत्वादतोनैतादृशान्वयबोधसंभवः नेतु शुद्धपर्वतत्वावच्छिन्न एव
शुद्धवन्हिमत्व निगमनोत्थाप्य विशिष्टवन्हिमत्वयोर्युगपद्विधेयतयान्वयोपगमे नैकवाक्यत्वं निर्वहतीति वा
च्यं। गुणानांच परार्थत्वादसंबंधः समत्वात्स्यादिति। न्यायेन विधेय विधेयाभासमानयोः शुद्धवन्हिमत्वविशिष्ट
वन्हिमत्वयोरवच्छेद्यावच्छेदकभावापन्नविषयिताकतद्रूपसंबंधाभावेनैकवाक्यतानिर्वाहात्। अत एव विधेय

गदा०अ०

६

ह

व्याप्यभेदे सर्वत्र वाक्यभेदः केवलोपनयजन्यबोधपक्षे साध्यहेतुमत्त्वस्य विधेयत्वेप्युपनयनिगमनाधीनबोधे उद्देश्यपद
पूर्वनिर्दिष्टस्य व्याप्यवत्पदार्थस्योद्देश्यतावच्छेदकतयैव भानेन तद्विषयकत्वनिगमनार्थविषयकत्वयोरवच्छेद्यावच्छे
दकभावात्तदुभयैकवाक्यतेति तन्न तात्पर्यसत्त्वे योजनयापि तादृशबोधसंभवात्। उद्देश्यवाचकपदस्य विधेयवाच
कपदपूर्वत्वेन प्रतिसंधानस्यानपेक्षणीयतया योजनयैवोपनयेन पक्षीयपदार्थे साध्यव्याप्यवत्त्वबोधनान्न तात्पर्य
सत्त्वे वादिवाक्ययोजनाया दूषणानर्हत्वात्तात्पर्यविरुद्धस्यैव तत्त्वबीजत्वात्। इदमुपलक्षणं उपनयेनापि समं प्रति
ज्ञायां न विशिष्टार्थप्रतिपादकत्वं वह्निमति पर्वते उपनयार्थस्य साध्यव्याप्यहेतुमत्पक्षस्याप्राप्तता दृशहेतुमत्त्वा
घटिततया विधेयत्वसंभवेप्यनुमितिप्रयोगिनः पक्षतावच्छेदकविशिष्टहेतुमत्त्वस्याकांक्षयैवोपनयप्रतिपाद
नादनाकांक्षितस्य पर्वते पर्वताभेदबोधस्य तात्पर्याविषयत्वात्। उदाहरणावयवांतरयोरिति उदाहरणघटक
योर्यत्तत्पदघटितभागयोरपि नैकविशिष्टार्थबोधकत्वं तत्र द्विरुक्तयत्पदेन महानसत्वमहानसान्यत्वादिनो
द्देश्योपस्थापनात्तत्पदेनापि तत्तद्धर्मावच्छिन्नपरामर्शान्महानसं धूमवद्वह्निमच्च महानसान्यधूमवद्वह्निमच्चेति

वाक्यार्थचतुष्टयविषयकसमूहालंबनबोधस्यैवोदयात्। न चैवं वीप्स्या व्यापकत्वबोधनात् धूमवान् धूमव्यापकव
ह्निमानित्याकारक एव विशिष्टार्थबोध एव तत्रोत्पद्यत इति वाच्यं। योग्यतादेरनन्वितार्थकत्वप्रसंगात्। न च द्विरुक्त
यत्पदस्यैव व्यापकत्वमर्थः स च साध्यांशेऽन्वेतीति वाच्यं। नामार्थयोर्भेदान्वयबोधस्याव्युत्पन्नत्वात्। व्यापकत्वाव
च्छिन्नस्य तदर्थस्याभेदेनान्वय इत्यपि न संभवति। स्कंदरो दंडीत्यादौ स्कंदराद्यभेदान्वयवत् समानविभक्तिकत्वाभावे दंडादे
अ न मत्वर्थीयप्रत्ययोपस्थाप्यार्थे समस्तनामार्थाभेदान्वयस्यासंभवात् अभेदान्वयप्रतियोगितापेक्षतया साम
र्थ्येन साध्यवाचकपदोत्तरं तद्धितासंभवाच्च तत्पदस्य तावतापि सार्थक्यासंभवाच्च तस्माद्यत्पदार्थे हेतोस्तत्पदा
र्थे च तस्मिन् साध्यस्य विधेयतया भानमेव समूहालंबनरूपं तत्र जायते तदुत्तरं व्यापकताबोधो मानसः स एव वा
शाब्दबोधः साध्यवाचकपदस्य प्रकृतसाधनव्यापकताविशिष्टसाध्ये लाक्षणिकतया तत्पदार्थव्यापकताविशिष्ट
साध्यवत्तामवगाहते इत्यपि वीप्सासमभिव्याहारस्थले व्यापकत्वतात्पर्यस्यानादितया तादृशलक्षणाया निरू
ढलक्षणात्वेन वादिवाक्ये तत्स्वीकारे क्षतिविरहात् न च व्यापकताबोधस्यावश्यकत्वे नानाहेत्वधिकरणवन्त्या

गदा०अ०
७

दिमत्वबोधनस्याप्रयोजकतयाधूमादिकमुद्दिश्यतावच्छेदकीकृत्यसमूहालंबनात्मकएवव्यापकताविशिष्टशब्दबोधउ
पेयत्तांयत्तत्पदंतुतादृशलभ्यार्थतात्पर्यग्राहकमेवास्तीतिवाच्यंअर्थबोधकत्वसंभवेनतत्परित्यागायोगात्योयोनवह्निमा
न्सनधूमवानित्यादौव्यतिरेक्युदाहरणेवह्निमद्भेदादिहेतुकेतादृशान्वय्युदाहरणेवायत्तत्पदार्थाविवक्षायांप्रतियोगि
बोधकपदसमानविभक्तिकपदोपस्थाप्यस्यानुयोगिनोप्रवेशेननञोत्यन्ताभावबोधनासंभवाच्च एवंचैत्रोजानाति
कर्तृत्वादित्यादौन्यायांतर्गतेयोयःकरोतिसजानातीत्युदाहरणेयत्तत्पदार्थाविवक्षायांधर्मिणोऽलाभेनसाध्याद्याश्रय
विकलतयोदाहरणाभासताप्रसंगाच्चेतिएवंचोदाहरणसमुदायस्यावयवांतरेणसमंविशिष्टार्थप्रतिपादकत्वंस्फु
टतरांचनसंभवतीतिभावःएतेनहेतूदाहरणयोर्धूमवान्धूमात्धूमव्यापकवह्निमानित्येतादृशविशिष्टार्थबोधज
नकत्वसंभवादुदाहरणावयवांतरयोरनुपपन्नमित्यपिपरास्तं।प्रागेवस्फुटतरामेवनसंभूयैकार्थप्रतिपादकत्वमि
त्यनुषज्यतेप्रतिज्ञाहेत्वोरित्यत्रापिनकारंविहायताभ्यांपर्वतोधूमज्ञानज्ञाप्यवह्निमानित्येतादृशविशिष्टज्ञानज
नकादितिभावः।अथप्रतिज्ञाजन्यबोधानंतरंकुतइतिसाध्यज्ञापकाकांक्षायांतन्निवर्तकंहेतुवाक्यंप्रयुज्यतेतन्नि

वर्त्तकताच पक्षविशेषणतानापन्नसाध्यांशे हेतुज्ञानज्ञाप्यत्वबोधनेनापि निर्वहतीति पक्षांशे हेतुज्ञानज्ञाप्यत्वविशि
ष्टसाध्यवैशिष्ट्यावगाहिबोधस्यानुपयोगितया न तात्पर्यविषयत्वमिति चेन्न पर्वते वह्निबोधानंतरं पर्वते यद्वह्निज्ञाप
कं तत्रैवाकांक्षा जायते। तन्निवृत्तिश्च साध्ये धूमादिज्ञानजन्यपर्वतविशेष्यकज्ञानविषयत्वप्रतिपादनेनैव धूमाद्वह्नि
मन्महानसमित्यादिवाक्यस्य पर्वते वह्निमत्वं कुत इत्याकांक्षानिवर्तकत्वाभावात्। पंचमीतस्तादृशपर्वतविशेष्यक
ज्ञानविषयत्वभानं तद्विशेषणतापन्नसाध्यांशे एवउक्तवाक्यान्महानसादिविशेषणतयोपस्थिते तदप्रतीतेः एक
धर्मिविशेषणतापन्नत्वविशेष्यकहेतुविशेषज्ञानाधीनज्ञानविषयत्वबोधकतायाः पंचम्या अनुपपन्नत्वादिति
धूमाद्वह्निमान् पर्वत इत्यादि विशिष्टवैशिष्ट्यबोधस्यावश्यकत्वात्। कथंचिदिति निगमनेऽयंपदाननुषंगपक्षे
वह्निव्याप्यधूमवत्पर्वतादिरूपोपनयार्थनिगमनार्थधूमज्ञानज्ञाप्यवह्निमत्ताघटत्वयसंभवादितिभावः अनुषं
गपक्षे तु तादृशवह्न्यादिमत्पक्षरूपनिगमनार्थबोधे नैवाकांक्षानिवृत्ते रुपनयार्थविशिष्टपक्षे निगमनार्थीभूत
विशिष्टपक्षबोधस्यानुपयुक्तस्य न तात्पर्यवि +मात्र+ षयतेति कथंचिदित्युक्तं इदं तत्ववधेयं अननुषंगपक्षेप्युपनये

कदेशानां पदार्थे पक्षमात्रे निगमनार्थान्वयमात्रेणैव कृतकृत्यतया तत्तत्समुदायार्थविशिष्टपक्षे निगमनार्थविषय
कबोधे पितात्पर्यमप्रामाणिकमिति नन्वेवं प्रतिज्ञादीनां पंचानां कथमेकवाक्यताव्यवहार इत्यत आह। एकेति विशिष्टे
ति विशिष्टैकार्थप्रतीतीच्छाप्रयोज्यत्वमात्रेणेत्यर्थः। मात्रपदेन तादृशप्रतीतिजनकत्वव्यवच्छेदः तादृशैकप्रतिप
त्तिर्निगमनरूपचरमवाक्यार्थबुद्धिरुदीच्योर्वा मानसः परामर्शः तत्परतान्वतामजनयतोप्युत्तरोत्तरवाक्यप्र
योजिकामाकांक्षामुत्थापयतः प्रतिज्ञादेर्हि धूम इत्यादिवचसामानुमानिकव्याप्त्यादिधीपरतावन्निर्वहत्येव तत्प्रयोज
कतयैव ननु तावद्भिरवयवैः संभूयैकमहावाक्यार्थबोधाजननेपि परामर्शप्रयोजकीभूतस्वीयतत्तद्विशिष्टार्थधी
जनकतायाः सर्वावयवेष्वेव सत्वेन निरुक्तलक्षणसमन्वयो नानुपपन्न इत्यत आह। परामर्शप्रयोजकत्वं चेति प
रामर्शप्रयोजकज्ञानजनकत्वं चेत्यर्थः। तद्विषयेति परामर्शविषयेत्यर्थः। तत्तत्पदार्थसार्थोपस्थापकतयेति अ
भेदे तृतीया तथा च तदुपस्थापकत्वरूपमित्यर्थः। विवक्षितमिति शेषः तथा च यादृशयादृशवाक्यैः परामर्शवि
षयसकलपदार्थोपस्थाप्यं तेतावत्समुदायत्वं यदि विवक्षितमिति पर्यवसितोर्थः। उदाहरणोपनययोरेवेति।

उपनयस्य व्याप्यबोधकत्वमताभिप्रायेणोदाहरणांतर्भावः। ननु न्यायत्वं पर्यवस्यतीति ताभ्यामेव परामर्शविषयसकृ
लपदार्थोपस्थापनादिति भावः। अथ यथाकथंचित्परामर्शानुकूलत्वं यादृशयादृशवाक्यानां तादृशवाक्यसमुदायत्वं
विवक्षितमतो नोदाहरणोपनयमात्रेतिव्याप्तिरित्याशंकते अथेति। तदानुकूल्यमात्रेणेति पूर्ववदभेदे तृतीया पराम
र्शप्रयोजकत्वमित्यनुषज्यते। इत्यादेः इत्यादिसमुदायस्य। तथात्वं न्यायत्वं स्यादिति शेषः। कोवह्निमानित्यादिवाक्याना
मपि जिज्ञासाज्ञानद्वारा अवयवप्रयोजकत्वेन यथाकथंचित्परामर्शानुकूलत्वसंभवादिति भावः। इत्यादीत्यादिपदा
त् व्युत्क्रमप्रयुक्तप्रतिज्ञादावतिव्याप्त्यादेः परिग्रहः। मूलोक्तावयवलक्षणे शाब्दज्ञानस्यानुमितिचरमकारणलिंगप
रामर्शप्रयोजकशाब्दज्ञानजनकत्वाभिधानं पंचवाक्यानामेकमहावाक्यार्थधीजनकत्वाभिमानेन प्रतिज्ञादिप्रति
पाद्यतत्तद्विशिष्टार्थगोचरशाब्दधीविशेषाणां परिचयायैव तेषां निवेशस्तु विशिष्य तत्तदर्थविषयकशाब्दबुद्धित्वे
न ननु तादृशशाब्दबोधजनकत्वेन तथा सत्येकैकावयवजन्यशाब्दबुद्धेरपि परामर्शप्रयोजकतया तज्जनकावां
तरवाक्यार्थज्ञानजनकेऽवयवावयवेतिप्रसंगस्य दुर्वारत्वात्। न च साध्यविशिष्टपक्षादिविषयकशाब्दबुद्धित्वेन

बोधपंचकनिवेशेनानुगमः।जनकांतस्यतत्तद्बोधजनकान्यतमत्वादिरूपानुगतधर्मावच्छिन्नपरत्वात्।नन्वेवंसतिन्या
यांतर्गतिपर्वतोवह्निमानित्यादिवाक्येतिव्याप्तिः।वाक्यपदस्यन्यायांतर्गतार्थकत्वाद्विसमभिप्रेत्यपर्यवसितंतल्लक्षण
र्थमाह।न्यायेति।अथकिमिदंन्यायांतर्गतत्वं।नतावत्स्वाविषयकप्रतीतिविषयन्यायकत्वंप्रतिज्ञाद्यविषयकप्रतीत्या
हेत्वादिरूपन्यायैकदेशस्यविषयीकरणात्तद्घटितसमुदायात्मकन्यायेप्रतिज्ञाद्यविषयकप्रतीतिविषयत्वस्य
दुर्घटत्वात्।एकदेशवृत्तेर्व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकाभावानंगीकारात्।नापिन्यायविषयिताव्याप
कविषयिताकत्वंउच्चारणभेदेनैकानुपूर्व्यवच्छिन्नवाक्यानामपिभेदात्कस्याश्चिदपिप्रतिज्ञादिव्यक्तेर्विषयितायाः
एकविधमपिन्यायमवगाहमानेषुदृष्टत्वसंभवात्।मैवं।स्वाविषयकप्रतीतिविषयन्यायकत्वमेवतत्।न्यायत्वसामा
नाधिकरण्यमात्रेणतादृशप्रतीतिविषयत्वंविवक्षणीयं।एकैकप्रतिज्ञादिव्यक्त्यविषयकप्रतीत्याव्यक्त्यंतरघटित
न्यायस्यतन्न्यायैकदेशहेत्वादेश्चावगाहनेपिन्यायत्वाधिकरणेतत्प्रतिज्ञाव्यक्तौतत्प्रतिज्ञादिव्यक्त्यविषयकप्रतीति
विषयत्वसत्वेनतासांतथात्वमव्याहतमेव।अथवान्यायत्वाश्रयत्वमेवतथापर्याप्त्याविवक्षया।एकदेशस्यापितथात्वे

पपत्तेः॥ व[illegible]न्यायत्वघटकस्यसमुदायत्वांशस्यात्र निष्प्रयोजनकत्वेनानिवेशादुचितानुपूर्वीकत्वमात्रंविवक्षितंत
देवचन्यायांतर्गतत्वं एकदेशासाधारणमुचितानुपूर्वीकत्वंच प्रतिज्ञोत्तरहेत्वादिघटितवाक्यपंचकानुपूर्वीविशेषा
वच्छिन्नभेदप्रतियोगितावच्छेदकत्वं विशिष्टधर्मावच्छिन्नप्रतियोगितावच्छेदकतायास्तद्घटकसमुदायपर्याप्तत्वयाए
कदेशस्यापि तदाश्रयत्वात्प्रतिज्ञादेस्तथात्वमक्षतं उपनये[illegible]त्तरत्वविशिष्टनिगमनत्वशरीरेच वैशिष्ट्यघटकत
यानिगमनस्याप्यंतर्भावात्तत्साधारण्यमक्षतमेवोक्तधर्मस्य विशिष्टस्यावच्छेदकतास्थलेएकमवच्छेदकंअपरंच
तद्विशेषणं तन्निष्ठस्यावच्छेदकत्वस्यावच्छेदकं न तु समुदायेवच्छेदकत्वं पर्याप्तमित्युपगमेच तादृशानुपूर्वीविशेष
प्रकारकनिश्चयत्वसमनियतकारणतावच्छेदकविषयिताकत्वं विवक्षणीयं तादृशीच विशिष्टवैशिष्ट्यबुद्धित्वावच्छि
न्नकार्यतानिरूपितकारणतातदवच्छेदकत्वं च हेत्वादिनिष्ठानंतर्यप्रकारतापन्नप्रतिज्ञादिविषयितानामप्यव्याहतं
विनिगमनाविरहादितरविषयतानिरूपितत्वेन निश्चयत्वविशिष्टत्वेनच कारणीभूतज्ञानविषयसकलनिरूपित
विषयितानां कारणतावच्छेदकत्वात्प्रतिज्ञोत्तरहेतुत्वादिविशिष्टवैशिष्ट्यबुद्धित्वावच्छिन्नकार्यतानिरूपितांप्रति

न्मेत्तरो हेतुरित्यादिज्ञानसाधारणकारणतां तादृशानुपूर्व्यवच्छिन्नभिन्नवाक्यत्वाद्यवच्छिन्नवैशिष्ट्यावगाहिबुद्धित्वावच्छि
न्नकार्यतानिरूपितां तादृशवाक्यार्थादिप्रकारकज्ञानकारणतान्वादायोदासीनातिप्रसंगवारणाय कारणतायां तादृ
श धर्मव्याप्यत्वव्यापकत्वयोर्निवेश[illegible] तादृशानुपूर्वीविशेषावच्छिन्नवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नकार्यतानि
रूपितकारणतायां अपि न तादृशानुपूर्वीविशेषप्रकारकनिश्चयत्वसमनैयत्यसंभवः प्रतिज्ञात्वादिना पदार्थांतराव
वगाहितादृशानुपूर्वीप्रकारकज्ञानसमानाकारकज्ञानसाधारणत्वात् तादृशज्ञानस्य वास्तवप्रतिज्ञाद्यविष
यकत्वेन तद्घटितानुपूर्व्यप्रकारकत्वादिति वाच्यं प्रतिज्ञात्वाद्यवच्छिन्नप्रकारतानिरूपितहेतुत्वाद्यवच्छिन्नप्रकारता
तिक्रमेण निगमनत्वावच्छिन्नविषयतापर्यंतं निवेश्य तत्कालिनिश्चयत्वसमनैयत्यस्यैव विवक्षितत्वात् तादृशनि
श्चयत्वस्योक्तक्रमसाधारण्येन क्षतिविरहात्। न चैवमुदासीनप्रतिज्ञाद्यानंतर्यं हेत्वाद्यंशेऽवगाहते यो भ्रमस्तन्नि
ष्ठतादृशप्रतिज्ञादिविषयितायां अपि निरुक्तकारणतावच्छेदकतया अतिप्रसंगो दुर्वार इति वाच्यं भ्रमावृत्तिविषयिता
या एव निवेशनीयत्वादिति कृतं विस्तरेण अवयवैकदेशस्यावयवद्वयात्मकसमुदायस्य च वारणाय प्रतिज्ञाद्यन्यत

मत्वमिति अथ धूमादालोकवान्पर्वतो वन्हिमान् धूमादिति न्यायांतर्गतप्रतिज्ञैकदेशे धूमादित्यादिभागेऽतिव्याप्तिः तस्यापि
हेतुलक्षणाक्रांततया प्रतिज्ञाद्यन्यतमत्वाक्रांतत्वात् । न च तद्घटकपंचम्याः प्रकृतसाध्यान्वितस्वार्थबोधकत्वाभावोऽत्र वक्ष्य
माणहेतुलक्षणाक्रांतत्वं तस्येति वाच्यं । एवमपि धूमाद्वन्हिमतः स धर्मो पर्वतो वन्हिमानित्यादिप्रतिज्ञाघटकतादृशभा
गेतिप्रसंगस्य दुर्वारत्वादिति चेन्न । प्रकृतपक्षतावच्छेदकावच्छिन्नविशेषणतापन्नप्रकृतसाध्यतावच्छेदकावच्छिन्नान्वि
तस्वार्थबोधजनकत्वे सति प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वविषयिताबहिर्भूतविषयिताशून्यबोधज
नकवाक्यत्वरूपहेतुत्वस्यैव निवेशनीयतया नातिप्रसंगात् निगमनघटकस्य तस्मादिति भागस्य वारणाय विशेष्य
दलं तज्जन्यबोधे तादृशविशिष्टविषयिताबहिर्भूतव्याप्त्यादिविषयितासत्वेन तद्वारणात् । ननु प्रतिज्ञाद्यन्यतम
त्वं प्रतिज्ञादिभिन्नभिन्नत्वरूपं प्रतिज्ञाद्येकदेशसाधारणमपि भेदस्याव्यासज्यवृत्तितया समुदायवृत्तित्वे एकदेश
वृत्तिताया अपि दुर्वारत्वात् । अथ प्रतिज्ञादिभिन्नभेदानुयोगितावच्छेदकरूपवत्वं तत्त्वं तादृशं च रूपं प्रतिज्ञात्वादि
कमेव न तु तदेकदेशपर्याप्तपर्वतपदत्वादिकं तदवच्छिन्ने व्यासज्यवृत्तिप्रतिज्ञात्वाद्यवच्छिन्नभेदसत्वादिति चेन्न ।

प्रतिज्ञाद्येकदेशे प्रतिज्ञात्वाद्यवच्छिन्नभेदसत्वेतादृशभेदावच्छिन्नभेदस्य प्रतिज्ञात्वाद्यवच्छिन्नेपि सत्वासंभवात्। प्रतिज्ञा
त्वपर्याप्त्यधिकरणसमुदायस्यैकदेशानतिरिक्तत्वात् न हि व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकैकदेशभेदः प्रा
माणिकः घटपटौ न घट इत्यादिप्रतीतेरसिद्धेः प्रतिज्ञादिभेदपंचकानुयोगितावच्छेदकं यद्यद्रूपं तदवच्छिन्नानुयो
गिताकभेदप्रतियोगितावच्छेदकधर्मवत्वविवक्षणे च प्रतिज्ञाहेत्वादिसमुदायेतिव्याप्तिः तादृशसमुदायत्वाद्य
वच्छिन्ने प्रतिज्ञात्वाद्यवच्छिन्नभेदासत्वात्तादृशसमुदायत्वस्य निरुक्तरूपान्तर्गतत्वेन तादृशसकलधर्मावच्छि
न्नानुयोगिताकभेदप्रतियोगितावच्छेदकत्वात्। प्रतिज्ञात्वाद्यवच्छिन्नानुयोगिताकभेदप्रतियोगितावच्छेदकं य
द्यत्तदवच्छिन्नप्रतियोगिताकभेदानुयोगितावच्छेदकत्वमपि तादृशधर्मविशेषणे चातिगौरवमतो लघुलक्ष
णंतरमाह। प्रतिज्ञाद्यघटकत्व इति अत्रापि न्यायांतर्गतत्वे सतीत्यनुषज्यते। अतो न्यायबहिर्भूतवाक्यव्युदासः प्र
तिज्ञाद्येकदेशवारणाय प्रतिज्ञाद्यघटकत्वनिवेशनं तदर्थश्च प्रतिज्ञादिघटकतानवच्छेदकधर्मवत्वं तेन प्रति
ज्ञादिघटकतदेकदेशभेदस्य प्रतिज्ञात्वादिरूपव्यासज्यवृत्तिधर्मावच्छिन्नेनाभ्युपगमेपि न क्षतिः प्रतिज्ञादिघ

टकतावच्छेदकत्वं तु प्रतिज्ञात्वादिन्यूनवृत्तित्वं तच्च प्रतिज्ञात्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकत्वे सति प्रतिज्ञात्वादि
समानाधिकरणत्वं तथात्वं च तदेकदेशवृत्तिपर्वतपदत्वादेस्तदवच्छिन्ने प्रतिज्ञात्वाद्यवच्छिन्नभेदसत्वान्न तु प्रतिज्ञा
त्वादेः हेतुत्वादेः प्रतिज्ञात्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकत्वान्न तत्संग्रहाय विशेष्यदलं न च मिलितभेदपंचकानु
योगितावच्छेदकभिन्नत्वनिवेशे हेतुत्वादेर्हेतुत्वाद्यवच्छिन्नभेदानुयोगितावच्छेदकत्वविरहात्तादृशानुयोगितावच्छे
दकभिन्नत्वमव्याहतमेवेति विशेष्यदलमनर्थकमेवेति वाच्यं धूमादालोकवान्पर्वतो वन्हिमानित्यादिप्रतिज्ञाघ
टकधूमादिसाधारणस्य हेतुत्वस्य निवेशे तत्रातिप्रसंगभयेन मिलितभेदपंचकानुयोगितावच्छेदक
त्वस्यैकत्र निवेशासंभवात्त[illegible]तव्यावृत्तपूर्वोपदर्शितहेतुत्वनिवेशनेनैव तादृशभागसाधारणसंभवान्मि
लितभेदपंचकानुयोगितावच्छेदकत्वस्यैव निवेशनीयतया नोपादेयमेव विशेष्यदलं मिलित(भेद)पंचकानुयोगितावच्छे
दकत्वस्य प्रतिज्ञादिघटकतावच्छेदकत्वानात्मकत्वे विशेष्यदले उभयाघटितत्वनिवेशनेनैवोपपयात्तद्घटकभा
गद्वयाघटितत्वपर्यंतनिवेशवैयर्थ्यात्प्रतिज्ञादिघटकभागद्वयघटितवृत्तिसमुदायत्वस्य प्रतिज्ञात्वाद्यवच्छिन्न

गदा०अ०
१२
नु

भेदानुयोगितावच्छेदकत्वेनुप्रतिज्ञादिघटकतानवच्छेदकत्वदलेनैववारणसंभवात्मिलितभेदपंचकानुयोगिता
वच्छेदकत्वस्यप्रतिज्ञादिघटकतावच्छेदकत्वेप्रतिज्ञात्वपर्याप्त्यधिकरणहेत्वेकदेशहेतुत्वपर्याप्त्यधिकरणप्रतिज्ञैक
देशादिवृत्तिसमुदायत्वस्यप्रतिज्ञात्वहेतुत्वाद्यवच्छिन्नभेदानुयोगितानवच्छेदकतयातत्समुदायत्वमादायातिप्र
संगस्यवारणायभागद्वयनिवेशपर्यंतसार्थक्यात्[illegible]एकप्रतिज्ञात्वव्यक्तेरपरप्रतिज्ञात्वाद्यवच्छिन्नभेदानुयो
गितावच्छेदकतयाप्रतिज्ञात्वादिघटकतावच्छेदकत्वंदुर्वारमेवेतिवाच्यं।स्वसमानाधिकरणप्रतिज्ञात्वाद्यवच्छिन्न
भेदानां। [illegible] अनुगतरूपविशिष्टप्रतिज्ञात्वाद्यवच्छिन्नभेदानांचा
ऽनुयोगितावच्छेदकत्वस्यैवविवक्षणात्।घटकतानवच्छेदकधर्मश्चव्यासज्यवृत्तित्वविशेषणीयःतेनप्रतिज्ञाघ
टकवर्णान्यतमत्वादिकमादायनतदेकदेशेतिव्याप्तिः[illegible]नुप्रतिज्ञादिघटकतावच्छेदकत्वंस्वाश्रयाविषयक
प्रतीत्यविषयप्रतिज्ञादिकत्वेसतिप्रतिज्ञाद्यविषयकप्रतीतिविषयितावच्छेदकत्वंसंयंतेमनिवेश्यप्रतिज्ञादिवि
षयकताभावकूटवत्प्रतीतिविषयतावच्छेदकत्वनिवेशेधूमाद्वन्हिमतःसधर्मापर्वतोवन्हिमान्धूमादित्यादि

न

२ प्रतिज्ञाऽविषयकप्रतीतिविषयतावच्छेदकहेतुत्वविषयकप्रतीतिविषयतावच्छेदकताघटकभिन्नभेदकूटवद्धर्मवत्त्वमेव २

न्यायांतर्गतप्रतिज्ञैकदेशधूमादिसाद्विभागेऽतिव्याप्तिस्तत्र प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वप्रतिपाद
करूपहेतुत्वसत्त्वेन तत्प्रतीतेर्हेतुत्वविषयकत्वघटिताभावकूटवत्त्वाभावादतः प्रतिज्ञाद्यघटकत्वमिश्रनेन विवक्षणीयं
तथाच्चासंभववारणाय सत्यंतस्य वच्छेदकविशेषणं प्रतिज्ञाद्येकदेशविषयकप्रतीतिविषयत्वस्य प्रतिज्ञात्वाद्या
श्रयतदेकदेशांतरे सत्त्वेन तदाश्रयसमुदायस्य तादृशप्रतीत्यविषयत्वासंभवेपि प्रतिज्ञात्वाद्याश्रयतत्तदेकदेश
स्य तत्तदेकदेशाविषयकप्रतीतिविषयान्यतयैव तत्तदेकदेशवृत्तिधर्मे सत्यंतस्य निर्वाहः संभवति प्रतिज्ञाप
दस्य पर्याप्त्यतिरिक्तस्वरूपसंबंधेन प्रतिज्ञात्वाश्रयपरत्वात्। सत्यंतस्थस्वपदेन प्रतिज्ञात्वादेरप्युपादातुंशक्य
तयासंभवइतिविशेष्यदलं तत्र प्रतिज्ञैकदेशमात्रवृत्तिपर्वतपदत्वादेरेव तदाश्रयमात्रविषयकप्रतीतेस्तत्तत्समु
दायस्वरूपप्रतिज्ञाद्यविषयकत्वस्याव्याहतत्वात्। ननु प्रतिज्ञात्वादेः एकदेशमात्रविषयिकाया अपि प्रतीतेः प्रति
ज्ञात्वाद्याश्रयाविषयकत्वासंभवेन तदाश्रयसमुदायाविषयकत्वविवक्षणे एकैकप्रतिज्ञादिविषयिकाया अ
पि प्रतीतेः प्रतिज्ञात्वाद्याश्रयापरव्यक्त्यविषयकत्वेन तदाश्रयसमुदायाविषयकत्वविवक्षणे एकैकप्रतिज्ञा

एकदेशमात्रविषयकप्रतीतिविषयतायामतिप्रसक्तस्य तस्यावच्छेदकतासंभवात्। नच ३

दिविषयिकाया अपि प्रतीतेः प्रतिज्ञात्वाद्याश्रयापरव्यक्त्यविषयकत्वेन तदाश्रयसमुदायाविषयकतया एकैकप्रति
ज्ञादिव्यक्तिपर्याप्तप्रतिज्ञात्वादिकं तादृशप्रतीतिविषयतावच्छेदकमेव तदनतिप्रसक्तत्वादिति वाच्यं। स्वाश्रयावि
षयकप्रतीत्यविषयतायादृशप्रतिज्ञात्वाद्याश्रयेतादृशप्रतिज्ञात्वाद्याश्रयवर्णसमुदायाविषयकप्रतीतिविषयता
वच्छेदकत्वविवक्षया प्रतिज्ञादिविषयकसकलप्रत्ययानामेव तादृशसमुदायविषयकत्वेनादोषात्। अवच्छेदकत्वं चेह
नतिरिक्तवृत्तित्वमेव न तु स्वरूपसंबंधविशेषः तेन प्रतिज्ञात्वादिना तदेकदेशमात्रविषयकज्ञानविषयतायां प्रति
ज्ञात्वादेस्तथाविधावच्छेदकत्वसत्वेपि न क्षतिः तथाविधयत्किंचिदेकज्ञानविषयतावच्छिन्नानतिरिक्तवृत्तित्वमि
ह निवेशनीयं तेन प्रतिज्ञाघटकेषु सकलवर्णेष्वेव प्रतिज्ञाद्यविषयकप्रतीतिविषयत्वसत्वेन तादृशविषयता
सामान्यशून्याप्रसिद्धावपि स्वव्यापकतादृशविषयतावच्छिन्नकत्वस्य प्रतिज्ञात्वादिसाधारणत्वेपि च न क्ष
तिरिति वदंति [illegible]। एतदपेक्षया प्रतिज्ञाद्यन्यतमत्वस्यैव लघुत्वात्तत्रानिर्भरस्य निर्बीजतापातात्। ए
तेन प्रतिज्ञादिघटकतावच्छेदकत्वं स्वसमानाधिकरणस्वानधिकरणवृत्तिप्रतिज्ञात्वादिकत्वमित्यपि हेयं स्वव

स्वसमानाधिकरणाभावप्रतियोगितस्वसामानाधिकरण्योभयसंबंधेनप्रतिज्ञात्वविशिष्टान्यत्वरूपावच्छेदनिवेशेनगौरवाभावेपितुभयेसादिनाघटकभागद्वयनिवेशवैयर्थ्यमियामस्तियागः

ननुगमनेनतादृशांस्वयचहिविशिष्यतावतामनंतभेदानांनिवेशनीयतयामहागौरवात्प्रतिज्ञाहेत्वादिसमुदायवारणाय उभयसादिउभयघटकभागद्वयावृत्तिधर्मवत्वार्थकंतथाचप्रतिज्ञादिघटकतानवच्छेदकत्वेसतिउभयघटकभागद्वयावृत्तिर्योधर्मस्तद्वत्वंदलद्वयार्थःप्रतिज्ञाद्येकैकावयवघटकभागद्वयस्यापियत्किंचिदुभयघटकत्वादसंभवइत्यतःप्रतिज्ञाहेत्वाद्युभयचतुष्टयस्यविशिष्योभयपदार्थतामाह।उभयंचेति।विशिष्यवक्तव्यमित्यग्रिमेणान्वयः।इति।इतिरीत्याप्रतिज्ञाहेत्वाद्योरपिप्रतिज्ञाहेतूभयसादिनानघटकत्वांशेविशेषणतातादृशोभयघटकभागाप्रसिद्धेःकिंतुप्रत्येकंप्रतिज्ञात्वेहेतुत्वादिनातथाचप्रतिज्ञाघटकोयोभागःयश्चहेतुघटकस्तदुभयाघटितत्वमितिक्रमेणाघटितत्वचतुष्टयंनिवेशनीयंप्रतिज्ञाहेत्वाद्येकदेशघटितसमुदायवारणायघटकभागनिवेशनंप्रतिज्ञादिघटकत्वंचैकदेशसाधारणंप्रतिज्ञात्वाद्याश्रयत्वंतथाचप्रतिज्ञात्वाश्रयहेतुत्वाश्रयोभयावृत्तित्वादिरूपविशेषणचतुष्टयंधर्मविशेषणंपर्यवसितंनन्वेवंधूमाद्वह्निमतःसधर्मापर्वतोवह्निमान्धूमादित्यादिन्यायघटकप्रतिज्ञायामव्याप्तिःतस्याःहेतुलक्षणाक्रांतभागघटितत्वात्तद्व्यावृत्तस्यपूर्वोपदर्शितहेतुत्वस्यनिवेशेपिनिगमनेऽयंपदानुषंगपक्षेतत्रोप

नान्यतृगौरवात्प्रतिज्ञात्वाद्याश्रयत्वस्यसमुदितप्रतिज्ञादिसाधारण्येपिनक्षतिःप्रतिज्ञाहेत्वादेःप्रत्येकंप्रतिज्ञाहेत्वाद्योरेकदेशाभ्यामिवताभ्यामप्यघटितत्वेनाव्याप्त्यनवकाशात् २

नयेचाव्याप्तिर्दुर्वारैवतस्योपनयघटकेनायंपदेनोपनयस्यचतद्घटकेनतेनघटितत्वादितिवाच्यं।अनुषंगपक्षेउपनय
घटकभागनिगमनघटकभागद्वयाघटितत्वशरीरेउपनयाघटकत्वेननिगमनघटकस्यनिगमनाघटकत्वेनचोपन
यघटकस्यभागस्यविशेष्यवाचकपदातिरिक्तत्वेनवाभागद्वयस्यविशेषणीयत्वात्।अयंतस्मादित्यादिभागस्यचसत्वे
तेनैववारणात्।स्वानाश्रयांतरितभागद्वयवृत्तित्वेनचधर्मोविशेषणीयःतेनहेत्वाद्यंशपरित्यागेनप्रतिज्ञोदा
हरणादिसमुदायेनातिप्रसंगःवस्तुतस्तुप्रतिज्ञाहेतूइत्यादौहेत्वादिपदंप्रतिज्ञाव्यतिरिक्तपरंतथाचोदाहरणा
दे:प्रतिज्ञाव्यतिरिक्तत्वान्नदोषःप्रतिज्ञाव्यतिरिक्तघटकत्वंचप्रतिज्ञायैकदेशयावृत्तप्रतिज्ञात्वाद्यनाश्रयत्वमेवप
र्यवसितंबोध्यमितिदिक्।मूलस्थंशाब्दज्ञानकारणशाब्दज्ञानांतमन्यतममतेनानुगतरूपेणावयवप्रतिपद्य
तत्तद्विशिष्टार्थविषयकशाब्दबोधपरमतोनाननुगमःतादृशबोधजनकानांवाक्यानांमन्यतममतेनानुगमे
व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकान्योन्याभावानभ्युपगमेपूर्वोक्तानुपपत्तिप्रसंगात्।शाब्दबोधाना
मेवान्यतममतेनोपात्तंतुयत्क्तत्वादित्यभिप्रायेणमूलोक्तावयवलक्षणमन्यथाव्याचक्षाणानांकेषांचिन्मतमाह

प्रतिज्ञादिप्रतिपाद्येति विशिष्यनिवेश्यातां विशिष्टार्थविशेषाणां साध्यविशिष्टपक्षादीनां परिचायकमात्रमेतत्तन
तु प्रतिज्ञादिप्रतिपाद्यत्वेन तेषां निवेशः विशिष्टार्थविशेषमनंतर्भाव्य प्रतिज्ञात्वादीनां दुर्निर्वचत्वात् तेषां विशि
ष्यनिवेशनस्यावश्यकत्वे तत्तद्विशिष्टार्थविषयकबोधजनकवाक्यप्रतिपाद्यत्वेन तत्तद्विशिष्टार्थनिवेशनस्य शि
रोवेष्टनेन नासिकास्पर्शतुल्यत्वात्। एतत्सूचनायैव तत्तदित्युक्तं न चात्र नानावयवजन्यसमूहालंबनबोधे प्रति
ज्ञाहेत्वादिजन्यविशिष्टार्थबोधे यादायत्तज्जनकसमुदायेतिव्याप्तिः तत्तद्विशिष्टार्थबोधनिष्ठतत्तदेकदेशबुद्धि
त्वावच्छिन्नजन्यतानिरूपितजनकताश्रयावयवैकदेशे चातिव्याप्तिः तत्तद्विशिष्टार्थविषयकशाब्दबुद्धित्वाव
च्छिन्नजन्यता अन्यतमत्वेनोपादायतत्तन्निरूपितजनकतावच्छेदकधर्मपर्याप्त्यधिकरणताया निवेशनीय
त्वात्। तादृशो धर्मः पर्वतो वह्निमान्नित्यादिवाक्यत्वमेव तादृशवाक्यत्वस्य व्यासज्यवृत्तितया नैकदेशेऽतिव्या
प्तिः तादृशशाब्दबुद्धित्वावच्छिन्नत्वं च तादृशशाब्दबुद्धित्वपर्याप्तावच्छेदकताकत्वमतः प्रतिज्ञाहेतुसमुदा
यादेः साध्यविशिष्टपक्षावगाहिशाब्दत्वघटितधर्मावच्छिन्नजनकत्वेपि नातिप्रसंगः वाक्यज्ञानस्य जन

कत्वमितेतुतादृशजनकतायांविषयितासंबंधेनयादृशधर्मावच्छिन्नंयादृशधर्मावच्छिन्नविषयकत्वंवाऽवच्छेदकंताद
शधर्मपर्याप्त्याश्रयत्वंविवक्षणीयमितितन्नासंभवःतादृशोपिधर्मःपर्वतोवह्निमानित्यादिवाक्यत्वमेव अथवाकांक्षा
दिमत्पदसमूहत्वरूपवाक्यत्वमेववाऽसदुपवृत्तितदवच्छिन्नविषयकज्ञानत्वेनशाब्दबुद्धिजनकत्वंसमूहत्वज्ञानस्या
नुपयुक्तत्वात् किंत्वानुपूर्वीविशेषात्मकाकांक्षावच्छिन्नविषयकज्ञानत्वेनैवतथात्वंआनुपूर्वीविशेषश्चैकवर्णनि
ष्ठापरवर्णानंतर्यरूपानव्यासज्यवृत्तिरित्येकदेशातिप्रसंगोदुर्वारः नचतादृशजनकतावच्छेदकीभूतविषयिता
निरूपकवर्णसमुदायत्वमेवविवक्षणीयमतोनातिप्रसंगइतिवाच्यं तत्तत्प्रतिज्ञादिव्यक्तिभिन्नप्रतिज्ञादिघट
कवर्णानामपितादृशसमुदायघटकतयाक्वचिदप्यवयवव्यक्तौतादृशसमुदायत्वापर्याप्तेः प्रत्येकमवयवव्यवहा
रानुपपत्तेः मैवं तादृशबोधजनकतावच्छेदकीभूतयत्किंचिज्ज्ञानीविषयितानिरूपकवर्णसमुदायत्वंविवक्षणी स्य
यत्वात्। तादृशंचज्ञानंतथाविधजनकताद्वयशून्यत्वेनविशेषणीयंतेनप्रतिज्ञाहेत्वादिसमुदायेनातिव्याप्तिः।
नन्वेवंहेत्वर्थप्रतिपादकभागघटितप्रतिज्ञाविशेषेव्याप्तिःतद्विषयकज्ञानेहेत्वर्थबोधकतानियमादितिवाच्यं।

व्याप्यव्यापकभावानापन्नजनकताद्वयशून्यतायां निवेशनीयत्वात्। [illegible]कत्वानवच्छेदकविषयिताविशिष्टतादृशजन
कतानाश्रयत्वं ज्ञाने विशेषणं देयं स्वजनकताप्रतिज्ञाहेतूभयादिविषयकज्ञानं च प्रतिज्ञार्थबोधजनकतानवच्छेद
कीभूतहेत्वादिविषयिताविशिष्टतादृशजनकता[illegible]श्रय एव धूमादालोकवान् पर्वतो वह्निमानित्यादिप्रतिज्ञाम
त्रविषयकज्ञानं च न तादृशविशिष्टजनकताश्रयस्तन्निष्ठहेत्वर्थबोधजनकतावच्छेदकविषयितायां अपि विशिष्ट
प्रतिज्ञार्थबोधजनकतायामवच्छेदकत्वात्। एतेन व्याप्यव्यापकभावानापन्नतथाविधजनकताद्वयशून्यत्वप्रवे
शे धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यादिसमुदाये तिव्याप्तिः तादृशसमुदायविषयकज्ञाननिष्ठप्रति
ज्ञार्थबोधजनकताहेत्वर्थबोधजनकतयोर्व्याप्यव्यापकभावसत्त्वात्। व्याप्यव्यापकभावानापन्नतथाविधजन
कताद्वयशून्यत्वादिति निरस्तं। तादृशवाक्यविषयकज्ञानीयप्रतिज्ञाघटकहेतुसमानाकारवाक्यविषयिताया
विशिष्टप्रतिज्ञार्थबोधजनकत्वेऽवच्छेदकत्वेपि प्रतिज्ञावाक्यविषयितानंतःपातिन्या हेतुविषयितायास्तादृशज
नकतानवच्छेदकत्वात्। यस्मिंचोदासीनपदार्थविषयितानियतविषयिताकावयवव्यक्तिः प्रामाणिकी न तादृशत्वानव

छेदकविषयितात्तथाविधजनकतावच्छेदकत्वेनविशेषणीयात्तादृशावयवव्याप्तिविषयकज्ञानेवयवांतरविषयितानैयत्य
स्यप्रामाणिकत्वेनगतिरेवेतिध्येयम्।समानाकारकप्रतिज्ञाद्वयाद्यात्मकसमुदायस्यावयवत्वपर्य्याप्त्याश्रयत्वमिष्टमेव
तस्यातथात्वेतद्वारणप्रकारोपिचिंतनीयः न्यायांतर्गतत्वस्यापिनिवेशनीयतयानोदासीनवाक्यसाधारण्यमि
तिबोध्यं।अत्रचयत्किंचित्निवेशादननुगमोदुर्वारः एवंप्रतिज्ञाघटकहेत्वर्थप्रतिपादकभागेऽतिव्याप्तिः एव
मुदाहरणस्यवाक्यद्वयात्मकस्यसंग्रहायतत्प्रतिपाद्यसाध्यविशिष्टधर्मिविषयकशाब्दत्वावच्छिन्नजन्यतातथा
विधहेतुविशिष्टधर्मिविषयकशाब्दत्वावच्छिन्नजन्यतान्यतमजन्यतागर्भनिवेशनीयातथाचतद्घटकप्रत्ये
कवाक्येतिव्याप्तिस्तादृशार्थद्वयविषयकबुद्धित्वंचनसमुदायस्यापिजन्यतावच्छेदकमितितदवच्छिन्नैकजन्यता
निवेशासंभवात्।न[illegible]जनकताएवान्यतमत्वेननिवेशनीयाः तच्छरीरेचोदाहरणप्रतिपाद्यतत्तद्विशिष्टार्थ
बुद्धित्वावच्छिन्ननिरूपितजनकताद्वयंद्वित्वेननिवेशनीयं अतएवैकैकजनकताश्रयप्रत्येकभागविषयक
ज्ञानमादायनप्रत्येकभागेतिव्याप्तिरितिवाच्यं।उभयमिन्नत्वस्यप्रत्येकमुभयोःसत्वात्।उभयभिन्नभिन्नत्वऽ

स्योभयत्वासंभवात् अन्यतमत्वेनोभयोपादानासंभवात्। व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकभेदोपगमे तु त-
दृश्यत्यतमत्वाश्रयप्रत्येकजनकतामादायातिप्रसंगस्य दुर्वारत्वात् पूर्वकल्पे तु प्रतिज्ञाद्यघटकत्वविशेषणेनैव नाति-
प्रसंगावकाशः। योयो धूमवानित्यादिप्रत्येकवाक्यस्य वाक्यद्वयात्मकोदाहरणघटकत्वात् तन्न वाक्यद्वयपर्याप्तमुदा-
हरणत्वं दुर्वचं स्वघटकयत्सदोपस्थाप्यधर्मिणि हेतुमत्ताबोधकं यद्वाक्यं यच्च तदनंतरप्रयुक्तं स्वघटकतत्सदोप-
स्थाप्यतादृशधर्मिणि साध्यवत्ताबोधकं वाक्यं तदुभयत्वस्यैव तथात्वात्। अथात्मापि प्रतिज्ञाद्यघटकत्वं निवेश-
नीयमिति चेत्तर्हि गुरुशरीरस्य तादृशविषयितानिरूपकवर्णसमुदायत्वस्य निवेशापेक्षया निरुक्तोभयघट-
कभागद्वयाघटितत्वनिवेशनमेवोचितमिति रुचिबीजमवसेयं ननु न्यायतैजन्यज्ञानस्याप्युपनयार्थसाध्य-
व्याप्यवत्पक्षावगाहितया परामर्शत्वरूपत्वात् परामर्शजनकवाक्यत्वमेव न्यायत्वं कुतो नोच्यते एवं तादृशवा-
क्यघटकवाक्यत्वमेवावयवत्वमस्तु किमुक्तगुरुतरन्यायतदवयवलक्षणानुसरणेनेति प्रतिज्ञादिपंचक-
स्य विशिष्टैकार्थप्रतिपादकत्वाभिमानिनामाशंकां मूलकृन्निराकरोति अत एवेति तादृशलक्षणमुपेक्ष्य यथो-

गदा० अ०
१७

कलक्षणकारणादेवेत्यर्थः। परामर्शस्य परामर्शमात्रस्य परामर्शजनकस्य परामर्शजनकमात्रस्य मात्रपदात्पूर्वोपव
र्णितन्यायत्वदवयवलक्षणघटकशब्दबोधविशेषैः क्रमेणाव्यवहितैर्वाक्यपंचकसमुदायस्यैव प्रत्येकवाक्यस्यापि
न्यायत्वमिष्टमेव परामर्शप्रयोजकवाक्य एव न्यायव्यवहारात्तत्वस्य समुदायवत्प्रत्येकमात्रेपि सत्वात्। एवंच पराम
र्शप्रयोजकवाक्यत्वमेव न्यायलक्षणमिति केचित्तन्मतमुपन्यस्यति यत्विति संक्षेपतः लाघवतः सोपि न्याय एवे
त्यनेनान्वयः। परामर्शप्रयोजकेति वन्हिव्याप्यधूमवानयमित्यादिवाक्यस्यापीत्यादिः। विशेषेति वाक्यपंचकात्मक
समुदायादित्यादिः। यादृशवाक्यप्रयोगानोर्थांतरादिनिबंधनतनिग्रहप्रयोजकस्तदेव न्यायव्यवहारविषय इति नि
यमाभिप्रायेण दूषयति। तन्नेति। कथायां विचारसमये आकांक्षाक्रमेणैवाभिधानं निग्रहाप्रयोजकमिति शेषः
इति अतः तदभिधाने निग्रहादिसंग्रमेणान्वयः। विशिष्टवैशिष्ट्यपक्षस्य व्याप्तिविशिष्टहेतुमत्वे आकांक्षा जिज्ञा
सा नास्तीति विप्रतिपत्तितः साध्यतदभावसंशयवतस्तदेकतरकोटिजिज्ञासा प्रथममुदेति ततः प्रतिज्ञावाक्या
त्तन्निश्चये तद्धेतौ तत्प्रतीतौ च तद्गमकत्वोपयिकव्याप्त्यौ तदनंतरमेव च पक्षस्य तादृशहेतुमत्व इति भावः। तद

भिधानेविशिष्टवैशिष्ट्यप्रतिपादकवाक्योच्चारणेऽत्रापिप्रथममित्यनुषज्यते।अत्रलाघवमात्रमादृत्यतस्यलक्षणत्वापग
मेपरामर्शजनकतायेतिलाघवाद्वाक्यत्वमप्यन्तर्भाव्यपरामर्शजनकत्वमात्रस्यलक्षणत्वौचित्यादितिभावः।ननुमध्यस्था
कांक्षायतोनिवर्ततेसएवन्यायःसाचशाब्दत्वप्रकारिकाविषयसिद्धिनिर्वाहकशाब्दादेवनिवर्ततेनतुप्रमाणान्तरादितिन
चक्षुरादेर्न्यायत्वमतआह।आकांक्षेति।आकांक्षानिवृत्तिविरहइत्यर्थः।तुल्यएवेतिव्याप्यवत्ताबोधकवाक्यस्यप्रथमं
प्रयोगेपिसाध्यसंदेहाद्यधीनानांमध्यस्थाकांक्षाणामनिवृत्तेरितिभावः।दुर्निरूपं असंभवि जनकतायाअवच्छेद
कनियतत्वात्तज्ज्ञानस्यावच्छेदकज्ञानाधीनत्वादितिभावः।लक्षणान्तरसंभवस्यलक्षणदोषतयातस्यैवलक्षणत्वा
दितिमूलमसंगतमतोदीधितिकृद्भावंव्याचष्टे।तथाचेति।तादृशानुगतरूपस्यैवेत्यर्थः।साधकाभावइतितादृ
शधर्मस्यैवन्यायादिपदप्रवृत्तिनिमित्तत्वसंभवेनतत्प्रवृत्तिनिमित्ततयाज्ञाननिष्ठजातिविशेषसिद्ध्यसंभवादुक्तयु
तरस्यचासत्वादितिभावः।बाधकमित्यस्यप्रतिज्ञादिजन्यतावच्छेदकजातिस्वीकारेस्यादिः।तेनवक्ष्यमाणसंकरस्यन्याय
जन्यतावच्छेदकजातावसंभवेपिनक्षतिः।अन्यथेतिमूलस्यप्रतिज्ञादिजन्यतावच्छेदकजातिस्वीकारेसंकीर्णजाति

गदा०अ०

१८

स्वीकारप्रसंगइत्यर्थकत्वमभिप्रेत्यसंकरं विवृणोति। न्यायेति न्यायजन्यं च ज्ञानं विशिष्टैकार्थविषयकं तावद्वाक्यार्थ
विषयकसमूहालंबनरूपं चेत्यन्यदेतत्रूपं चेति। जात्यइत्यग्रिमेणान्वयः। तथा च तत्तैव प्रतिज्ञादिजन्यतावच्छेदक
पंचजातीनां समावेश इति भावः। अन्यत्रापि सामानाधिकरण्यमाह। द्वित्वादीति। मिथो व्यभिचारितामाह। एकैके
ति। ननु एकैकजन्यनानावयवजन्यबोधगततदवयवजन्यतावच्छेदकजातीनां नानात्वोपगमान्न संकरावकाश
इत्यत आह। तत्र तत्रेति समानाधिकरणाभावइति प्रतिज्ञाहेत्वादिनानावयवजन्यबोधनिष्ठप्रतिज्ञादिजन्यताव
च्छेदकजातेर्हेत्वादिजन्यतावच्छेदकतया हेत्वादावपि प्रतिज्ञादिलक्षणगतिव्याप्त्यापत्त्या तादृशांशघटितलक्षणा
करणसंभवेन तादृशजातौ लक्षणानुरोधरूपयुक्तेरनवकाशात्। एकैकावयवजन्यबोधवृत्तिजातीरुपादा
यस्वरूपयोग्यताघटितलक्षणस्य निर्दोषत्वे पुष्प्रयादिजन्यबोधे तत्तज्जात्यसमावनिर्वाहकप्रतिबध्यप्रतिबंध
कभावकल्पने महागौरवात् तत्तज्जात्यवच्छिन्नजनकतावच्छेदकत्वेनाभिमतानां गुरुशरीराणामपि यथोक्त
धर्माणां प्रतिज्ञादिपदप्रवृत्तिनिमित्तत्वोचित्येन तत्तज्जातिकल्पने प्रवृत्तिनिमित्तलाघवरूपाया अपि युक्तेर

जाति

नवकाशादितिभावः। अननुगमेन तत्तज्जातिघटितलक्षणासंभवाल्लक्षणानुपपत्तिरूपयुक्तेः सुदूरपराहतत्वा
दितिभाववर्णनमनुपादेयं एकैकान्वबोधवृत्तिजातिमादायैवस्वरूपयोग्यताघटितलक्षणसंभवात् अन्यथे
त्यादिमूलमन्यथाव्याचक्षाणानां मतमाह। केचित्त्विति तदेतं मन्यथयस्यार्थः कदाचिदिति हेत्वादिजन्येऽन्य
त्रापि अनुषज्यते तेन परस्परव्यभिचारितालाभः स्यादिति वर्तते ऽर्थः। नियामकाभावादिति भावः। ननु नियमे
न सर्वत्रैव प्रतिज्ञाजन्यबोधं हेत्वादिजन्यव्यक्तिवृत्तिजातिमत्वसंभवेन परस्परव्यभिचारितायादुर्घटत्वात् न
संकरावकाश इत्यतो बाधकान्तरं पूरयति सर्वेषामिति सर्वत्र सर्वजातिमत्त्वे जातीनां समनैयत्यसाङ्कर्य्य एव दुर्लभ
इति सर्वजातीयत्वप्रसंगोऽसंगत इत्यत आह। एकत्र इत्थं च विजातीयशाब्दबोधजनकत्वघटितप्रतिज्ञादिलक्ष
णासंभवदुक्तिक भवतीति भावः। अन्यत्र चानुगतकारणाभावेऽप्यननुगतकारणघटितसामग्रीणां जातिविशेष
नियामकत्वसंभवतीति नोक्तरीत्या जातिसंकराद्यवकाशः अन्यथानुमितित्वादिजातेरप्यनियमेन प्रत्यक्षादिसा
धारण्यापत्तेः तत्रापि वह्निव्याप्यवत्तापरामर्शादीनामननुगतत्वादनुगतस्यैकस्य च कारणस्यासंभवेऽपि तत्

स्यातिप्रसक्तत्वात्।तादृशस्यचप्रकृतेपिसंभवाच्चनचव्यभिचारेणतादृशजात्यवच्छिन्नशाब्दबोधंप्रत्यननुगतस्य
कारणतासंभवात्तादृशजातीनांकारणनियतत्वंनसंभवतीत्येकस्यात्यज्जातीयताप्रसंगोदुर्वारइतिवाच्यं अनु
मितौपरामर्शस्येवप्रकृतेननुगतकारणस्यकार्यतावच्छेदकसंकोचेनव्यभिचारवारणसंभवादिसत्तरसबीज
भवस्येयंनचानुगतनियामकाभावस्याकिंचित्करत्वेनुगतानतिप्रसक्तरूपमंतरेणदुर्निरूपमितिमूलासंगति
रितिवाच्यं।स्वमतेनुगतनियामकाभावेननिर्भरःअपितुन्यायजन्यबोधादौसंकररूपबाधकएवेतिवक्तुंश
क्यतयातादृशबाधकस्यविचारसहत्वेनक्षतिविरहात्।इदंपुनरिहावधेयंप्रतिज्ञाद्यवयवादित्सादिमूलेनजा
तिविशेषघटितप्रतिज्ञादिलक्षणाभिप्रायकंतथासतितादृशप्रतिज्ञादिलक्षणस्याल्लैवनिराकृतत्वेनमति
न्नाग्रंथेप्रतिज्ञाजन्यंविजातीयंज्ञानमित्यादिनाजातिघटितलक्षणमाशंक्यानैवदोषेणतन्निराकरणस्य
पौनरुक्त्यापत्तेःकिंत्ववयवसामान्यलक्षणपरंप्रत्येकमित्यस्यावयवांतरासहकारेणेत्यर्थः।तेनन्यायजन्यबो
धतौवाक्यैकवाक्यताधीनप्रतिज्ञात्वादिजन्यबोधतश्च्यवैलक्षण्यलाभेनतदात्मकसमुदायेतिव्याप्तिशंकानि

सः विजातीयत्वं च प्रतिज्ञाद्येकदेशजन्यबाधावृत्तिजातिमत्वं ते नावयवैकदेशगतिव्याप्तिशंकानिरासः मूले तज्जनक
शब्दत्वं तल्लक्षणमित्येव पाठः तल्लक्षणमित्यस्यावयवलक्षणमित्यर्थः। एवं चान्यथयादि मूलस्य प्रतिज्ञाहेत्वादिजन्य
तावच्छेदकजातीनां परस्परसंकरपरत्वं न घटत इति यदि लक्षणानुरोधमात्रेण जातिस्वीकारस्तदा तत्साध्यपक्षहे
तुकन्यायादिलक्षणानुरोधेनापि विभिन्नसाध्यादिकन्यायजन्यशाब्दबोधेषु विभिन्नानां प्रतिज्ञाद्येकदेशजन्यबाधा
वृत्तिनानाजातीनां स्वीकरणीयतया तासां च तथाविधद्वित्वादिन्यायजन्यबोधे समावेशेन संकीर्णजातिस्वीकारप्र
संग इति तादृशमूलार्थः यदि च संकररूपबाधकभयेन जातिकल्पनासंभवाज्जातिघटितन्यायविशेषादिलक्ष
णं न संभवतीत्यन्यथैव तत्साध्यपक्षहेतुकन्यायादेर्योनिर्वचनीयाइत्युच्यते तदा व्याप्यादिपदवन्न्यायादिपदस्या
पि नानार्थत्वेक्षतिविरहात्सर्वसाधारणन्यायत्वादिनिर्वचनानुरोधेन जातिस्वीकारोप्यनुचित इति भावः। दी
धितिकारस्तु तत्तद्धीजनकशब्दत्वं तत्तल्लक्षणमिति मूलपाठाभिप्रायेण प्रतिज्ञाहेत्वादिजन्यतावच्छेदकजाती
नां न्यायजन्यबोधादौ संकरपरतयाजातिसंकरप्रसंग इति मूलं व्याख्यातवान् तादृशपाठे तद्ग्रंथस्यावयवसामान्य

लक्षणपरत्वानुपपत्तेः एवंच सत्यगत्याभिन्नप्रस्तावेजातिघटितप्रतिज्ञालक्षणंविस्मरत्यप्रतिज्ञाग्रंथेपुनस्तदाशंकेतिय
थाकथंचिदग्रिमग्रंथावतारोबोध्यः साध्यपदमनुमितिविधेयवाचकपरमित्यभिप्रायेणमणिकारदूषितंसूत्रकारी
यप्रतिज्ञालक्षणंसाध्यपदस्यप्रकृतानुमितिविधेयविशिष्टार्थपरतांस्वीकृत्यपरिष्कर्तुमारभतेसाध्येतिसामान्य
तोविधेयत्वस्यधर्मिविशेष्यकेवलान्वयितयावयवांतरेविधेयविशिष्टधर्मिबाधकत्वमतिप्रसक्तं एवंप्रतिज्ञासमा
नाकारन्यायबहिर्भूतवाक्येपीत्यतःसाध्यपदस्यतद्विशेषपरत्वंनिर्देशपदस्यचबोधजनकन्यायावयवरूपवा
क्यविशेषपरत्वमनुसृत्यपर्यवसितार्थमाह। तथाचेतिपक्षतावच्छेदकसाध्यतावच्छेदकयोर्नेतत्वेननिवेशआ
पितुविशिष्यैवेतिसूचनायपर्वतत्वादीतिवन्हित्वादीतिचतादृशविशिष्यवैशिष्ट्यावगाहिशाब्दबोधत्वावच्छिन्नज
नकत्वं किंचिद्ज्ञानविषयवर्णसमुदायत्वमिहविवक्षणीयमतोहेत्वर्थादिविषयकप्रतिज्ञार्थबोधजनकताया
हेत्ववयवादिमात्रविषयकबाधसाधारण्येपिनहेत्ववयवादावतिव्याप्तिः न्यायांतर्गतत्वमुपेक्ष्यन्यायावयवत्वनि
वेशात्प्रतिज्ञार्थबोधजनकप्रतिज्ञाहेतुविषयकज्ञानमादायप्रतिज्ञाहेत्वादिसमुदायेनातिव्याप्तिः पक्षतावच्छे

दकविशिष्टत्वादिनिवेशनप्रयोजनमाह। उदाहरणाच्चेति यद्यपि साध्यतावच्छेदकविशिष्टवैशिष्ट्यज्ञानजनकत्वमात्रस्य
वनिवेशे उपनयनिगमनयोरप्यतिव्याप्तिः तथापि यत्किंचिद्धर्मविशिष्टशुद्धसाध्यतावच्छेदकविशिष्टवैशिष्ट्यबोधज
नकत्वमात्रस्यैव निवेशेन न तत्रातिप्रसंगः उपनयार्थव्याप्तिशरीरघटकसाध्यस्य धर्मितावच्छेदकाप्रवेशात्। निग
मनजन्यबोधेऽपि साध्यांशे हेतुज्ञानज्ञाप्यत्वस्याधिकस्य भानात्। अन्यथा पक्षतावच्छेदकांतर्भावेऽपि अनुषंगपक्षेऽ
ऽ निस्तारादिति उदाहरणमात्रानुसरणं तत्राप्युदाहरणजन्यबोधव्यापकत्वं न विधेयतावच्छेदकतया भासते अपितु
शुद्धवह्नित्वाद्यवच्छिन्नमेव सकलहेत्वधिकरणे भासत इति। प्राचीनमतमनुसृत्य निगमनेयं पदाननुषंगप
क्षे शुद्धसाध्यतावच्छेदकविशिष्टत्वं न निविष्टं विशेषणांतरावच्छिन्नवह्न्यादिसाध्यकन्यायांतर्गतप्रतिज्ञायां शु
द्धवह्नित्वावच्छिन्नसाध्यकप्रतिज्ञालक्षणे अतिप्रसक्तेः प्रकृतन्यायांतर्गतत्वाभावेनैव वारणादित्यभिप्रायक
मिदं अतो व्यापकत्वस्याधिकस्योदाहरणबोधे भानेऽपि न क्षतिरिति केचित्। तन्मते निगमनापेक्षाबीजं चिंत
नीयं यत्तत्पदस्योदाहरणस्थस्य न पक्षतावच्छेदकावच्छिन्नपरत्वं अपितु पक्षान्यसाध्यवत्साधारणरूपावच्छिन्नप

जनकत्वस्य

रत्वमेव पक्षतावच्छेदकावच्छिन्ने हेतुमत्त्वस्य ततो लाभेन उपनयानुधानात्तदवच्छिन्ने साध्यवत्त्वस्य प्रतिज्ञात एव लाभे
नाकांक्षितत्वाच्चेति पक्षतावच्छेदकप्रवेशेनोदाहरणातिप्रसंगः। अत्र च यत्किंचिद्धर्मावच्छिन्नविशेष्यकसाध्यता
वच्छेदकावच्छिन्नवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नजनकत्वमुदाहरणैकदेशे स वह्निमानित्यादिवाक्य एव न तु तस्य
न्यायावयवत्वं तच्च समुदाय एव न तत्र तादृशं जनकत्वमिति विशिष्य पक्षतावच्छेदकानंतर्भावेपि नोदाहरणाति
प्रसंग इति नाशंकनीयं जनकयत्किंचिज्ज्ञानविषयवर्णसमुदायत्वरूपस्य विवक्षितत्वात्। उदाहरणविषयकज्ञा
नविषयत्वमादाय समुदाय एवातिप्रसक्तेः एवमेतल्लक्षणप्रविष्टन्यायावयवत्वशरीरे प्रतिज्ञाहेत्वादिसमुदाय
घारणयोभयघटकभागद्वयाघटितत्वमेव निवेशनीयं न तु प्रतिज्ञाद्यघटकत्वमपि प्रयोजनांतरविरहादुदा
हरणैकदेशे तादृशवाक्येऽतिप्रसंगस्य लघुतरप्रकृतपक्षतावच्छेदकवैशिष्ट्यनिवेशनेनैव वारयितुमुचितत्वात्।
यद्यप्येवं नीलपर्वतो वह्निमानित्यादिप्रतिज्ञैकदेशे पर्वतो वह्निमानित्यादिभागेपि व्यावृत्तिः संभवति। तथा
पि सकलप्रतिज्ञैकदेशेन तथेति विशेषोपादाने प्रयासाधिक्येनोदाहरणमनुधावतमिति ध्येयं साध्यतावच्छे

नु

दकावच्छिन्नप्रकारकत्वनिवेशनप्रयोजनमाह। उपनयाद्येतिसाध्यवैशिष्ट्यमात्रनिवेशेपिपर्वतोद्रव्यवान्धूमादि
सादित्यायांतर्गतउपनयेतत्स्थलीयप्रतिज्ञालक्षणातिव्याप्तिरितिसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वनि
* वेशइत्यवधेयं। यथाश्रुतसत्यंतार्थस्योदासीनवाक्यसाधारण्यमस्तमेवन्यायांतर्गतवाक्यजन्यस्यैवतदनंतर्गत
तादृशवाक्यजन्यस्यापिशाब्दबोधस्योपनायकज्ञानादिविधयापरामर्शप्रयोजकत्वात्ततस्तदर्थमाह। प्रकृतन्याया
वयवत्वेतिवह्निव्याप्यधूमसाध्यकानुमितेरपिकदाचिदुद्देश्यतयावक्ष्यमाणातिप्रसंगवारणासंभवादुद्देश्यपदंप्र
कृतार्थकतयाव्याचष्टे। उद्देश्यतेतिवह्निसाध्यकोपनयस्यतत्साध्यकन्यायांतर्गतोपनयस्यएतेनान्यसाध्यकन्याय
मादायससंतदलसत्वमाविष्कृतंवह्निव्याप्यधूमसाध्यकेत्यादिनाऽन्यसाध्यकानुमितिमादायविशेष्यदलसत्वंस्फु
टीकृतंवारणायप्रतिज्ञाव्यवहारविषयतावारणायप्रकृतद्वयंप्रतिज्ञापदार्थप्रविष्टन्यायानुमित्सोरेकसाध्यादिक
पद् त्वप्रापकंप्रकृतद्वयंप्रकृतन्यायावयवत्वपर्यंतानिवेशेवह्निव्याप्यधूमसाध्यकप्रतिज्ञानुरोधेनतत्साध्यकानुमि
तेरपिप्रकृतपदेनविवक्षणीयतयांतामादायदर्शितोपनयेप्रकृतानुमितिपर्यंतानिवेशेवह्निसाध्यकन्यायस्य।

पिप्रकृतत्वापायेयनेनविवक्षणीयतयातदवयवत्वमादायतत्रप्रतिज्ञाव्यवहारस्यदुर्वारत्वादतउभयत्रप्रकृतत्वनि
वेशः तथाचसत्समभिव्याहृतसाध्यपक्षकानुमित्यंतर्भावेयादृशगलक्षणार्थस्तत्स्फुटयति। तथचेतियत्तुतादृशरूपेणैव
न्हिव्याप्यधूमसाध्यकप्रतिज्ञाव्यवहारवारणायव्याप्येवन्हिसाध्यकप्रतिज्ञाव्यवहारवारणायानुमितौप्रकृतत्वनिवे
शनमिति। प्रकृतद्रूयमित्यंतार्थइतितत्रियंतत्साध्यपक्षकप्रतिज्ञाव्यवहारविषयस्यात्रनिर्वाच्यत्वेप्रतिज्ञापदार्थ
घटकन्यायानुमितेरूपमथत्रसमभिव्याहृतसाध्यपक्षान्वयनिवेशप्रयोजनायप्रकृतद्रूयंतसाध्यपक्षकार्थकमिससै
वाभिधानमुचिततयातदुपेक्ष्यप्रतिज्ञाव्यवहारविषयतावच्छेदकीभूतैकधर्मशरीरद्विधानिविष्टयोःसाध्यपक्ष
योरभेदमात्रलाभायतथाचेसन्निधानेसंदर्भविरोधात्।यादृशसादेःस्वस्यसादेःतादृशसादेःस्वनिष्टमित्या
दिःपर्यवसितार्थःप्रतिज्ञापदप्रतिपाद्यतावच्छेदकतयामूलाभिप्रायविषयःएवंचसतिप्रतिज्ञापदस्यनानार्थत्वे
नदोषायगत्यंतरविरहादितिप्रागेवोक्तंग्रंथकृतेवतत्साध्यतावच्छेदकावच्छिन्नतत्साध्यकतत्पक्षकन्यायायांशेनिवे
शनेउक्तोपनयएवातिप्रसंगः। यत्पक्षकानुमितिसमानविषयकत्वंतत्पक्षकन्यायांतर्गतत्वस्याक्षतत्वादितित

अ

प्रतिज्ञा ऽ

न्निवेशनं द्रव्यगगनाप्य धूमवान् भूमित्याकारक द्रव्यत्वावच्छिन्नसाध्यकोपनयवारणाय साध्यतावच्छेदकनिवेशनं एतल्लक्ष
णघटकन्यायावयवत्वशरीरे उदाहरणाद्यघटकत्वनिवेशस्य तिषाधयिषाधीनन्यायप्रयोगानंगीकारपक्षे प्रयो
जनांतरविरहात् । घटकत्वमात्रस्य तदेकदेशासाधारणस्य निवेशनीयतया वन्ह्यादिसाध्यकन्यायांतर्गतस्य यत्किं
चिद्धर्मिकवन्ह्यादिसाध्यकानुमित्यन्यूनानतिरिक्तविषयकबोधजनकस्य वन्हिमान् इत्याद्युदाहरणैकदेशस्य वारणा
यैकधर्मावच्छिन्नपक्षकत्वनिवेशनं । अस्तु तो अनुमित्यन्यूनानतिरिक्तविषयकत्वं प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्या
वगाहित्वे सति तादृशवैशिष्ट्यविषयिताविलक्षणविषयिताशून्यत्वरूपमनुमितिमनंतर्भाव्यैवाग्रे निर्वचनीयं
तत्र प्रकृतपक्षादिव्यावृत्तिरग्रे दर्शनीया किं व्यावृत्त्यंतरस्थलांतरानुसरणेन यत्तु पक्षविशेषमनंतर्भाव्यान
तिप्रसक्तस्य न्यायत्वस्य दुर्निर्वचतया पक्षनिवेशनमिति तदसत् । तथा सति हेतुविशेषमनंतर्भाव्यापि तस्य दुर्व
चतया यादृशहेतुकस्यापि वक्तुमुचितत्वात् यदि च न्यायपदोपादानादेव तत्र हेतुविशेषनियंत्रितन्यायला
भ इति न तदभिहितमित्युच्यते । तदा पक्षप्रवेशस्यावश्यकत्वेपि न्यायपदादेव पक्षविशेषनियंत्रितन्यायलाभ

स

इति चेत्तदभिहितमिसन्व्यते तदापक्षप्रवेशस्यावश्यकत्वेपि यादृशपक्षकसन्निधानस्यानुपयुक्ततेति हेतोर्वारणा
येति अनतिरिक्तविषयकत्वं पक्षतावच्छेदकविशिष्टेसाध्यतावच्छेदकविशिष्टवैशिष्ट्यविषयत्वं तद्भिलक्षणविषयता
शून्यत्वं न तु प्रकृतानुमितिविषयाविषयकत्वं स्वयमग्रे दूषणीयत्वात्। तादृशविषयताविलक्षणत्वं च तादृशविषय
ताशालिनिश्चयत्वावच्छिन्नानिवर्त्यसंशयनिवर्तकतावच्छेदकत्वरूपं निर्वक्ष्यते एवं चोक्तहेत्ववयवजन्यबोधस्या
नुमितिविषयवह्निनिष्ठधूमज्ञानज्ञाप्यत्वविषयकत्वेपि तादृशविषयताविलक्षणविषयताशून्यत्वमक्षतमेव
समिप्रसक्तिरिति भावः। निगमनवारणायेति निगमनजन्यबोधस्यापि पक्षतावच्छेदकविशिष्टेसाध्यतावच्छेद
कविशिष्टवैशिष्ट्यावगाहित्वेनान्यूनविषयकतयातिव्याप्तिप्रसक्तेरिति भावः। निगमनेतस्माद्वह्निमानितिवा
क्यसंनिधाने साकांक्षादिति। अवयवांतरबहिर्भूतेनेत्यर्थः। नश्रूयतइति तथा च कथं तज्जन्यबोधस्यान्यूनविष
यकत्वमिति भावः। न्यूनताभंगाय आकांक्षापूरणाय पक्षतावच्छेदकविशिष्टेपक्षे साध्यवत्ताबोधनेकृते तादृ
शवह्निमानिति जिज्ञासा निवर्तते वह्निमानित्यसंनिधाने च तादृशाकांक्षासर्गतो जायत इत्यनुमितिश्चमेवेति भावः

भव

अनुषंगादिति।निगमनसमभिव्याहृतत्वेनानुसंधानोपगमादित्यर्थः।तथाचतदंतर्भाव्यैवनिगमनावयवत्वंपर्य
वसतीत्यन्यूनविषयकबोधजनकन्यायावयवत्वमादायतादृशसमुदायातिव्याप्तिप्रसक्तिरितिभावः।निगमनेनचन
परामर्शोहेतुरितियथाश्रुतात्रिममूलग्रंथस्यसंगतंदलविरहेणनिगमनेनातिव्याप्तिरित्यर्थपरत्वंप्रतीयतेतच्चन
घटतेससंतस्यन्यायावयवत्वार्थकत्वात्तस्यचनिगमनसाधारण्याद्यथाश्रुतस्यापिसंगतार्थस्यप्रतिज्ञाया
मिवतत्रापृक्षतत्वादनतिरिक्तविषयकत्वविशेषणेनैवतद्वारणाच्चस्यनतिरिक्तविषयकत्वनिवेशनस्यनिग
मनातिव्याप्तिवारकतापरत्वेनतादृशग्रंथमनैवव्याख्यातुंभूमिकामारचयतिइत्थमेवचेति।अन्यूनानतिरि
क्तेति।तथाचन्यायावयवत्वपर्यवसिततादृशपरामर्शप्रयोजकशब्दज्ञानजनकत्वसत्त्वेपिअन्यूनानतिरिक्त
विषयकज्ञानजनकत्वंनास्तीतिपर्यवसितार्थः।अबाधितत्वादिपरतायाउदीच्यतद्बोधेनापिनिर्वाहान्निग
मनजन्यबोधेतद्भानार्थंलक्षणादरेनयुक्तइतिमूलोक्तंतद्विषयकतयातिरिक्तविषयकत्वंनविचारसहंएवं
पंचम्यंतभागार्थस्यातिरिक्तस्यविषयतायास्तथात्वाप्रतिपादनेनान्यूनत्वंचेत्यतःपूरयतितद्बोधोपयिकेतिअ

बाधितत्वादिबोधौपयिकेसर्थः॥विशिष्टहेतुसंबंधस्यव्याप्तिपक्षधर्मताविशिष्टहेतुज्ञानज्ञाप्यत्वस्यअसत्वाबाधित
त्वादिव्याप्यतयातद्बोधौपयिकत्वंबोध्यं।मिश्रमतमुपन्यस्यतियत्त्वितिपृथिवीइतरेभ्योभिद्यतइत्यस्यसमस्तंइतरपदं
पृथिवीतरपरंइतरादिसंबंधिकार्थबोधकपदान्तरसमभिव्याहृतेतत्पदोपस्थाप्यतत्तदर्थेतरत्वादिनानिरूढल
क्षणाअतोवादिवाक्येस्वारसिकलक्षणाविरहेपिनक्षतिःप्रतिज्ञादौसर्वत्रैकेनैवपदेनसाध्यादिनिर्देशइतिन
नियमः।तेनाग्रेपत्रपृथिवीतरेभ्योभिद्यतइत्युदाहरणप्रयोगाविरोधःविशेष्यवाचकंपृथिवीतिपदांतरंपू
णीयंश्रुतंपदंसमस्तमित्येववाउदाहरणवारणायेतितज्जन्यबोधेपिपक्षसाध्याश्रयतात्मकतत्संबंधरूपानु
मितिविषयसकलपदार्थभानेनान्यूनविषयकत्वसत्वादिसभिमानःतत् अनतिरिक्तेति अन्यूनविषयकत्वं
हिनप्रकृतानुमितिविषयताव्यापकविषयताकत्वंसर्वस्मात्कालत्ववानयंकालपरिमाणवान्सर्वस्मादित्यत्र
हेत्ववयववृत्तिव्याप्तेःनापिपक्षतावच्छेदकविशिष्टपक्षविषयकत्वंहेतुत्वंप्रमेयत्वाद्यन्यत्ववत्प्रमेयत्वादिसादौहे
त्ववयववृत्तिव्याप्तेःनापिपक्षतावच्छेदकविशिष्टविषयकत्वेसतिसाध्यतावच्छेदकविशिष्टसाध्यविषयकत्वंतद्

शिष्टविषयकत्वं वा प्रमेयनिष्ठहेतुत्वं प्रमेयं प्रमेयादित्यत्र हेतावतिव्याप्तेः। तज्जन्यबोधप्रमेयत्वत्वरूपसाध्यतावच्छेदकवि
शिष्टस्य प्रमेयपदार्थतावच्छेदकस्य धर्मिणि वैशिष्ट्यभानादिति पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशि
ष्ट्यावगाहित्वं तत्त्वाच्यं तथा च नोक्तोदाहरणातिव्याप्तिरित्याशयेन दूषयति। तत्तुच्छमिति ननु भ्रांतः पृथिवीपदस्य
विशेष्यपरत्वमितरपदस्य पृथिवीतरपरत्वमवगम्य तादृशोदाहरणात् पृथिवीत्वविशिष्टे साध्यवत्त्वं प्रसक्तीति त
त्रातिव्याप्तिप्रसक्तिरित्यत आह। तात्पर्यभ्रमेणेति। तादृशेति। अन्यूनविषयकेत्यर्थः। [illegible]। तथा चाय
मित्याद्याकारकसाध्यवत्त्वपरत्वभ्रमविषयसर्वनामपदघटितोपनयेऽतिव्याप्तत्वात्। तात्पर्यभ्रममादायापिना
तिव्याप्तिप्रसक्तिरित्याह। नवेत्यादिनापीति। उदाहरणस्य उदाहरणत्वपर्याप्त्यधिकरणस्य यन्नेत्यादेः। यन्नेत्यादिभा
गार्थस्य अनन्वयात्। पृथिवीतरभ्यो भिद्यत इत्येतादृशबोधप्रवेशात्। तथा चान्यूनविषयकतादृशबोधजनक
त्वमेकदेशस्यैव न तु यन्नेत्यादिघटितसमुदायस्य एकदेशस्य तु न्यायावयवत्वाभावादेव नातिप्रसंगशंकान्याय
त्वस्यैकदेशसाधारणस्य निवेशे चानतिरिक्तविषयकत्वनिवेशेऽपि तादृशोदाहरणैकदेश एवातिव्याप्तिरिति

भावः। तात्पर्यभ्रमेण पन्नेत्यादिकमंतर्भाव्य यद्भिन्ना पृथिवीतरेभ्यो भिद्यत इत्यन्वयबोधः संभवतीति नाशंकनीयं जलं न द्रव्यं गंधवदित्यादितो जलभिन्नं द्रव्यं गंधवदित्यन्वयबोधस्यानुभवविरुद्धतयान्यूनत्वोद्देश्यतावच्छेदककबोध स्याव्युत्पन्नत्वात्। यदितरभिन्ना पृथिव्यन्यदित्याकारको यदर्थविशेष्यकबोधोपि न संभवति। अयं न पचति। पुरुष इत्यत इदंपदार्थे पाककर्तृपुरुषभेदबोधस्यानुभवविरुद्धतयाऽभावप्रतियोगितावच्छेदकत्वेनाख्यातार्थभान स्य पचति चैत्र इवायमित्यादितः। पाककर्तृचैत्रादिसादृश्यबोधस्याननुभवेन इतरविशेषणविशेषणतया तद्भानस्यैवाव्युत्पन्नत्वात्। अत्र केचित्। अन्यूनविषयकत्वं पक्षतावच्छेदकविशिष्टविषयेसति साध्यतावच्छेद कविशिष्टविषयकत्वमेव न तु पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वं एवंच दर्शि तव्यतिरेक्युदाहरणजन्यबोधस्यापि तादृशान्यूनविषयकत्वादतिव्याप्तिः प्रसज्यते नन्वेवमपि साध्यतावच्छेद कविशिष्टसाध्यघटितवाक्यार्थबोधकत्वमुदाहरणैकदेशस्यैव न तु तन्न पृथिवीत्यादिभागघटितसमुदायस्ये यंवयवत्वविशेषणप्रवेशादेव नातिव्याप्तिशंकेति वाच्यं। वाक्यार्थद्वयविषयकसमूहालंबनबोधजनकतामा

कत्व

२ पक्षतावच्छेदकविशिष्टपक्ष

(प्रतिज्ञानूपशब्दः तदाकारकशब्दः प्रतिज्ञानूप्यतेऽनेनेतिव्युत्पत्तेः)
(तेन प्रतिज्ञाशब्दस्योदाहरणेकदेशत्वाभावेपिनक्षतिः॥३॥)

दायातिव्याप्तेः प्रसंजनात् न हि तादृशसमूहालंबनबोधजनकत्वमेकदेशेपर्यवस्यति। अपितु समुदाय एव तादृशा
न्यूनविषयकत्वघटितधर्मावच्छिन्ननिरूपितजनकतापर्यंतानिवेशनात्। अथवान्यायांतर्गतत्वमेव सर्वसंतार्थः अतए
वमिश्राणांघटशब्दोगुणः द्रव्यकर्मान्यत्वेसतिसत्त्वादित्यसन्नोदाहरणेऽव्यदिप्रतिज्ञानूपशब्दस्यदृष्टांतत्वेनोपादीयते
तदातिव्याप्तिवारणार्थत्वादित्यादिनाशब्दज्ञानपदस्यव्यावृत्तिदानसंगतिः तद्दानेतन्नातिव्याप्तिप्रसक्तिर्विषि
यविधयाश्रावणप्रत्यक्षजनकत्वात्तादृशदृष्टांतनूपशब्दस्येति पक्षतावच्छेदकविशिष्टविषयकत्वमेवान्यून
विषयकत्वं एवं च तादृशोदाहरणैकदेशातिव्याप्तिवारणार्थमेव साध्यतावच्छेदकसंबंधेनसाध्यतावच्छेदकमा
त्रविशिष्टसाध्यप्रकारकत्वार्थकमनतिरिक्तविषयकेतितज्जन्यबोधस्यसाध्यतावच्छेदकसंबंधेनसाध्याप्र
कारकत्वान्नाल्पदांतर्भावान्निगमनव्युदासः तज्जबोधेविशिष्टहेतुसंबंधस्याधिकस्यसाध्यांशभानेनशुद्ध
साध्यतावच्छेदकावच्छिन्नप्रकारकत्वेपिसाध्यांशे वात् एवं च वन्हिव्याप्यधूमवानयमित्याद्युपनयजन्यबोध
स्यव्याप्तिघटकाधिकरणांशसाध्यतावच्छेदकावच्छिन्नप्रकारकत्वेपिसाध्यांशेव्यापकत्वस्याधिकस्यभानेनतत्तत्रा

साध्या

तिप्रसंगः। नन्वेवमपि यत्र पृथिवीतरान्यदित्युदाहरणैकदेशे तिप्रसंगः तज्जन्यबोधे पक्षतावच्छेदकविशिष्टविष
यकत्वस्य स्फुटं साध्यतावच्छेदकविशिष्टसाध्यप्रकारकत्वस्य च सत्वादिति वाच्यं। पक्षतावच्छेदकावच्छिन्नविशेष्यकत्वा
वच्छेदेन तादृशसाध्यप्रकारकत्वस्य दलद्वय निष्कृष्टार्थत्वात्। तादृशोदाहरणभागजन्यबोधस्य इतरभेदांशे निर्ध
र्मितावच्छेदकतया तादृशप्रकारकत्वविरहात्। साध्यतावच्छेदकसंबंधनिवेशनं च यत्र कालिकसंबंधेन कालप
रिमाणस्पंदत्वादेः साध्यता समवायेन तस्यैव हेतुता तत्र सोपनयीमम्याप्यांतरिक्तभागवारणाय सिषाधयि
षयाऽन्यायप्रयोगेनाभ्युपेयते इति यत्र साध्यतावच्छेदकसंबंधेन साध्यतावच्छेदकविशिष्टसाध्यस्य हेतुता त
त्र सोपनीयतादृशभागे तिप्रसंग इत्यस्यानवकाशः। नन्वेवमपि निगमनीयतस्मादिति संशातिरिक्तांशातिव्या
प्तिर्दुर्वारैवेति वाच्यं तस्मादित्यंशार्थमनेतर्भाव्यव्यवहितयोः पक्षसाध्यवद्वाचकपदयोरन्वयबोधाजनकत्वादि
ति रीत्या उक्तस्थलेपि व्यावृत्तिदानं संगमयति। अयं पदाननुषंगपक्षे निगमनेनातिरिक्तविषयकत्वव्यावृत्तिनि
संगच्छते इत्याशंक्य तं यदि चेति अयमादीत्यादिना इदमादिपरिग्रहः वाक्यैकवाक्यतयेति उपनयनिगमनवा

ति

व

क्ययोरेकवाक्यतये सर्थः विशिष्टलाभात्। पक्षतावच्छेदकविशिष्टे साध्यवत्तालाभाद्विशेष्याकांक्षानिवृत्तेः न
च पक्षवाचकपदाननुषंगे तस्मान्नेतराणीत्यादिनिगमनविरोधः अनुयोग्यमिश्रितनञर्थशाब्दबोधस्यानुसन्
तया तन्मात्रस्याबोधकत्वेन वाक्यत्वाभावादिति वाच्यं। एतन्मते तादृशनिगमनानभ्युपगमात्। यद्यप्यनतिरिक्त
विषयकत्वानिवेशे अन्यूनविषयकबोधजनकत्वं तज्जनकज्ञानविषयत्वव्याप्यविषयवत्त्वविशेषितं प्रतिज्ञाहेत्वा
दिजन्यबोधमादाय हेत्वादावतिप्रसक्तं तथापि प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वरूपान्यूनविषयक
त्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकयत्किंचिज्ज्ञानविषयतावद्वर्णसमुदायत्वनिवेशे नायं दोष इति
स्थलांतरे व्यावृत्तिमाह तेदेशादिना। भानेज्ञाने सामान्यतः अधिकरणत्वरूपसामान्यधर्मावच्छिन्ने विशेष
रूपानवच्छिन्न इति वा। साध्यत्वभानात्। साध्यवत्त्वविषयकत्वात्। उपनयस्य वारणाय तदिति योजना पक्षसा
ध्यवैशिष्ट्यावगाहित्वमेवान्यूनविषयकत्वं न तु पक्षतावच्छेदकवैशिष्ट्यांतर्भाव इत्यभिप्रायेणेदं प्रमेयाद्यन्य
त्ववानयं प्रमेयः प्रमेयादित्यादिवक्ष्यमाणहेतुवारणाय पक्षतावच्छेदकवैशिष्ट्यांतर्भाव आवश्यक इति तदंत

गदा० अ०
२७

भावाभिप्रायेणस्थलांतरेव्याप्तिमाह।यत्रचेतिपक्षेतिपक्षस्यताद्रूप्येणपक्षतावच्छेदकप्रकारेणदृष्टांततयायत्रोपन्या
सः तत्रोदाहरणस्यसाध्यस्यवाताद्रूप्येणसाध्यतावच्छेदकप्रकारेण हेतुतयायत्रोपन्यासः तत्रोपनयस्यवारणायतदित्य
र्थः रूपांतरेणपक्षसाध्ययोर्दृष्टांतहेतुत्वाभ्यामुपन्यासेदर्शितान्यूनविषयकत्वासंभवइतिताद्रूप्येणेति।ननुपक्षसा
ध्यनिश्चयदशायामेवतादृश[illegible]दृष्टांतहेतुत्वसंभवइतिसंशयाभावान्न्यायएवनसंभवतीत्यतआह।तादृशसिषा
धयिषयेतिजल्पस्थलेसंशयस्यावश्यकत्वेपिवादस्थलेनतथेतिसंशयमंतरेणापिअनुमित्साधीनानुमिति
निर्वाहायन्यायप्रयोगसंभवादितिभावः।ननुसिषाधयिषयान्यायप्रयोगोपगमेपंचम्यर्थहेतुत्वेयादृशसंबंधे
नप्रकृतार्थस्यान्वयस्तत्संबंधेनवन्हिसाध्यकहेतुत्वपक्षकवन्हिहेतुकन्यायांतर्गतहेत्ववयवेतिव्याप्तिर्दुर्वारैवेति
सिषाधयिषयान्यायप्रयोगेनांगीकर्तव्यइत्यतउक्तव्याप्तिर्नसंगच्छतइत्यतस्थलांतरमनुसरतियत्रचेतिपर्वत
त्वसामानाधिकरण्येनसाध्यसिद्धेर्यत्रोद्देश्यतातत्रैतत्पर्वतत्वेनापिदृष्टांततानसंभवतिएतत्पर्वतत्वेनसाध्यवत्ता
निश्चयस्यापितादृशानुमितिविरोधित्वादतःपर्वतत्वावच्छेदेनेतितत्रोदाहरणस्येतियद्यपिपर्वतत्वावच्छेदेनवन्हि

मस्त्वावगाहित्वामनुमितौपर्वतत्वव्यापकत्वस्यवन्ह्यंशेभानात्तादृशदृष्टांतघटितोदाहरणजन्यबोधेचतद्भाना
दस्यानुमितिन्यूनविषयकत्वमेवतथापिपक्षतावच्छेदकविशिष्टेसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वरूपं
निर्वाच्यमन्यूनविषयकत्वमस्त्वतमेवेतिभावः यद्यपिपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छेदकावच्छिन्न
वैशिष्ट्यावगाहित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयतानिवेशेउदाहरणैकदेशएवतादृशविषयता
नतुसमुदायइतिन्यायावयवत्वनिवेशनान्नातिव्याप्तिप्रसंगः तथापिप्रतिज्ञामात्राघटकत्वगर्भन्यायावयवत्वंप्रकृत
लक्षणेप्रविष्टं। तच्चयथायंपर्वतइत्युदाहरणैकदेशेपीत्याशयः अवच्छेदकावच्छेदेनसाध्यसाधकन्यायनिविष्टप्र
तिज्ञालक्षणेऽवच्छेदकावच्छेदेनसाध्यवैशिष्ट्यावगाहित्वरूपान्यूनविषयकत्वनिवेशनेनैतव्यावृत्तिसंगतिरिसप
रितोषेणव्यावृत्तंतरमाह। ससंतस्यवेति अयमाशयः एतल्लक्षणघटकन्यायावयवत्वशरीरेउभययघटकभागद्व
याघटितत्वंननिवेशनीयं अनतिरिक्तविषयकत्वविशेषणेनैवतादृशभागद्वयघटितसमुदायेतिप्रसंगवा
रणात् नचशब्दज्ञानस्यैवशब्दबोधजनकतयाजनकत्वमत्रजनकज्ञानविषयत्वमेववाच्यं। एवंचतादृशसमुदाय

गदा० अ०

२८

विषयकज्ञानमप्येकदेशप्रतिज्ञाविषयकत्वेन तथाविधबोधजनकमिति समुदायेतिप्रसंग इति वाच्यं। तादृशबोधज
नकतावच्छेदकीभूतयत्किंचिदेकज्ञानविषयितानिरूपकवर्णसमुदायत्वस्यैव विवक्षणीयत्वात्। न च तादृशवर्णसमु
दायत्वं तादृशवर्णत्वव्यापकसमुदायत्वं तादृशं च प्रतिज्ञाहेतुसमुदायत्वमपीति तत्समुदायेतिप्रसंग एवेति ता
दृशभागद्वयाघटितत्वमवश्यमेव निवेश्यमिति वाच्यं। अनतिरिक्तपदसार्थक्याय तादृशयत्किंचिज्ज्ञानविषय
ताशालिवर्णत्वसमनैयत्यमेव निवेश्यप्रतिज्ञाहेत्वादिसमुदायत्वस्य वारणीयत्वात्। समानार्थकप्रतिज्ञाद्वया
दिविषयकयत्किंचिज्ज्ञानविषयताश्रयवर्णत्वसमनैयत्यस्य तादृशप्रतिज्ञाद्वयादिपर्याप्तसमुदायत्वे सत्त्वे
ऽपि न क्षतिः तदुभयादावपि प्रतिज्ञाव्यवहारात्। अपि तु प्रतिज्ञैकदेशस्यापि तादृशबोधनिष्ठवह्निसंबंधिबुद्धि
त्वाद्यवच्छिन्नजन्यतानिरूपितजनकतावच्छेदकीभूतयत्किंचिदेकज्ञानविषयताश्रयवर्णसमुदायत्वमादाये
व प्रतिज्ञात्वप्रसंग इति प्रतिज्ञाद्यघटकत्वं प्रतिज्ञामात्राघटकत्वं वा निवेशनीयं। अन्यूनानतिरिक्तविषयकस्य
त्वबुद्धित्वस्य किंचिज्जन्यतानवच्छेदकतया तदवच्छिन्ननिरूपितजनकतानिवेशासंभवात्। इत्थं चाननुषंग

पक्षेप्ययं तस्माद्वन्हिमानितिभागे प्रतिज्ञाहेत्वंतर्भागेपि च व्यावृत्तिः संभवतीति अवयवाघटकेति नन्वतदुपादाने
पि धूमादालोकवान्पर्वतो वन्हिमानित्यादिप्रतिज्ञार्थमात्रविषयकबोधनिष्ठधूमविशेषितहेतुत्वविषयकशब्दत्वावच्छि
न्नकारणधूमादित्यादिहेतुविषयकज्ञानविषयतामादायावयवाघटके तादृशहेतावतिव्याप्तिवारणायानतिरिक्तवि
षयकबोधनिष्ठपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वरूपान्यूनविषयक
तावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकयत्किंचिज्ज्ञानीयविषयतानिरूपकवर्णसमुदायत्वनिवेशस्यावश्यकत
याऽवयवाघटकत्वनिवेशनं निष्प्रयोजनकमिति वाच्यं। तादृशहेतुवारणायावयवाघटकइत्यनेनावयवैकदेशमा
त्रविषयकज्ञाननिष्ठजनकताव्यावृत्तावयवत्वपर्याप्त्यवच्छेदकयत्किंचिद्धर्मव्यापकविषयताकान्यज्ञानवृत्तित्वाव
च्छिन्नभेदस्यैवान्यूनानतिरिक्तविषयकबोधजनकतायां विवक्षणीयत्वात्। अवयवत्वं चेह न्यायांतर्गतत्वविशेषण
शून्यं तेन प्रतिज्ञासमानाकारेदासीनवाक्यज्ञाने प्रतिज्ञाज्ञानीयकारणतायाः सत्वेपि तत्संग्रहः तादृशोदासीनवा
क्येपि तथाविधावयवत्वपर्याप्तेः वं [illegible] अवयवत्वघटकविशेष्यपरित्यागमात्रेण व्यावृत्तिः संगच्छत इति तात्

(निरुक्तभेदनिवेशे अन्यूनविषयकत्ववैयर्थ्यमत आह वस्तुतस्त्विति)

शजनकतापर्यंतनिवेशनेप्रतिज्ञाघटकत्वपरित्यागसंभवेपितत्परित्यागस्यप्रकृतानुपयुक्तत्वमित्येतल्लाभायैवावय
वाघटकेत्यभिहितमितिकेचित्तुयत्रप्रतिज्ञैकदेशस्यापिकथंचित्प्रतिज्ञासमानार्थकत्वंसंभवतितत्रैकदेशेतिप्रसंग
वारणायावयवाघटकत्वनिवेशनमावश्यकमित्याहुःतदसत्प्रतिज्ञाप्रतिपाद्यविशिष्टार्थप्रतिपादकतायाएकदेशे
संभवेपितन्मात्रस्यतथाविधबोधपरत्वाभावात्।तथात्वेसमुदायप्रयोगानुपपत्तेःकथंचित्प्रयोगेपिवैयर्थ्येनसमु
दायमंतर्भाव्यन्यायत्वानंगीकारात्।अप्रकृतार्थपरवाक्यवारणायचवास्तवतथाविधबोधतात्पर्यपरतायास्तल्लक्ष
णेऽवश्यंनिवेशनीयतयाएकदेशमात्रस्यतादृशार्थपरत्वाभावेनातिप्रसंगानवकाशादितिहेत्वंतस्येतिकथितान्यून
विषयकतावच्छिन्नजन्यतानिरूपितजनकतानिवेशनेतत्तद्वागप्रतिपाद्यविशिष्टार्थबोधजनकत्वमादायकेवलहेत्व
दावतिव्याप्तिर्नसंभवति।तादृशजनकताश्रययत्किंचिज्ज्ञानविषयवर्णसमुदायत्वस्यतत्रापर्यासेस्ततोहेतुमात्रनिग
मनमात्रेउपेक्षिते।अन्यूनानतिरिक्तविषयकेत्यस्यप्रकृतानुमितिविषयस्यान्यूनःसन्ननतिरिक्तोविषयायस्येतिव्युत्प
त्तेरनुमितिविषयनिष्ठभेदप्रतियोगितानवच्छेदकत्वेसत्यनुमितिविषयातिरिक्तावृत्तियद्विषयत्वंतत्त्वमितियथाश्रु

तार्थमाक्षिपति यद्यपीति यद्यपीति यद्यपि प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकप्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्य
कयत्किंचिदनुमितिविषयविषयकत्वं पर्वतो वह्निमानित्यादिप्रतिज्ञाजन्ये निखिलबोधानामेवेति तादृशानुमितिविष
यत्वसामान्याभावो विवक्षणीयः तथा च केवलाभिधेयत्वाद्यवच्छिन्नपक्षकस्थलेऽप्यतिरिक्ताप्रसिद्धिरस्त्येव तथाप्यप्रसि
द्धिं स्फुटीकर्तुमभिधेयत्वाद्यवच्छिन्नपक्षकप्रमेयत्वाद्यवच्छिन्नसाध्यकस्थले विश्वमेवानुमितिविषय इत्येतल्लाभाय स
र्वमित्युक्तं सर्वेभ्यो दर्शपौर्णमासावित्यत्रैव प्रक्रान्तकतिपयपदार्थमात्रवृत्तिसर्वत्वावच्छिन्नतात्पर्येणापि विशेष्यवा
चकपदान्तरासमभिव्याहृतसर्वपदप्रयोगसंभवात् सर्वं प्रमेयमित्युक्तावनुमितिविषयतायाः केवलान्वयित्वालाभा
दभिधेयमित्युक्तं एवं च किंचिद्धर्मावच्छिन्नांशे भेदेन स्वार्थविशेषणकबोधपरसर्वशब्दस्य तद्धर्मव्यापकविधेयव्याप्य
सर्वत्वबोधकताव्युत्पत्तेरभिधेयत्वव्यापकं सर्वत्वलाभान्नानुमितेः कतिपयवस्तुमात्रविषयकत्वशंकेति भावः। अति
रिक्ताप्रसिद्धिः प्रकृतानुमितिविषयातिरिक्ताप्रसिद्धिः प्रमेयत्वं पक्षनिष्ठाभावप्रतियोगि न वेति संशयसंभवेन तादृ
शप्रतिज्ञासंभव इत्यतस्तत्संग्रहायान्यूनानतिरिक्तविषयकत्वमन्यथा निर्वक्ति प्रकृतेति स्वविषयताव्यापकप्रकृतानु

मितिविषयताव्यापकविषयताकत्वमर्थः स्वविषयं अनुमितिविषयान्यूनत्वस्य स्वविषयत्वे तद्विषयताव्यापकत्वपर्यवसि
तत्वात्। स्वविषयेनुमितिविषयानतिरिक्तत्वस्य च तद्विषयत्वे स्वविषयताव्यापकत्वपर्यवसितत्वादिति भावः। यद्यपि स
मूहालंबनरूपपर्वतपक्षकवह्निविधेयकानुमितिविषयतायाः विश्ववृत्तितया पर्वतो वह्निमानिति प्रतिज्ञामात्रजन्य
बोधान तादृशानुमितिविषयतासमनियतविषयताकः वाक्यांतरसहिततज्जन्यसमूहालंबनबोधजनकयत्किंचि
ज्ज्ञानविषयवर्णसमुदायत्वं न तन्मात्रपर्याप्तं यत्किंचिल्लकृतानुमितिव्यक्तिविषयतासमनियतस्य विवक्षणेपि च नि
गमनाद्यतिव्याप्तिर्दुर्वारैव तज्जन्यबोधस्यापि पर्वतो वह्निमान् धूमज्ञानज्ञाप्यवह्निमांश्चेत्याकारकसमूहालंबना
नुमितिविषयतासमनियतविषयताकत्वात्। तथापि प्रकृतपक्षकप्रकृतसाध्यव्याप्यवत्तापरामर्शत्वावच्छिन्नज
नकतानिरूपितजन्यतावच्छेदकविषयतात्वेन यद्विषयतासमनैयत्यं तत्त्वस्य विवक्षितत्वान्न दोषः। नन्वेवं सत्क
स्थलीयोपनयेतिव्याप्तिः तज्जन्यबोधस्यापि विश्वविषयकत्वे न तथाविधानुमितिविषयतासमनियतविषयता
कत्वादिसत्वात्। विषयपदस्य प्रकारपरताभिप्रायेणान्यथा तदर्थानिर्वक्तिप्रकृतेति तादृशोपनयजन्यबोधे प्रकाः

रीभवतोऽभाववादेस्तादृशानुमितावप्रकारत्वान्नतत्प्रकारतायाः समनैयत्यमिति नातिव्याप्तिरिति भावः। सकलेति स
कलाभिधेयवृत्तिधर्मवदिदं द्रव्यमिति योजनातादृशानुमितौ विवएतत्स्थलीयोपनयजन्यबोधे विशेष्यस्यैवाभिधेय
त्वेन प्रकारतया तत्प्रकारतायाः समनैयत्यमक्षतमेवेति भवत्यतिव्याप्तिरिति भावः। ननु विशेषणानवच्छिन्नप्रकार
तानां समनैयत्यं विवक्षणीयमतो नातिव्याप्तिः उपनयजन्यबोधे भाववत्त्वादौ तादृशप्रकारतासत्त्वादुक्तानुमितेस्ता
दृशप्रकारतायाश्च तत्रासत्त्वादित्यतो अनुमितावपि तेषां तथाविधप्रकारताघटनाय स्थलान्तरे ऽतिव्याप्तिमाह सक
लाभिधेयेति अत्राभावत्वप्रतियोगित्वादीनां स्वरूपतः पक्षतावच्छेदकत्वाद्भवति तथानुमितिरिति भावः द्रव्य
मिति विपरीतकोटिप्रसिद्ध्यर्थं विशिष्टपक्षबाधक इति उपनयस्येदं पदेन विशेष्यमात्रपरामर्शेन्यूनविषयकत्वं
न संभवतीति भ्रमनिराकरणाय व्याप्तिशरीरे साधनसाध्यप्रकारेणैव तदधिकरणान्तर्भावः न त्वधिकरणत्वेना
पीत्यनुमितौ तस्य तत्त्वस्य वा स्वरूपतः प्रकारत्वविरहेपि नासंगतिः हेतुरप्यत्रेदं तत्त्वं समवायेन द्रव्यमेव वा बाध्यं गु
णादेस्तथात्वे हेतुतावच्छेदकगुणत्वादेः स्वरूपत उपनयजन्यबोधे भाने कथितप्रकारतासमनैयत्यानुपपत्तेः। न

चाभेदेन विषयतासमनैयत्योक्तो अनुमितिविषयतासमनियतस्वविषयतात्वकत्वोक्तौ वा नायं दोष इति वाच्यं। हेत्वर्थघटितार्थकप्रतिज्ञाघटितन्यायांतर्गतहेतुजन्यबोधविषयतायां अनुमितिनिरूपितविषयतात्वाभावात्। अनुमितिविषयतात्वव्याप्यस्वविषयतात्वकत्वाभावादेवतादृशबोधवारणसंभवेनान्यूनविषयकत्वांशवैयर्थ्यापत्तेः नहि साध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टप्रकृतपक्षतावच्छेदकावच्छिन्नविषयताबहिर्भूतविषयता अनुमितिनिरूपिता समूहालंबनानुमितिनिरूपितत्वमादायनातिप्रसंगावकाशः प्रकृतपरामर्शजन्यतावच्छेदकविषयतात्वस्यैव निवेशनीयत्वात्। अन्यथासंभवापातादिति उपनयविशेषातिव्याप्त्यभिधानं चोपलक्षणपरं अन्यूनविषयकेयकेत्यस्य निरुक्तार्थकत्वे सर्वस्मात्कालत्ववानयं कालपरिमाणवान् सर्वस्मादित्यत्र हेत्ववयवेप्यतिव्याप्तिर्बोध्या तज्जन्यबोधविषयतायाः विश्ववृत्तित्वेनानुमितिविषयताव्यापकत्वात्। एवं तादृशान्यूनविषयकत्वस्य किंचिज्जन्यतानवच्छेदकत्वेन तदवच्छिन्नजन्यताविवक्षणासंभवेन प्रतिज्ञाहेतुजन्यसमूहालंबनबोधमादाय तन्निष्ठहेत्वर्थविषयकत्वावच्छिन्नजन्यतानिरूपितजनकताश्रये धूमादालोकवान् पर्वतो वन्हिमान् धूमादित्यादौ हेत्ववयवे तिव्याप्तिर्दुर्वारा तत्स्या अनवच्छि

न्नप्रकारताव्यापकतादृशप्रकारताकत्वविवक्षयापिवारणसंभवादित्यपिबोध्यं।एतद्दोषवारणायप्रथममतोनुमितस्यून
विषयकत्वमन्यथानिर्वक्तितथापीत्यादिग्रंथकृतेति एतच्चपक्षतावच्छेदकविशिष्टार्थकंतदनुपादानेप्रमेयाद्घटान्यत्ववानयंप्र
मेयः प्रमेयादित्यादौहेत्ववयवेयत्किंचिद्धर्मावच्छिन्नत्वोपादानेपिघटान्यत्ववद्रूपघटान्यतरस्माद्घटान्यत्ववत्त्वधर्मोघटोघ
टान्यत्ववानित्याकारिकायासामानाधिकरण्यसंबंधेनघटान्यत्वसाध्यकप्रतिज्ञातद्घटितन्यायांतर्गतेरूपघटान्यतरत्वाव
च्छिन्नांशेसामानाधिकरण्यसंबंधेनविशेषणतापन्नघटान्यत्वघटिततादृशसंबंधावच्छिन्नहेतुताकविशिष्टान्यतररूपहेतु
प्रतिपादकहेत्ववयवेतिव्याप्तिः घटत्वादौसामानाधिकरण्यसंबंधेनरूपवतिव्यभिचारवारकतयाघटान्यत्वात्मकविशेष
णस्यधर्मिभेदेनविशेष्यस्यघटान्यत्वसमानाधिकरणसत्तासमानाधिकरणघटरूपादौव्यभिचारवारकतयाविशेष्यताव
च्छेदकस्यसार्थकत्वमितिसंक्षेपः।सामानाधिकरण्यसंबंधस्यवृत्त्यनियामकतयाव्यापकत्वाघटकत्वेपिनिसद्व्यावृत्तिधर्मशू
न्यत्वान्निरवयवंगगनंनिसंनिसद्व्यावृत्तिधर्मशून्यत्वात्।वन्हिमत्सर्वतावृत्तिधर्मशून्यत्वादालोकवान्पर्वतोवन्हिमान्व
न्हिमत्सर्वतावृत्तिधर्मशून्यत्वादित्यादौहेत्ववयवेतिव्याप्तिवारणायपक्षतावच्छेदकवैशिष्ट्यनिवेशनमावश्यकंअखंडाभाव

घटकतयाहेतुघटकद्रव्यत्वपर्वतत्वादीनामवैयर्थ्यं साध्यतावच्छेदकविशिष्टसाध्यनिवेशप्रयोजनमाह पंचम्यर्थेति।
हेतुत्वे प्रमेयाद्युच्चत्वप्रमेयादित्यादौ हेतुजन्यबोधस्य विभक्त्यर्थहेतुत्वे प्रमेयाद्यात्मकप्रकृत्यर्थवैशिष्ट्यावगाहित्वे
पि प्रकृतसाध्यतावच्छेदकविशिष्टवैशिष्ट्यानवगाहित्वान्नातिव्याप्तिरित्यर्थः। पक्षतावच्छेदकावच्छिन्नविशेष्यतानि
रूपितसाध्यतावच्छेदकावच्छिन्नप्रकारताकत्वमेव पर्यवसितार्थः। संबंधविशेषश्चैतद्दले न प्रवेश्यः प्रयोजनविर
हाद[illegible]तिः पंचम्यर्थे प्रकृत्यर्थस्य यादृशसंबंधेनान्वयस्तस्य वृत्त्यनियामकतया व्यापकताघटकत्वेपि नैतद्व्यावृत्त्य
संगतिः। यदि च जन्यग्रहविषयत्वरूपपंचम्यर्थैकदेशजन्यत्वे प्रकृत्यर्थस्य हेतुज्ञानस्यान्वयः न तु परंपरासंबंधे
न तादृशविषयत्वे तदाजन्यत्वपक्षकोक्तसाध्यहेतुकस्थलव्यावृत्तिर्बोध्यं पक्षमुख्यविशेष्यकत्वपर्यंतानिवेशात्
न तु तादृशविषयत्वत्वावच्छिन्नपक्षकस्थले हेतुजन्यबोधस्य तादृशविशिष्टपक्षे इतरवैशिष्ट्यानवगाहित्वात्। (साध्य)
तादृशविषयताविलक्षणेति साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्ष
तावच्छेदकावच्छिन्नविषयताविलक्षणेत्यर्थकमते हि लक्षणत्वं च न तद्भिन्नत्वे प्रतिज्ञाजन्यबोधीयसाध्यादिवि

भिन्न द

षयतायास्तद्भिन्नत्वेनासंभवापातात्तादृशविषयतानिमुख्यविशेष्यताशून्यत्वनिवेशेनासंभववारणेपि निगमनाति
व्याप्तिताद्वस्थ्यात्। अन्यूनविषयकत्वं लिंगैवेयर्थ्याच्च धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यादौ हेत्ववयवजन्य
बोधीयहेतुत्वनिष्ठमुख्यविशेष्यतायास्तादृशविषयताभिन्नत्वात्। एतेन तादृशविशिष्टविषयतानंतःपातित्वं प्रकृ
तपरामर्शजन्यतानवच्छेदकत्वं वा तद्दिशपि निरस्तं उक्तस्थले आलोकांशे हेतुत्वप्रकारताया एव तादृशविष
यतांतःपातित्वात् प्रकृतपरामर्शजन्यतावच्छेदकत्वाच्च। हेतुजन्यबोधीयतद्विषयताया अतथात्वात्। न चैतत्थाविध
विषयतावच्छेदककोट्यप्रविष्टधर्मावच्छिन्नविषयताशून्यत्वनिवेशान्नदोष इति साधु यत्न प्रमेयसामान्यस्य प
क्षतावच्छेदकादिघटकतातत्र तादृशविषयतावच्छेदककोट्यप्रविष्टाप्रसिद्धेः विलक्षणावच्छेदकतानिवेशेपि द्र
व्यमाप्य धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यादिन्यायांतर्गतनिगमनादावतिव्याप्तिस्तज्जन्यबोधवि
षयतावच्छेदकधूमत्वादेस्तादृशविषयतावच्छेदककोटिप्रविष्टत्वनियमात् अपितु तादृशविषयताशून्यत्वनि
श्चयत्वावच्छिन्नानिवर्त्यसंशयनिवर्तकतावच्छेदकत्वमेवतत्। निगमनादिजन्यबोधीयज्ञानज्ञाप्यत्वादिविष

यत्तयास्तादृशनिश्चयत्वावच्छिन्नानिवर्त्यज्ञानज्ञाप्यत्वादिसंशयनिवर्तकतावच्छेदकतयातद्वारणं उक्तहेत्ववयवज
न्यबोधनिवर्त्यस्यहेतुत्वं धूमीयं नवेत्यादिसंशयस्यधूमादिज्ञानज्ञाप्यत्वादिघटितपक्षतावच्छेदकावच्छिन्नपक्ष
कसाध्यतावच्छेदकावच्छिन्नप्रकारकनिश्चयनिवर्त्यत्वतयातादृशबोधविषयतायानतथाविधविषयताविलक्ष
णत्वेसत्यन्यूनपदस्यव्यावृत्तिसंगतिः सर्वेषामेवसंशयानांस्वविरोधिविषयकतथाविधविषयताशालिसमूहा
लंबननिश्चयनिवर्तनीयतयातादृशनिश्चयानिवर्त्यसंशयाप्रसिद्धिरतस्तादृशनिश्चयत्वावच्छिन्नेतिद्रष्टव्यं अ
धिकमवगाहमानेपिनिगमनजन्यबोधसाध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टपक्षतावच्छेदकावच्छिन्नपक्ष
विषयकत्वस्यासत्त्वतयाधूमज्ञानज्ञाप्यत्वादिसंशयस्यतादृशविषयताशालिनिश्चयानिवर्त्यत्वानुपपत्ति
रिसपिसमाहितं अवच्छिन्नत्वं चात्यूनवृत्तित्वं व्यापकत्वपर्यवसितं अतोज्ञानज्ञाप्यत्वं धूमीयंनवेतिसंशयनि
वृत्तिप्रतिबंधकतायांधूमज्ञानज्ञाप्यत्वातिरिक्तप्रतिज्ञाप्रतिपाद्यभागविषयताविघटितधर्मस्यस्वरूप
संबंधरूपावच्छेदकत्वविरहेपिनान्यूनपदव्यावृत्यसंगतिः।अप्रामाण्यज्ञानास्कंदितस्यनिगमनादिजन्यबो

(स्वपदस्य बोधपरत्वे प्रतिज्ञाजन्यबोधसमूहालंबनबोधं वादाय हेतावति व्याप्तेर्दुर्जन्यत्वतात्पर्यं वाच्यं इत्थं च हेतुविषयकवाच्छिन्नजन्यताश्रवंतदवच्छेदकसाध्यादिविषयताया अप्रसिद्धत्वात् किं तु स
ध्यादिविषयकवाच्छिन्नजन्यताधृतातदवच्छेदकविषयताशालिनिश्चयमादाय लक्षणसमन्वयः कर्तव्यः)५

निश्चया

धस्य संशयाप्रतिबंधकतया तज्जनकत्वमादायातिप्रसंगस्य वारणाय तादृशसंशयानिवर्तकत्वमुपेक्ष्य तन्निव
र्तकतावच्छेदकतावच्छेदकविषयताश्रयत्वेन बोधो विशेषितः पक्षतावच्छेदकाद्यनिवेशे तदनवच्छिन्नपक्षा
दिविषयताशालिनिश्चयसमुदायस्य कमपि संशयं प्रत्यप्रतिबंधकतया तादृशनिवर्त्यप्रसिद्धिरतस्तन्निवे संशया
श इति इत्थं चानतिरिक्तविषयकत्वघटकसाध्यतावच्छेदकावच्छिन्नसाध्यविशिष्टपक्षतावच्छेदकावच्छिन्न
विषयितायां स्वनिष्ठत्वनिवेशेनैव न्यूनविषयकदर्शितहेतुजन्यबोधवारणसंभवे रथगत्यूनविषयकत्ववि
शेषणमनर्थकमित्यपि समाहितं तादृशविषयितायां स्वनिष्ठत्वविशेषणे निगमनादिजन्यबोधस्य ज्ञान
ज्ञाप्यत्वविशेषितसाध्यविशिष्टपक्षविषयता[illegible]शालित्व
नियमात्स्वनिष्ठनिरुक्तविषयिताशालि निश्चयत्वव्यापकप्रतिबंधकताकज्ञानज्ञाप्यत्वादिसंशयान्यसंशया
प्रतिबंधकतयानतिरिक्तविषयताकत्वापत्तेर्दुर्वारत्वात्तत्संतस्य न्यायावयवत्वमर्थः। निगमने च पक्षवाच
कपदमनुपसतइनितद्वारणमनतिरिक्तपदप्रयोजनमिति मतमनुसृत्य लघुशरीरमनतिरिक्तविषयकत्वंनि

वैक्तिपकेनेति प्रकृतहेतुकायाप्रकृतसाध्यसिद्ध्यौपयिकीव्याप्तिस्तद्विषयकत्वमित्यर्थः। यद्रूपावच्छिन्नविशेषितप्र
कृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टप्रकृतपक्षतावच्छेदकावच्छिन्नविषयकनिश्चयत्वं प्रकृतसाध्यतावच्छेदका
वच्छिन्नसाध्यकानुमितिजनकतानतिरिक्तवृत्ति तद्रूपावच्छिन्नविषयकत्वमिति तु पर्यवसितं तादृशं रूपं तद्धेतु
तावच्छेदकावच्छिन्नतद्धेतुव्यापकप्रकृतसाध्यसामानाधिकरण्यत्वं तत्तत्साध्यतावच्छेदकावच्छिन्नसाध्याभाव
व्यापकाभावप्रतियोगितात्वं च निगमनस्य तत्तदस्यान्वव्याप्तिपक्षधर्मताविशिष्टहेतुपरतया तज्जन्यबोधस्य
तादृशरूपावच्छिन्नविषयकत्वान्नातिव्याप्तिः अन्वयव्यतिरेकव्याप्त्योर्विशिष्यैकतरनिवेशेऽन्वयिनि व्यतिरे
किणि वा निगमनेनेति व्याप्तिरिति निरुक्तरूपावच्छिन्नत्वेन द्वयोरनुगमः यदि च यत्तत्त्वयोर्निवेशान्नानुगम
संभव इति विभाव्यते। तदाऽभावद्वयमेव बाधे निवेशनीयं एतल्लाभायैव चौपयिकांतमिति ध्येयं यच्चापु
दाहरणजन्यबोधस्य न निरुक्तरूपावच्छिन्नविषयकत्वं तथापि सिषाधयिषाधीनन्यायप्रयोगानुपगमेन
तत्र पक्षतावच्छेदकविशिष्टसाध्यतावच्छेदकविशिष्टवैशिष्ट्यावगाहित्वरूपान्यूनविषयकत्वविरहादेव नाति

प्रसंगःहेत्वंतभागेचसत्संताभावान्नातिव्याप्तिरित्यवधेयंवह्निव्याप्तिविशिष्टस्यालोकस्यपर्वतत्वावच्छिन्नविशेषणत्वे
तद्विशिष्टेपिपर्वतेतद्वृत्तेरर्थतोलाभेनार्थतस्तत्रप्रकृतपक्षेप्रकृतसाध्यगमकतालाभान्नहेत्वंशेयथाभिधानप्रयोजनाको
कांक्षावसरइत्यतःसधर्मेतितस्याःप्रतिज्ञायाःनन्वेवमपियत्रप्रकृतहेतुकप्रकृतसाध्यकव्याप्तिरेवांतर्भवति।पक्षगर्भेतत्र
सप्रतिज्ञायाअसंग्रहइत्याशंकांपरिहरतिवह्नीतिविशिष्टपक्षेतिपक्षतावच्छेदकविशिष्टपक्षइत्यर्थः।तादृशव्याप्ती
तिप्रकृतहेतुकप्रकृतसाध्यसिद्ध्योपयिकव्याप्तीत्यर्थः।उदाहरणेति।यद्यपिदर्शितस्थलेविशिष्टपक्षोपस्थापकपदा
त्प्रकृतहेतौविशिष्टपक्षवृत्तित्वस्याप्यर्थतःप्रतीत्योपनयादिप्रयोजनकाकांक्षायाअप्यनवकाशःतथापिधूमवत्वस्था
ति
नेधूमवत्साधर्म्येनिवेशेतस्याःसंभवइतिउदाहरणमात्रोपादानंअन्यथाआकांक्षाविरहेप्यभिधानेअतिप्रसंगा
त्हेतुद्वयादेरप्यभिधानप्रसंगात्।अत्रापिअनाकांक्षितानभिधानादेवएकदाएकन्यायप्रयोगदशायांउभयव्या
प्तीतिअन्वयव्याप्तिव्यतिरेकव्याप्तिद्वयेत्यर्थः।व्याप्तिद्वयस्यक्रमेणैवाभिधातुंशक्यतयाप्रथमोपन्यस्तव्याप्तिप्रतीत्यै
वसमीहितनिर्वाहेणव्याप्त्यंतराकांक्षानुदयादितिभावः।एतेनान्वयव्यतिरेक्युदाहरणाकांक्षापहितान्वयव्यतिरेकि

हेतुलक्षणानंतरमपरतल्लक्षणमभिधास्यतो मणिकारस्य प्रथमलक्षणनिर्भरबीजमाविष्कृतं अत एवेदृशातिप्रसं
गस्य पृथगभिधानं वन्ह्यादिसाध्यकप्रतिज्ञायामव्याप्त्या यथोपवर्णितलक्षणमाक्षिपति यद्यपीति अत्र चासंभवाभा
वमाविष्कर्तुं कतिपयप्रतिज्ञाजन्यबोधस्य यथोपवर्णितानुमित्यूनानतिरिक्तविषयकत्वं व्यवस्थापयति मैत्र इत्या
दिना। अयं गौरित्यत्र गोत्वस्य साध्यत्वे पक्षे साध्यतावच्छेदकगोत्वत्वविशिष्टप्रकारकज्ञानजनकतासंभवादाह। ता
दात्म्येन गौरिति ननु भवतु गौः साध्यकप्रतिज्ञा तादृशी तथापि यदि समवायेन गोत्वस्य साध्यत्वेपि तथाविधप्रतिज्ञासंप्रदा
यानुमता तदा तत्साध्यकतादृश प्रतिज्ञाया दर्शितबोधजनकतासंभवात्सामान्यतस्तथाकारप्रतिज्ञायास्तथात्वाभिधानम
संगतमित्याशंकायां तस्या गोत्वादिसाध्यकत्वं निराकरोति गोत्वत्वाद्यनुपस्थित्येति तादृशप्रतिज्ञावाक्यादित्यादिः अत्रे
ति शेषः अनुपपत्तेरिति प्रतिज्ञायाः साध्यतावच्छेदकोपस्थापकत्वनियमादन्यथामुसंदरवन्हित्वावच्छिन्नसाध्यक
स्थलेपि वन्हिमानित्याकारकप्रतिज्ञाप्रसंगादिति भावः। यद्यपि समवायेन रक्तत्वविशिष्टदंडावच्छिन्नसाध्यकरक्तदं
डिमानित्यादिप्रतिज्ञाया न रक्तत्वविशिष्टसाध्यतावच्छेदकबोधकत्वसंभवः तथापि तत्र साध्यतावच्छेदकघटक

सकलपदार्थानामेव विशकलितानां तादृशप्रतिज्ञावाक्यादुपस्थितेस्तदधीनसाध्यतावच्छेदकविशिष्टसाध्यविषय
कमानसबोधेनापि तत्र विशिष्टसाध्यसंशयप्रयोज्यजिज्ञासाविषयत्वसिद्धिसंभवः प्रकृते तु विशकलितानामपि गोत
त्वादिघटकपदार्थानां नोपस्थितिरिति विशेषः। गोत्वादेः साध्यत्वे दोषांतरमाह। पदार्थेति। जातेः पदार्थतावच्छेदकत्वं
पदार्थांतरान्वयित्वासंभवे योजकत्वेनाभिहितं इदमुपलक्षणं। अन्वयितावच्छेदकरूपेणानुपस्थितत्वमपि तथा बो
ध्यं। ननु पर्वतो वह्निमानित्याद्याकारकप्रतिज्ञानं वह्निसाध्यकं अपि त्वभेदेन वह्निमत्साध्यकमेव तथा च तज्जन्यबो
धविषयिता या अभेदेन वह्निमत्साध्यकानुमितिविषयिता तातो न वैलक्षण्यमतो न तत्राव्याप्त्यवकाश इत्यत आह।
तथैवेति तादृशप्रतिज्ञाया वह्निसाध्यकत्वेनैव समर्थः। इत्युपनयसंगमात्। इत्याकारस्योपनयस्य तादृशप्रतिज्ञाघटि
तन्यायांतर्गतत्वोपपत्तेः। वह्निमतः साध्यत्वे वह्निमद्व्याप्यवानित्याकारस्यैवोपनयस्य संभवादिति भावः। शाब्द
ज्ञाने वह्निमानित्यादृशवाक्यजन्यज्ञाने अभेद इति भासत इत्यनुषज्यते न तु वह्नेः संयोग इति शेषः। नामार्थयो
र्भेदान्वयस्याव्युत्पन्नत्वादिति हृदयं। तथा च तादृशप्रतिज्ञाजन्यबोधे निरुक्तमन्यूनविषयकत्वमनतिरिक्तविषय

गरा० अ०

३६

कतंचन संभवतीति भावः। भेदे रूपे प्रति[योगि] विशेषिते वा साध्ये इत्यादौ इत्यादिप्रतिज्ञायां आदिपदादितरेभ्यो भिद्यते। इत
र भिन्नमित्यादिपरिग्रहः वैलक्षण्यं अनुमितिविलक्षणबोधजनकत्वं भेदसाध्यकानुमितौ भेदस्यानुयोगितया इ
तरावच्छिन्नभेदसाध्यकानुमितावनुयोगितया। इतरविशेषितस्य तस्य विशेषणतया विशेषणेन भिद्यत इति प्रतिज्ञाज
न्ये च बोधे। आख्यातांतोपस्थाप्यस्य भेदाश्रयत्वस्य इतरेभ्यो भिद्यत इत्यादिना जन्ये च पंचम्यंतार्थेतरप्रतियोगिक
त्व विशेषितभेदाश्रयत्वस्य तेन संबंधेन भिन्नमित्यादिजन्ये च निष्ठांतोपस्थाप्यस्य भेदाश्रयत्वावच्छिन्नस्य इतरे
भ्यो भिन्नमित्यादिजन्ये च इतरप्रतियोगिकत्व विशेषितभेदाश्रयत्वावच्छिन्नस्य इतरभिन्नमित्यादिजन्ये चाभेदेने
तरप्रतियोगिकविशेषितभेदाश्रयत्वावच्छिन्नस्य इतरेभ्योऽन्य इत्यादिजन्ये चेतरप्रतियोगिकत्वविशेषितभेदा
श्रयत्वावच्छिन्नस्येतरान्य इत्यादिजन्ये चाभेदेनेतरप्रतियोगिकविशेषितभेदावच्छिन्नस्याभेदेन पक्षांशे विशे

बोध

षणत्वादिति अनुमितेस्तादृशं वैलक्षण्यादिति भावः। इदमुपलक्षणं इत्यादिना प्रकृते विधेयांशे भान इवो
देश्यतावच्छेदकांशे भानेपि वैलक्षण्यमवसेयं गंधाद्यवच्छिन्नपक्षकानुमितौ गंधादेः साक्षाद्विधेयधर्मिता

वच्छेदकत्वाद्वंधवतीइतरेभ्योभिद्यतइत्याकारकतादृशप्रतिज्ञाजन्यबोधेव्यगंधादिसंबंधस्यैवतथात्वादितिउद्देश्यानुमि
तिपदस्ययादृशविशिष्टार्थबोधःप्रतिज्ञयाजन्यतेतादृशविशिष्टार्थबोधपरत्वमभिप्रेत्यसमाधत्तेयादृशेतियादृश
रूपावच्छिन्नपक्षकयादृशरूपावच्छिन्नसाध्यकसंप्रदायसिद्धप्रतिज्ञायादृशरूपावच्छिन्नपक्षेयादृशरूपावच्छिन्नप्रका
रकबोधजनिकास्तादृशरूपावच्छिन्नेतादृशरूपावच्छिन्नप्रकारकबोधानिवर्त्यसंशयानिवर्त्तकतादृशबोधान्यतम
बोधजनकत्वेसतितादृशरूपावच्छिन्नपक्षकतादृशरूपावच्छिन्नसाध्यकत्वायांतर्गतत्वंप्रतिज्ञात्वमित्यर्थःअत्रच
जनिकसंतंबोधविशेषपरिच्छायकमात्रंनतुतदर्थस्यलक्षणेनिवेशःबाधाश्रविषयविशेषान्निवेश्यविशिष्यैवो
पादेयाःअतोनात्माश्रयशंकावकाशःएवंचप्रतिज्ञाप्रतिपाद्यविशिष्टार्थानामननुगमेनेकधर्मावच्छिन्नपक्षसा
ध्यकनिखिलप्रतिज्ञासाधारणमपिप्रतिज्ञात्वंनेकंसंभवतीतिबाधानामन्यतमत्वेनानुगमस्तेनरूपेणजनक
तांशएवबोधेमांविशेषणतानतुनिवर्त्यत्वांशेपीतिबाधानामननुगमेपितादृशतादृशनिवर्त्यत्वाभावकूट
घटितधर्मस्यानुगतत्वात्तादृशबोधभेदकूटवद्भिन्नत्वरूपान्यतमत्ववन्निवर्त्यत्वसामान्याभावस्थलेतादृशता।

दृशबोधनिवर्त्यत्वाभावकूटस्यैवलाघवेननिवेशयितुमुचितत्वात्। एवंचतादृशाभावकूटनिवेशे सूचनीयेवान्यत
मेनापीसक्तं एतेन सामान्याभावनिवेशसूचनायापिकार इतिव्याख्यानमनादेयं विशेष्यदलेऽन्यतमत्वनिवेशनम
पिमन्त्रप्रतिज्ञार्थानांनानाविधत्वं तत्रैवपर्वतादिपक्षकवन्ह्यादिसाध्यकस्थलेपर्वतादौवन्ह्यादिमदभेदरूपैकवि
धबाधस्यैवप्रतिज्ञयाजननान्न तत्रतन्निवेशः एतेनैकमादायान्यतमत्वस्यासंभवेपिनक्षतिः।शब्दाभेदस्याप्यप्रयो
जकत्वात वन्हित्वावच्छिन्नसाध्यकप्रतिज्ञया घटवद्भूतलादिघटितधर्मावच्छिन्नविशेष्यकः पर्वतत्वावच्छिन्नपक्षकप्र
तिज्ञयाचतादृशधर्मावच्छिन्नप्रकारकोपिबाधोजन्यतेतन्निवर्त्यश्च भूतलंघटवन्नवेत्यादिसंशयोपीति प्रतिज्ञायां
प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षकत्वस्यप्रकृतसाध्यतावच्छेदकावच्छिन्नसाध्यकत्वस्यचानुपादानेतावद्बोधा
निवर्त्यसंशयाप्रसिद्धिरतस्तदुपादानं यत्किंचिद्रूपावच्छिन्नपक्षसाध्यकप्रतिज्ञाप्रतिपाद्यविशिष्टार्थबोधजनकस
स्यय त्किंचिद्रूपावच्छिन्नपक्षसाध्यकन्यायांतर्गतत्वस्यनिवेशनेतिप्रसंगः प्रागुपदर्शितएवेतियादृशरूपावच्छिन्न
पक्षसाध्यकप्रतिज्ञाप्रतिपाद्यविशिष्टार्थबोधानिवर्त्यसंशयानिवर्तकबोधजनकत्वंतादृशरूपावच्छिन्नपक्ष

तावद्बोधान्यतम

साध्यकन्यायांतर्गतत्वं निवेशितं अधिकं त्विसादिन्यायेन साध्यांशे हेतुज्ञानज्ञाप्यत्वमवगाहमानेपि निगमनादिजन्यबोधे
प्रतिज्ञाप्रतिपाद्यविशिष्टार्थविषयकत्वस्याक्षततया निगमनाद्यतिव्याप्तिवारणाय तद्रूपावच्छिन्नविशेष्यकतद्रूपावच्छि
न्नप्रकारकबोधानिवर्त्यसंशयानिवर्तकत्वरूपतादृशबोधानतिरिक्तविषयकत्वं बोधविशेषणं इत्थं च प्रतिज्ञाजन्यबो
धानिवर्त्यस्य वन्हिधूमज्ञानज्ञाप्यो न वे त्यादिसंशयस्य निवर्तकतया तादृशबोधवारणं न च प्रतिज्ञाजन्यबोध
स्य पर्वतत्वाद्यवच्छिन्नविशेष्यकवन्हिमत्वाद्यवच्छिन्नप्रकारकबोधत्वेनैवोपादेयतया निगमनादिजन्यबोधस्या
पि तथात्वात्तन्निवर्त्यत्वं उक्तसंशयस्याक्षतमेवेति वाच्यं। अप्रामाण्यज्ञानानास्कंदिततादृशविशिष्टार्थविषयकनि
श्चयत्वावच्छिन्नानिवर्त्यत्वस्यैव निवेशनीयत्वादुक्तसंशयस्य धूमज्ञानज्ञाप्यत्वविषयकवन्हिमत्पर्वतनिश्चयानिव
र्त्यत्वेन तथाविधनिश्चयत्वावच्छिन्नानिवर्त्यत्वाक्षतेः एतेन सर्वेषामेव संशयानां वन्हिमत्पर्वतादिविषयकसमू
हालंबनात्मकस्वविरोधिनिश्चयनिवर्तनीयतया तादृशबोधानिवर्त्यसंशयाप्रसिद्धिरित्यपि निरस्तं तादृशनिश्च
यत्वनिष्ठनिवर्तकतावच्छेदकत्वं च न स्वरूपसंबंधविशेषः किंत्वनतिरिक्तवृत्तित्वं तेन संबंधीवन्हिमान्बेसाकारके

कदेशसंशयंप्रतिवन्हिसंबंध्यभिन्नपर्वतादिनिश्चयत्वेनाप्रतिबंधकत्वेपितादृशसंशयनिवर्तकप्रतिज्ञाजन्यबोधस्यना
संग्रहः अतएव धूमादालोकवान्पर्वतोवन्हिमान्धूमादित्यादौ हेतुजन्यबोधनिवर्त्यहेतुत्वंधूमीयंनवेतिसंशयंप्रतिप्र
तिज्ञाप्रतिपाद्यविशिष्टार्थविशेषविषयकनिश्चयत्वेनाप्रतिबंधकत्वेपिनविशेष्यदलवैयर्थ्यम् वन्हिमत्वावछिन्न
प्रकारकनिश्चयत्वावछिन्ननिवर्त्यस्यपर्वतत्वाद्यवछिन्नविशेष्यकनिश्चयत्वावछिन्ननिवर्त्यस्यचाप्रसिद्धिरतोविशेष्य
विशेष्यप्रकारोभयनिवेशनंयद्यप्यत्रप्रतिज्ञाप्रतिपाद्यस्यविधेयविशिष्टधर्मिणएवयादृशविशिष्टार्थेस्योपादान
संभवइतियादृशविशिष्टार्थबोधिकाइत्यपदस्यविशेष्यप्रकारयोः खंडशउपादानसूचनायपक्षेयादृशविशिष्टार्थ
वत्वबोधिकाइत्यभिधानमनुचितंतथापिधूमादालोकवान्पर्वतोवन्हिमान्धूमादित्यादौप्रतिज्ञार्थहेत्वर्थविषय
कसमूहालंबनबोधजनकेहेत्वंतेहेतोर्वान्यायावयवत्वंपरित्यज्यन्यायांतर्गतत्वनिवेशनपक्षेप्रतिज्ञाजन्यबोध
निष्ठएकदेशविषयकबुद्धित्वावछिन्नजन्यतानिरूपितजनकतामादायैकदेशेचातिप्रसंगवारणायविशिष्टार्थ
विषयकबुद्धित्वावछिन्नजन्यताप्रतियोगिकजनकत्वनिवेशेपर्वतोवन्हिमानित्यादिप्रतिज्ञायाअसंग्रहः वन्ह्यादिभू

न्यपर्वतादौ वह्निमत्ताद्यवगाहिभिन्नमात्मकशाब्दबोधसाधारण्यानुरोधेन तत्तत्पदार्थानां परस्परमुपश्लेषावगाहित्व
स्यैव तादृशप्रतिज्ञाजन्यतावच्छेदकत्वोपगमात् तत्तद्विशिष्टार्थविषयकत्वस्य तथात्वादिति अनतिरिक्तविषयकबो
धनिष्ठतादृशपरस्परोपश्लेषावगाहित्वावच्छिन्नजन्यताप्रतियोगिकजनकताया निवेशसूचनाय तथाभिधानं ता
दृशपरस्परोपश्लेषावगाहिशाब्दत्वजन्यतावच्छेदकतापर्याप्त्य निवेशान्नानतिरिक्तविषयकत्वदलवैयर्थ्यमित्यवधे
यम् भेदादिसाध्यकस्थले पृथिवी इतरेभ्यो भिद्यत इत्यादिप्रतिज्ञाप्रतिपाद्यभेदाश्रयत्वादिरूपयत्किंचिदेकार्थनि
श्चयाप्रतिबध्यभेदादिकोटिकसंशयं प्रति पृथिवीतेतरगीत्यादिप्रतिज्ञाजन्यभेदादिप्रकारकनिश्चयस्य प्रतिबंध
कतया न कस्याश्चिदपि प्रतिज्ञायास्तादृशसंशयानिवर्तकबोधजनकत्वमतस्तत्तद्विशिष्टार्थनिश्चयनिवर्त्यत्वाभा
वकूटनिवेशनं प्रतिज्ञाजन्यबोधस्य स्वसमानाकारानुमितौ सिद्धिविधया प्रतिबंधकत्वात्तादृशानुमितेश्च सिषा
धयिषाकालीनतादृशबोधाप्रतिबध्यतया तादृशप्रामाण्यज्ञानानास्कंदितप्रतिज्ञाप्रतिपाद्यविशिष्टार्थवि
षयकनिश्चयत्वावच्छिन्नप्रतिबंधकताकोऽन्यत्वेऽपि तदप्रतिबंधकसिषाधयिषाकालीनबोधजनकत्वमादाय प्र

मतादसंभवदुःस्थतो ज्ञानसामान्यमुपेक्ष्य संशयपर्यंतानुधावनं । [illegible]नानुमितेस्तादृश
निश्चयत्वावच्छिन्नप्रतिबंधकताका

तिज्ञायां लक्षणसमन्वयः संभवतीति संशयपदमनर्थकं स्वरूपयोग्यतारूपजनकताया एव निवेशनीयतया व्यावे
र्त्यानवकाशादिति वाच्यं। अनिवर्तकत्वं हि प्रतिबंधकतावच्छेदकीभूतविषयिताशून्यत्वं न तु प्रतिबंधकत्वाभावः।
तथा सत्यप्रामाण्यज्ञानास्कंदिततादृशबोधमादाय निगमनातिव्याप्तितादवस्थ्यात्। तथा च सिषाधयिषाकालीन
सिद्धेरप्रतिबंधकत्वे पि प्रतिबंधकतावच्छेदकीभूतविषयिताशालित्वेनानुमित्यनिवर्तकत्वासंभवात् न च सिद्धेः
पूर्वं परतो वा सिषाधयिषाया उत्पादस्थले द्वितीयक्षणे प्रथमक्षणे वा सिषाधयिषाविरहविशिष्टत्वमक्षतमेवेति
सिषाधयिषाविशिष्टाया अपि सिद्धेरनुमितिप्रतिबंधकत्वमक्षतमेवेति कथं तस्या अप्रामाण्यज्ञानानास्कंदित
तादृशविशिष्टार्थनिश्चयत्वावच्छिन्नप्रतिबंधकताकान्यत्वमिति वाच्यं। यादृशसिद्धेः पूर्वं परतश्च सिषाधयिषासा
दस्तादृशसिद्धेरेवाप्रतिबंधकत्वात्। प्रत्यक्षनिश्चये विशेषदर्शनकालीनविपरीतनिश्चयस्याप्रतिबंधकतास
त्वे तस्यापि प्रतिज्ञार्थनिश्चयत्वावच्छिन्नाप्रतिबध्यतयोक्तदिशासंभव इति प्रत्यक्षसामान्यमुपेक्ष्य संशयपर्यंता
नुधावनं अत्र च तत्तद्विशिष्टार्थविषयकनिश्चयत्वानवच्छिन्नसंशयप्रतिबंधकत्वशून्यत्वस्य ज्ञानविशेषणत्वा

पगमेनैवातिरिक्तविषयकस्य हेतुत्वं तादिभागजन्यबोधस्य तदा तथाविधधूमज्ञानज्ञाप्यत्वादिसंशयप्रतिबंधकताश्रय
स्यवारणसंभवात् तादृशप्रतिबंधकतात्वेनैव तथाविधनिश्चयत्वावच्छिन्नप्रतिबंधकताकान्यसंशयप्रतिबंधकता
निवेशः न तु तथाविधनिश्चयत्वावच्छिन्नप्रतिबंधकताकान्यसंशयप्रतिबंधकतात्वेन गौरवादित्यवधेयं। उक्तहेतुवारणा
य तादृशबोधान्यतमेति प्रकृतप्रतिज्ञाजन्यतावच्छेदकीभूतं यादृशयादृशबुद्धित्वं तादृशतादृशबुद्धित्वावच्छिन्नान्य
तमजन्यतानिरूपितजनकतापर्यंतस्य विवक्षणीयतया उक्तसमूहालंबनबोधमादाय न तत्रातिप्रसंग इत्युक्तप्रायं ग
वाभेदस्येत्यादि सकलपक्षांतैः समं बोधाविशिष्यधर्त्तेया इत्यग्रिमस्यान्वयः। यद्यपि तादात्म्येन गोसाध्यकस्थले तु सिसनू
नानतिरिक्तविषयकबोधजनकत्वं प्रतिज्ञायाः संभवतीति प्रागभिहितं तावतैव च गवाभेदः प्रतिज्ञाप्रतिपाद्य इत्य
स्य लाभात्तत्र तादृशबोधमादाय लक्षणसंकर्तव्यमिति स्फुटमेव तथापि तत्र तादृश एव बोधो लक्षणघटको न त्वन्य वि
धो बोध इति स्फुटीकर्तुं तदुपादानं तादात्म्येन वह्नौ साध्ये यं वह्निरित्येव प्रतिज्ञा जायते तत्र च न वह्निमदभेदबोधो
लक्षणघटक इत्यतः संयोगेन समवायेन वेति तादात्म्यातिरिक्तसंबंधेनेत्यर्थः। वन्ह्याविर्यादिसम्यं तत्र यं साध्य इति

स

प्राकृतेनेनान्वितं। वह्निमद्भेदस्येति। अत्राप्येतादृशबाधस्य तादृशप्रतिज्ञाजन्यतायाः प्रागुपदर्शितत्वेप्यन्यवि
धबाधासंभवमाविष्कर्तुमेतदुपादानं पाककृतिमत्वस्येति। पाककृतिसमवायस्येत्यर्थः। पचतीति प्रतिज्ञातस्तद्बाधा
दितिभावः। पाककर्त्रभेदस्येति पाककर्तृत्वावच्छिन्नाभेदस्य पाककृतिमत्वावच्छिन्नाभेदस्य चेत्यर्थः। पक्ता पाककृतिमा
नित्यादिप्रतिज्ञातस्तद्बाधादितिभावः। इतरभेदवत्त्ववत्त्वस्येति इतरभेदाश्रयतासंबंधस्येत्यर्थः। इतरेभ्यो भिद्यत
इत्यादितस्तादृशबाधादितिभावः। इतरान्याभेदस्येति इतरभेदावच्छिन्नभेदस्येत्यर्थः। इतरान्येति प्रतिज्ञातस्तद्बाधा
दितिभावः। इतरभेदवत्त्वस्येति इतरभेदसंसर्गस्येत्यर्थः। नितरागीसतस्तद्बाधादितिभावः। इतरभिन्नाभेदस्येति इत
रभेदाश्रयत्वावच्छिन्नाभेदस्येत्यर्थः। इतरभिन्नेति प्रतिज्ञातस्तद्बाधादितिभावः। अनतिरिक्तविषयकत्वार्थः। पू
र्ववदेव अन्यूनविषयकत्वं तावद्बाधनिवर्त्य यावत्संशयनिवर्तकत्वेदर्शितहेतुजन्यबोधस्य ज्ञानज्ञाप्यत्वे धूमीयं न
वेत्यादिप्रतिज्ञाजन्यबोधनिवर्तनीयसंशयप्रतिबंधकत्वेपि तादृशसंशयांतर्गतपर्वतोवह्निमान्नवेत्यादिसं
शयानिवर्तकत्वेन वारणसंभवादितिवदतो मतमाह तावदिति + यावं + तत्तद्विशिष्टार्थविषयकेत्यर्थः। तावद्बा

३ निवर्तकत्वं न कस्यापि बोधस्येति निरस्तं ३

धनिवर्त्यायावत्संशयेति तन्तद्विशिष्टार्थबोधान्यतमयत्किंचिद्बोधनिवर्त्ययावत्संशयेसमर्थः। तेन भेदादिसाध्यकस्थले
भेदतदाश्रयत्वादिकोटिकनानाविधसंशयानामेव प्रकृतसाध्यपक्षक प्रतिज्ञार्थबोधनिवर्त्ययावत्संशयांतर्गत
तया तावत्संशयनिवर्तकतायाः पृथिवीनेतराणि पृथिवीतरेभ्यो भिद्यते इत्यादि प्रतिज्ञाजन्यबोधे सत्वेपि तादृ
शसकलवाक्यजन्यसमूहालंबनबोधस्य तावत्संशयनिवर्तकत्वात्तत्र च निरुक्तानतिरिक्तविषयकत्वसत्वात्।
तज्जनकत्वमादायैव प्रसिद्धेः प्रतिज्ञाया लक्षणसमन्वयाबोध्यः। अत्र च स्वमतापेक्षया गौरवमेवास्वरसबी

दि जं बोध्यं। ननु विषयितासंबंधेन पाकाद्यवच्छिन्नकृत्यादेः यत्र साध्यता तत्र कीदृश उपनयः न तावत्पाककृतित्वा
द्यवाधिसाकारकः तत्र तत्पुरुषघटकपाकादिपदस्य पाकविषयकादिलाक्षणिकतया पाकविषयिकाभिन्न
कृतित्वाद्यवच्छिन्ननिरूपितव्याप्तेरवलाभात् कृतसाध्यतावच्छेदकावच्छिन्ननिरूपितायाव्याप्तेरलाभेनार्थो
न्तरप्रसंगादित्यत आह। चैत्र इति साध्ये विशिष्टसाध्यशरीरे विषयितानुयोगित्वयोरिति कृतिभेदांशइत्यादिः
संबंधविधयैवेसेवकारेणविशेषणत्व अवच्छेदः विषयित्वाद्युपस्थापकपदाभावेन तयोर्विशेषणत्वासंभवादि

तिभावः। निपातार्थेनामार्थस्यभेदान्वयस्यव्युत्पन्नविरुध्यतयानेतराजीत्यादौ प्रथमायाअनुयोगितार्थकत्वमसिद्धमि
तिहृदयं। यथोपदर्शितेतिप्रतिज्ञोपस्थापितेत्यर्थः। उपनेयत्वात्। उपनयेनबोधनीयत्वात्। तादृशव्याप्तेरेवाकांऽ
क्षितत्वेनयः पाककृतिसामग्रीमान्सचतिइत्युदाहरणेनप्रतिपादनात्तादृशव्याप्तिविशिष्टस्यपक्षधर्मताकांक्षये
वोपनयप्रयोगादितिभावः। [illegible]तितथाशब्देनतादृशव्याप्तिविशिष्टहेतुमतएवोपस्थापनादितिभावः। न
नुमणिकृताप्यालप्रसयार्थ्यवितर्क्यतस्मात्तथेतिनिगमनस्यनिराकरणीयतयातथापदघटितोपनयेपितद्दो
षग्रासइत्यस्याननुमतत्वात्तादृशोपनयइत्यतएतन्मतमनुसृत्याह। नव्यानामिति। तत्पदेनयथोपदर्शितसाध्य
स्यैवतादृशसाध्यव्याप्तिविशिष्टहेतोरपिपरामर्शसंभवइतिव्याप्त्यादिपदप्रयोगवैयर्थ्यमित्याशयवानाह। नह्यऽ
त्वेति। ननुपक्षादेरपिप्रक्रांतत्वात्तस्यैवकथंतोपनयस्थतच्छब्देनपरामर्शइत्यतआह। [illegible]तेति। तात्पर्यवशा
दित्यर्थः। व्याप्तिविशिष्टहेतुमत्त्वस्यैवाकांक्षितत्वेनतत्परतायाएवतत्रग्रहादितिभावः। तदा। तच्छब्देनसाध्यस्येति
प्रथमकल्पेतव्याप्यस्येतिद्वितीयकल्पमभिप्रेत्यपर्वतोवन्हिमानित्यादिन्यायस्यवन्हिसाधकत्वेनिराकृत्यवन्हि

व्याप्यधूमवांश्चायमितिसाध्याकारकोपनयनंनिराकुर्वतांमतमाह।केचित्त्विति।विप्रतिपत्तौकोटित्वंतज्जन्यस्मृतिवि
षयत्वंतज्जन्यप्रत्येकशाब्दबोधप्रकारत्वंवानतुतदधीनसंशयप्रकारत्वमतोनसंशयेचसस्यवैयर्थ्यंतत्प्रदर्शने
चसंशयकोटित्वानिर्वाहकत्वेनतस्यसतोजिज्ञासायामतंत्रत्वादितिध्येयंयद्यपिवन्हिमत्तउपस्थितिदशायांवन्हेरप्यु
पस्थितत्वात्तादृशविप्रतिपत्तिवाक्याद्वन्हिकोटिकोपिसंशयोभवितुमर्हतितथापिस्वातंत्र्येणैककोट्युपस्थितिः
संशयप्रयोजिकेत्यभिप्रायेणेदमित्यवधेयंअथवाविप्रतिपत्तिवाक्याच्छाब्दएवसंशयइतिमतानुसारेणेदंवस्तु
तोवन्ह्यभावस्यकोटितायामेववन्हिकोटिकसंशयतोपपद्यतेनतुवन्हिमद्बुद्धस्यस्वस्वाभावप्रकारकस्यैवस्वसं
शयत्वात्प्रकृतेचवन्ह्यभावोनोपस्थितःअपितुतद्बुद्धेरेवेतिवन्ह्यभावस्यकोटित्वासंभवाद्वन्हिसंशयोनसंभव
तीत्यभिप्रायः।एतत्सूचनायैवचवन्हिमद्बुद्धस्यकोटित्वमभिहितंतदभिधानस्यप्रयोजनांतराभावात्।यद्वाधर्मि
णितत्प्रकारकबोधोपयिकाकांक्षावत्पदजन्यतदुपस्थितिरेवधर्मिणितत्कोटिकसंशयजनिकापर्वतोवन्हिरभाव
इत्यादितोवाक्याद्वन्ह्याद्युपस्थितौपर्वतादौवन्हिसंशयानुदयात्।तथाचपर्वतोवन्हिमानित्यादिवाक्यस्यैवन्ह्याः

दिपदमपिन पर्वतादौ वन्ह्यादेर्भेदान्वयोपयिकाकांक्षावदिति न तादृशविप्रतिपत्तिवाक्याद्वन्ह्यादिकोटिकसंशय इति
परमार्थः नवीनमतमनुसरन्नाह। वन्हिमव्याप्येति। प्राहुरिति प्रशब्देनास्वरसाभावः। सूचितः फलोपधायकतारूपज
नकतानिवेशशंकया प्रसक्तां तादृशशाब्दबोधानुपधायकप्रतिज्ञायामव्याप्तिं। योग्यताविवक्षया निराकरोति यन्नवे
ति अंतरेति हेत्वर्थादिविषयकशाब्दबोधसामग्र्यनुत्तरमित्यर्थः। एतेन फलोपधानविवक्षणे अवयवांतरार्थविषय
कशाब्दबोधमात्रोपधायकप्रतिज्ञायामप्यव्याप्तिः प्रसज्यते अनतिरिक्तविषयकशाब्दबोधानुपधायकत्वादिति सू
चितं तादृशेति तादृशशाब्दबोधजनकज्ञानविषयेत्यर्थः। आकांक्षानिवेशात् पर्वतो वन्हिः संबंधीत्यादि निराकांक्ष
वाक्यव्युदासः न च पर्वतो वन्हिमानित्यादिशाब्दं प्रति निराकांक्षतादृशवाक्यविषयकज्ञानत्वेनाजनकत्वात्तादृश
शाब्दबोधजनकतावच्छेदकविषयिताकत्वनिवेशनेनैवोपपत्तावाकांक्षानिवेशनमफलमिति वाच्यं। पर्वतो वन्हि
मानित्यादिवाक्यानुपूर्वीप्रकारकभ्रमात्मकतादृशनिराकांक्षविषयकज्ञानस्यापि तथाविधशाब्दधीजनकतया
तदीयविषयिताया अपि तज्जनकतावच्छेदकत्वेन तज्जनकतावच्छेदकप्रकारताश्रयानुपूर्वीरूपाकांक्षाशालि

त्वनिवेशस्यावश्यकत्वात्। तच्छालित्वं च तद्घटकवर्णसमुदायत्वं तज्जनकतावच्छेदकीभूतस्वसमानप्रयत्किंचिद्ज्ञानवृत्तिवि
षयितानिरूपकवर्णसमुदायत्वमिति तु पर्यवसितोऽर्थः। हृदो वह्निमान् निर्सादिक्रमानुमितिसमानविषयकतादृशबो
धजनकवाक्यस्य वारणाय योग्यतानिवेशनं योग्यत्वं चाबाधितार्थकत्वं प्रकृतसाध्यविशिष्टप्रकृतपक्षबोधकत्व
मित्यावत्। वैशिष्ट्यं च वास्तवं न तु वैज्ञानिकं यद्यपि स्वातंत्र्येण योग्यता निवेशो निरर्थकः अन्यूनविषयकत्वावच्छि
न्नजन्यताप्रतियोगिकजनकताया अवश्यं विवक्षणीयतया वास्तववैशिष्ट्यघटितसाध्यविशिष्टपक्षविषयक
त्वरूपान्यूनविषयकत्वनिवेशासंभवेप्ययोग्यवाक्यप्रतिपाद्यविशिष्टार्थाप्रसिद्ध्या संप्रदायसिद्धप्रतिज्ञाप्रतिपा
द्यविशिष्टार्थबाधानिवर्त्यसंशयानिवर्तकत्वरूपानतिरिक्तविषयकत्वघटितलक्षणस्य तत्रातिव्याप्त्यप्रसक्तेः।
तथापि वास्तववैशिष्ट्यघटितानतिरिक्तविषयकत्वस्य लाभाय योग्यतोपादानं आदिपदात्तात्पर्यविशेषपरिग्रहः त
न निरस्तात्पर्यकस्वकर्तृकाद्युच्चरितप्रतिज्ञासमानाकारवाक्यस्यार्थांतरपरतादृशवाक्यस्य च व्युदासः ननु आकां
क्षादिनिवेशो शाब्दवाक्यपदयोर्वैयर्थ्यं आकांक्षातज्ज्ञानांतरोपयिकत्वविरहाद् अव्यातिरिक्तसत्वाच्चानुमिति

जनकपरामर्शादौ शाब्दधीजनकयोग्यताज्ञानादावतिप्रसंगानवकाशादित्यत आकांक्षादिमत्त्वलाभार्थकं
तया तादृशपदोपादानं सार्थकयतीति तल्लाभश्चेति। तल्लाभः शाब्दबोधं प्रति आकांक्षादिमत एव वाक्यस्य जनकत
या आकांक्षादिमत्त्वलाभः तादृशपदद्वयोपादानादित्यर्थः। शाब्दपदस्य योगेन शब्दजन्यार्थकत्वेन तल्लाभः आकां
क्षादिरहितस्यापि शब्दस्य शाब्दजन्यस्मृतिहेतुत्वादत आह। जातिविशेषोपस्थापकेति रूढ्याऽनुभवनिष्ठश्शा
ब्दत्वरूपजातिसावच्छिन्नोपस्थापकार्थकं शाब्दबोधं प्रति आकांक्षादिरहितस्यापि ज्ञानादेर्हेतुतया वाक्यपदानुपा
दाने केवलशाब्दपदान्न तल्लाभ इति वाक्यपदोपादानापेक्षेति भावः। यत्तु तल्लाभश्चेति। अन्यूनविषयकशाब्
त्वावच्छिन्नोपयिकाकांक्षादिमत्त्वलाभश्चेत्यर्थः। शाब्दपदस्यावयवशक्त्या शब्दजन्यज्ञानत्वावच्छिन्नार्थकत्वे श
ब्दजन्यतावच्छेदकजातिविशेषानुपस्थितेः तदवच्छिन्नजन्यताप्रतियोगिकजनकतालाभो न भवतीत्यत उ
क्तं जातिविशेषोपस्थापकेति तथा च कार्यदिशि शाब्दपदेन शाब्दत्वजातेः। कारणदिशि च वाक्यपदेनाकां
क्षादिमत्त्वस्य लाभात्तादृशशाब्दत्वावच्छिन्नोपयिकाकांक्षादिमत्त्वलाभ इति व्याख्यानं तदसत् अवच्छेदक

तात्पर्यास्यनिवेशान्निरुक्तान्यूनविषयकत्वावच्छिन्नजन्यतानिवेशमात्रेणोपपत्तौशाब्दत्वनिवेशनेप्रयोजनाभावा
त्तदुपस्थितेरप्रयोजकत्वात्।नचतत्तदर्थविषयकत्वस्यशाब्दत्वनिष्ठजन्यतावच्छेदकतायामेवावच्छेदकतयाजन्य
तायांतदवच्छिन्नत्वविरहात्अन्यूनविषयकशाब्दत्वावच्छिन्नत्वेनैवजन्यतानिवेशनीयेतिवाच्यं।विनिगमनावि
रहेणशाब्दत्वविशिष्टतत्तदर्थविषयकत्वस्यापिजन्यतावच्छेदकत्वात्।नन्वन्यूनानतिरिक्तपदपरित्यागेअनुमि
तिविषयकशाब्दधीजनकमित्यवशिष्यते तथाचपर्वतोवन्हिमानित्यादिप्रतिज्ञावाक्यस्यानुमित्यबोधकतयाऽ
व्याप्तिरित्याशंकांपरिजिहीर्षुरनुमितिविषयोविषयोयस्येतिमध्यमपदलोपिसमासाभिप्रायेणसमुदितल
क्षणपर्यवसितार्थंव्याचष्टे तथाचेतिदृष्टांतवत्इति।अस्याग्रिमेणोदाहरणस्येत्यादिनान्वयः।अन्वय्युदाहर
णस्यलिंगबाधकत्वाद्व्यतिरेकिपर्यंतानुधावनंयोयोधूमवान्सवन्हिमानितिव्यतिरेक्युदाहरणस्यवन्ह्यभा
वादिरूपलिंगाबाधकत्वात्पक्षविषयकत्वमात्रनिवेशनेनैवतादृशोदाहरणवारणसंभवेनपक्षमुख्यविशे
ष्यकत्वपर्यंतस्यविवक्षणीयस्यव्यावृत्तिदानाययथाह्रदभिन्नमित्यादिदृष्टांतघटिततदनुसरणंदृष्टांताघ

गदा० अ०

४४

इति व्युदाहरणे व्याप्तिमाह। ह्रदावन्तीति। उपनयवाक्यगायेति पक्षतावच्छेदकावच्छिन्नपक्षविशेष्यकत्वनिवेशस्य प्र
योजनांतरविरहेप्येतदर्थमेव तन्निवेशो ननुषंगपक्षे निगमनातिव्याप्तिर्न संभवतीत्यभिप्रायेण निगमनापेक्षात ऽ
स्मादितरेभ्यो भिद्यत इत्यादिनिगमनस्य पक्षविशेष्यकताभावा निगमनसामान्येनातिव्याप्तिसंभव इत्यभिप्रायेण
वावस्तुतः पक्षमुख्यविशेष्यकत्वनिवेशेपि गोत्वं सास्नाभाववद्गोत्वाभाववादित्यत्र यत्र सास्नात्वं गोत्वमित्युदाह
णपक्षमुख्यविशेष्यकबाधजनकेतिव्याप्तिर्दुर्वारैव पक्षमात्रमुख्यविशेष्यकत्वनिवेशे पि मैत्रे च विश्वपक्षकस्थ
ले मात्रार्थाप्रसिद्ध्याऽव्याप्तिरिति पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यत्वानिरूपकत्वमेव विवक्षणीयं तथा च
निगमने ननुषंगपक्षे तिव्याप्तिर्न संभवत्येवेति ध्येयं। लिंगत्वस्य केवलान्वयितया सामान्यतो लिंगाविषयक
त्वं ज्ञाने प्रसिद्धमिति प्रकृतलिंगाविषयकत्वं विवक्षणीयं तथापि न निस्तार इत्याशयेनाह। यद्यपि प्रकृते तिलिं
गतावच्छेदकावच्छिन्नविषयकत्वविवक्षणे पृथिवीतरेभ्यो भिद्यत इत्यादिप्रतिज्ञाया नासंग्रहः तज्जन्यबोधस्य
रूपत एव पृथिवीत्वादिलिंगभानादित्याशयेन स्थलांतरदोषमाह। गंधवतीत्यत्र चेति तथा इतरेभ्यो भिद्यत उप

नयासंभवइतितथाचतादृशप्रतिज्ञाघटितन्यायएवनसंभवतीतिकापिव्याप्तिशंकेतिभावः। इत्यमादृदंशब्देनगं
धवत्त्वेनेतिउपनयस्थेदंशब्दस्यप्रतिज्ञोपदर्शितपक्षतावच्छेदकावच्छिन्नपरत्वादितिभावः। गंधवत्त्वान्वयेति। गंधव
दभेदान्वयस्येत्यर्थः। अयोगादितिउद्देश्यत्वविधेयत्वयोरवच्छेदकयोरैक्येभेदान्वयबोधस्याव्युत्पन्नत्वादन्यथाघटोघटइ
त्यादावप्यन्वयबोधप्रसंगादितिभावः। साध्याभावेतिसाध्याभावव्यापकोयोगंधाभावस्तदभाववत्त्वेनेत्यर्थः। तथाचभिन्न
रूपेणगंधादेरुद्देश्यत्वविधेयत्वावच्छेदकगर्भेतर्भावान्नान्वयबोधानुपपत्तिरितिभावः। ननुहेत्वभावाभाववत्त्वेनहेतूपस्था
पकपदाभावात्कथमुपनयवाक्यात्तेनरूपेणपक्षेहेतुभानमतआह। अतएवेति। साध्याभावव्यापकतावच्छेदकहेत्वभा
वत्वावच्छिन्नाभाववत्त्वेनहेत्वन्वयानुरोधादेवेत्यर्थः। नचवनेयंपृथिवीतिनञ्द्वयेनाभावाभाववत्त्वेनहेतुबोधनादितिभा
वः। यद्यपिपृथिवीत्वहेतुकस्थलेतादृशोपनयप्रयोगेनयुज्यतेपृथिवीपदात्स्वरूपतएवउपस्थितस्यपृथिवीत्वरूपप
दार्थतावच्छेदकस्यनञर्थाभावेऽन्वयासंभवेनहेत्वभावाभाववत्त्वेनहेतुलाभात्। नचहेतुमद्भेदाभावोपिहेतुरेवान्यो
न्याभावाभावस्यप्रतियोगितावच्छेदकरूपत्वात्। एवंहेतुमद्भेदएवसाध्याभावव्यापकतायत्नेनेतरभेदस्तत्रपृथिवीफ

दाहरणेनबोध्यतइतिपृथिवीभेदाभावत्वेनपृथिवीत्वबोधकत्वात्तादृश्योपनयोयुज्यतइतिवाच्यं।एवमपिपृथिवीत्वा
दितिहेतुवाक्योपस्थितपृथिवीत्वत्वविशिष्टहेतुकानुमित्यौपयिकतद्रूपविशिष्टवद्भेदत्वावच्छिन्नेसाध्याभावव्यापक
तायाएवाकांक्षिततयातस्याएवयत्नेतरभेदाभाववत्त्वपृथिवीत्ववदितिउदाहरणेनोपदर्शनीयतयातद्रूपविशि
ष्टवद्भेदत्वावच्छिन्नाभाववत्त्वेनहेतुमत्तायाएवउपनेयत्वात्तादृश्योपनयासंगतेः अन्यथापृथिवीतरेभ्योभिद्यतेगंध
समवायिकारणतावच्छेदकरूपवत्वादित्यादावपितथोपनयप्रयोगापत्तेरिति तथापितादात्म्येनपृथिवीहेतुकस्थ
लाभिप्रायेणेदं आदिपदेनचनेयंगंधवतीत्याद्याकारकस्यनचनात्रगंधइत्याद्याकारकस्यचोपनयस्यपरिग्रहः।अत्र
हेत्वभावादेःसाध्याभावव्यापकत्वाभानेपिनक्षतिः प्राचीनमतेउदाहरणादेवव्याप्तिलाभेनपक्षधर्मतामात्रस्योपने
यत्वात्।अतएवप्राचामित्युक्तं साध्याभावव्यापकेत्यादेरव्यापकांतमुपलक्षणार्थकंनतुनचनेयंपृथिवीत्यादिकः
प्राचीनानुमतउपनयोऽसंगतः नञर्थाभावस्यप्रतियोग्यनुयोग्युपरागेणैवशाब्दानुभवेभानात् अन्योन्याभा
वबोधेसमानविभक्तिकप्रतियोग्यनुयोगिवाचकपदसमभिव्याहारस्यसंसर्गाभावबोधेचसप्तम्यंतानुयोगिवाच

कपदसमभिव्याहारस्यापेक्षितत्वात्प्रकृते चानुयोगिवाचकपदाभावेन पृथिवीभेदगंधाभाववाभावादिबोधासंभवादिति
नवीनानुमत इतरत्वव्यापकीभूताभावप्रतियोगिगंधवती चेयमित्याद्याकारकोपनयएवादरणीयः तत्र हेतोः पक्षता
वच्छेदकत्वे दर्शितव्युत्पत्तिविरोधो दुष्परिहर एवेत्यालोच्य नव्यमते समाधानमाह। यद्वेत्यादि। उच्यत इत्यग्रिमेणान्वयः तं
[illegible]तितधर्मधर्मितावच्छेदकीकृत्येतराविशेषिततद्धर्मावच्छिन्नाभेदान्वयबोधस्यैव व्युत्पत्तिविरुद्धत्वादित्यर्थः। ना
नुपपन्नीति प्रकृते उद्देश्यतावच्छेदकाघटकव्याप्तेर्विधेयतावच्छेदकघटकतयाभानादिति भावः। तथा च गंधवतीतर
भ्याभिव्यक्ते गंधादित्यादिन्यायस्यापि निष्प्रत्यूहतया लिंगविषयकतादृशन्यायांतर्गतप्रतिज्ञायामव्याप्तिर्दुर्वारैवेति
भावः। ननु पक्षाविशेषणतया यल्लिंगविषयत्वं तत्कृत्यत्वं विवक्षणीयमतो नोक्ताव्याप्तिरुक्तस्थले पक्षविशेषणतयैव लिं
गविषयतासत्त्वेन विशिष्टाभावसत्त्वादित्यत आह। पक्षाविशेषणत्वेनेति। अयं वह्निसामग्रीमान् वह्नेरित्यादाविति
अव्यापकमित्यग्रिमेणान्वयः। अथ पक्षाविशेषणत्वं पक्षनिरूपितविशेषणताभिन्नत्वं तस्य लिंगविषयताविशेष
णत्वे चायं वह्निसामग्रीमान् वह्नेरित्यादावव्याप्त्याशंकानवकाशः तत्रापि पक्षविशेषणतापन्नसाध्यनिरूपितविशेषण

पर्यंतस्य एतदनुरोधेन पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यताकत्वस्य वा

तात्मकलिंगविषयतायाः परंपरया पक्षनिरूपितत्वाद्गंधवतीतरेभ्यो भिद्यत इत्यादावपि मत्वर्थसंबंधांशे विशेषणी
भूतगंधविषयताया गंधसमानकालीनरूपवतीतरेभ्यो भिद्यत इत्यादौ तद्विषयतायाश्च साक्षात्पक्षनिरूपितविशे
षणतानात्मकत्वेन साक्षात्परंपरासाधारणनिरूपितत्वस्यैव निवेशनीयत्वादिति चेन्न पक्षविशेषणत्वे यथोक्तार्थकं
तदा निगमनातिव्याप्तिः न च निगमनेऽयं पदाननुषंगपक्षे उक्तयुक्त्या पक्षतावच्छेदकानवच्छिन्नमुख्यविशेष्यताका
न्यतरस्य विषयकांतार्थस्य विवक्षणीयतया नातिव्याप्तिरिति वाच्यं। एवमप्यनुषंगपक्षे तत्रातिव्याप्तेर्दुर्वारत्वात्
अतः पक्षतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितप्रकारतान्यत्वमेव तदर्थो वाच्यः पक्षतावच्छेदकप्रका
रतांतःपातिनी सैव प्रकारता तादृशविशेष्यतानिरूपिता इयांस्तु विशेषः काचित्साक्षात्काचित्परंपरया तथेति वि
धेयकोटिप्रविष्टपदार्थीयप्रकारतायाश्च न धर्मितावच्छेदकप्रकारतानिरूपितविशेष्यतानिरूपिता विधेयनिरूपि
तविशेष्यताया धर्मितावच्छेदकावच्छिन्नतया धर्मितावच्छेदकप्रकारतानिरूपितविशेष्यतायाश्च स्वस्य स्वधर्मि
तानवच्छेदकत्वेन तदनवच्छिन्नतया विधेयतद्धर्मितावच्छेदकप्रकारतानिरूपकविशेष्यतयोर्भेदादिति निगम

नादिजन्यबोधीयविधेयकोटिप्रविष्टलिंगविषयतानपक्षतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितविशेषण
तात्मिकेतिन निगमनाद्यतिव्याप्तिः एवंचवन्हिसाभग्रीमान्वन्हेरित्यादावव्याप्तिःप्रसज्यत एवेति एतेनपर्वतोवन्हि
मान्धूमादित्यादौप्रसिद्धन्यायांतर्गतोपनयेतिव्याप्तिप्रसंजकत्वेन नैतद्विवक्षणंशंकापथमारोहति [illegible]यंदोषा
तिव्यापकंचोपनयस्येसनेनस्वयमेववक्ष्यत इतिनानुपपत्तिरितिवा[illegible]उपनयवारणार्थकतयैवलिंगविषयक
त्वविशेषणस्यस्वयंप्राग्भाख्याततयाउपनयमात्रएवयादृशविवक्षायामतिव्याप्तिस्तदृशशंकायांसंदर्भविरोध
स्यजागरूकत्वादित्यपिसमाहितंनचैवमतिव्यापकंचोपनयस्येतिग्रंथासंगतिः तादृशग्रंथस्यधूमवान्वन्हिमा
न्धूमादित्यादिन्यायांतर्गतोपनयविशेषपरत्वात्तत्रहेतोरेवपक्षतावच्छेदकतयापक्षतावच्छेदकोवच्छिन्नांशेय
द्विशेषणत्वंतस्यापिपक्षतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितत्वात्। एवंव्यापकत्वनिरूपितत्वतयाहेतुवि
षयतायाअपित्वात्मकपक्षतावच्छेदकप्रकारतानिरूपिताधिकरणनिष्ठविशेष्यतानिरूपितप्रकारतात्मकत
यातिव्याप्तिसंगतिः। यत्तुपक्षतावच्छेदकहेतुकव्यतिरेक्युपनयपर्यंतपरतयातादृशग्रंथसंगमनंअत्वप्युप

विवक्षा

तयेतज्जन्यबोधव्याप्तिघटकतयालिंगविषयकत्वसत्वेनातिव्याप्तिर्नसंभवतीत्यभिमानेनकेषांचित्तु। तदेतेनाप्यद्रूयम्
पक्षाविशेषणत्वेनसाध्याविशेषणत्वेनचेति। पक्षतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितप्रकारताभिन्नत्वे
सतिसाध्यतावच्छेदकप्रकारतानिरूपकविशेष्यतानिरूपितप्रकारताभिन्नयल्लिंगविषयकत्वंतच्छून्यत्वमर्थः साध्या
विशेषणतयेत्यस्ययथाश्रुतार्थकत्वेनिगमनेपरंपरयासाध्यविशेषणतयैवलिंगभानादतिव्याप्त्यापत्तेः नचैवम
पिज्ञानविषयवान्धूमादित्यादित्यायांतर्गतनिगमनातिव्याप्तिस्तदवस्थैवज्ञानविषयत्वरूपसाध्यतावच्छेदकप्र
कारतानिरूपकविशेष्यतानिरूपितत्वस्यहेतुप्रकारतायांसत्वादितिवाच्यं। शुद्धसाध्यतावच्छेदकप्रकारतानिरू
पकविशेष्यतायाएवविवक्षणीयत्वात्। ननुपक्षधर्मेलिंगाविषयकत्वविवक्षणेदधिद्रव्यंदध्नइत्यादौनाव्याप्त्य
वकाशः दधिद्रव्यमित्याकारकबोधस्यदधिव्यक्तिविषयस्यदधित्वमेवतद्धर्मविषयकत्वसंभवादतस्थलांतर
माह। प्रमेयवानिति। ननुप्रमेयत्वंप्रमाविषयत्वंतच्चविषयभेदाद्भिन्नं एवंचघटादिनिष्ठप्रमेयत्वविषयकस्य
प्रमेयत्वमभिधेयमितिबोधस्यप्रमेयत्वरूपपक्षनिष्ठप्रमेयत्वाविषयकस्यसंभवान्नाव्याप्तिरतःस्थलांतर

मनुसरति गेत्वाभाव इति ननु पक्षतावच्छेदकविशिष्टपक्षविषयतानंतःपाति लिंगविषयताशून्यत्वनिवेशेनोपदर्शि
तहेतुपक्षक प्रतिज्ञाया असंग्रहः तदंतःपातित्वं च पक्षतावच्छेदकप्रकारतानिरूपितसंसर्गतानिरूपकत्वं पक्षतावच्छेद
कप्रकारतापक्षविशेष्यतासाधारणमित्यालोच्यातिव्याप्तिमाह। अतिव्यापकं चेति पक्षतावच्छेदकविशिष्टेति पक्षतावच्छे
दकावच्छिन्नपक्षविशेष्यतानिरूपितायाः साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारतानिरूपितवैशिष्ट्यविषयतातद्बहिर्भूत
लिंगविषयताशून्यत्वमित्यर्थः। अथ तद्बहिर्भूतत्वं न साक्षात्परंपरासाधारणतन्निरूपकत्वप्रसत्त्यत्वं पक्षतावच्छेदकप्रकार
तायाउक्तयुक्त्या तदनिरूपकत्वात् कथंचित्तन्निरूपकत्वोपपादनेपि यत्र संयोगेन वन्हेः साध्यत्वं वन्हिसंयोगत्वेन हेतुता
तत्रस्य प्रतिज्ञायामव्याप्तिः हेतुभूतवैशिष्ट्यविषयतायाः स्वनिरूपकत्वविरहादेवं साक्षात्परंपरासाधारणानुगतनि
रूप्यनिरूपकभावोपि दुर्वचः। परंपरया निरूपितत्वस्य तन्निरूपितनिरूपितत्वाद्यात्मकत्वात्। एतेन तादृशवैशिष्ट्य
विषयतानिरूपकविषयतानिरूपितत्वं तादृशविषयताबहिर्भूतत्वं तत्र वैशिष्ट्यविषयतासाधारणं तन्निरूपकप्र
कारताविशेष्यतानिरूपितत्वमादाय तन्निरूपकविशेष्यताप्रकारतासाधारणं चेत्युक्तावपि न निस्तार इति चेन्न

गदा०अ०
४८

तथाविधवैशिष्ट्यविषयताशालिनिश्चयत्वसमव्यापकप्रतिबंधकतानवच्छेदकत्वमेवतद्बहिर्भूतत्वं निगमनजन्यबोधी
यहेतुविषयतायादृशप्रतिबंधकतावच्छेदककोटौ निविशते न तादृशी कापि प्रतिबंधकता तादृशनिश्चयत्वव्यापिका हेतु
विषयकतादृशवैशिष्ट्यविषयताशालिज्ञाने साधारण्यात्। अतस्तथाविधविषयतायास्तद्बहिर्भूतत्वेनैवोपपत्तिरि
त्यनुषंगपक्षेपि न निगमनातिव्याप्तिः तादृशनिश्चयत्वव्यापकत्वमात्रस्य प्रतिबंधकताविशेषणत्वे धूमादालोक
वान्पर्वतो वह्निमान् धूमादित्यत्र हेत्ववयवेतिव्याप्तिः तादृशहेतुनिष्ठाया हेतुत्वं धूमीयं न वेति संशयप्रतिबंधक
तावच्छेदकतादृशविषयताया निरुक्तविषयताबहिर्भूतत्वानुपपत्तेः। अतस्तादृशनिश्चयत्वव्याप्यत्वमपि प्रतिबंधक
ताविशेषणं नच पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतानिवेशस्यावश्यकतया नैतादृशातिव्याप्तिसंभावनेति
व्यर्थं व्याप्यत्वनिवेशनमिति वाच्यं। तथाप्यनुषंगपक्षे धूमाद्वह्निमतः सधर्मा पर्वतो वह्निमान् धूमादित्यादिन्या
यस्थलीयनिगमने हेतुत्वं प्रमेयाद्वाच्यत्ववत्। प्रमेयादितिस्थलीयहेत्ववयवे चातिव्याप्तेर्दुर्वारत्वात्। तन्निवेश
स्यावश्यकत्वादिति। नच धर्मितावच्छेदकनिष्ठप्रकारत्वं न प्रतिबंधकतावच्छेदकमपितु तन्निष्ठविशेष्यतावच्छेद

बोधे

कत्वमेवतथाचगंधवतीतरेभ्यो भिद्यत इत्यादि प्रतिज्ञाजन्यबोधीयहेतुप्रकारतायास्तद्बहिर्भूतत्वादव्याप्तिरितिवाच्यं ॥
विशेष्यतावच्छेदकतायाः प्रकारतात्वोपगमेन तादृशांतदन्यप्रकारतानभ्युपगमात्। एवं सति प्रसक्तस्य भूतलं घटव
दित्यादिज्ञानस्य भूतलत्वांशे तद्धर्मितावच्छेदकत्वस्य प्रकारांतरेणवारणासंभवात्। अस्त्वकवाविशेष्यतावच्छेदकता
स्त्वविषयताप्रकारतातोऽन्यैव तथापि न क्षतिः। तादृशविषयताबहिर्भूतविषयताशून्यत्वं ज्ञानविशेषणमुपेक्ष्यता
दृशबहिर्भूतविषयतानवच्छिन्नजन्यतानिरूपितजनकतायावाक्यविशेषणतोपगमेन विशेष्यतावच्छेदकताभि
न्नगंधादिविषयतायाः प्रतिज्ञाजन्यबोधे सत्वेपि तस्याः प्रतिज्ञाजन्यतावच्छेदककोटिनिवेशप्रयोजनाभावेन त
न्निष्ठधर्मितावच्छेदकताया एव तत्र निवेशनीयतयाव्याप्त्यनवकाशात् तादृशबहिर्भूतविषयतासामान्यशून्यत्व
निवेशेनुमितिसमानविषयकत्वनिवेशनस्य मूलोपात्तस्य वैयर्थ्यप्रसंग इति तादृशलिंगविषयताशून्यत्वनि
वेशने। अखंडाभावघटकतया न लिंगांशवैयर्थ्यं उक्तरीत्या बहिर्भूतत्वनिर्वचनायासविदूषकतांतरमाश्रयते
वस्तुतस्त्वितिलिंगत्वमितिव्याप्तिरित्यर्थः। नन्वत्राननुगतयोरन्वयव्यतिरेकव्याप्त्योस्तद्घटकव्यापकत्वयोर्वा एकत

रमात्रविषयतायाउपादानेन्यतरबाधकोपनयादावतिव्याप्तिरित्याशंकया तादृशव्याप्तिघटकव्यापकताद्वयविष
यतयोरनुगतरूपेणाभावं निवेशयति तथा चेति प्रकृतहेतुतावच्छेदकावच्छिन्नस्येति गमकतान्वितव्याप्तिविषयकत्व
मित्यत्रव्याप्तिपदं व्यापकत्वविषयतानिष्ठसाध्यतावच्छेदकादिविषयताव्यावृत्तविलक्षणौपयिकतानिवेशस्वचना
यअथकिमितितादृशगमकतौपयिकत्वं न तावत्प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकप्रकृतसाध्यतावच्छेदकावच्छिन्न
साध्यकानुमितित्वावच्छिन्नजनकतावच्छेदकत्वं पक्षधर्मत्वाविषयकोदाहरणजन्यबोधीयव्यापकत्वादिविषयताया
अनुमितिजनकतावच्छेदककोट्यप्रविष्टतया तत्रातिव्याप्तेः न च हेतुव्यापकत्वादिविषयतात्वेनैव तद्विषयतानां ज
नकतावच्छेदककोटौ निवेशादनुमितिजनकस्यापि तादृशज्ञानस्य विषयतानां तादृशरूपाक्रान्ततानां तथात्वमक्षत
मेवेति वाच्यं। तादृशविषयतात्वेन पक्षविशेष्यतापन्नहेतुविशेषणतापन्नसामानाधिकरण्यविशेषणतापन्नसा
ध्यादिविषयितानिरूपितव्यापकत्वविषयताया एव कारणतावच्छेदकत्वात् तादृश्यास्तदवच्छेदकत्वाभावात् यद्रू
पावच्छिन्नविषयताजनकतावच्छेदिकेत्यत्र निवेशे साध्यतावच्छेदकावच्छिन्नविषयताया अप्यनुमितिजनकताव

कातद्रूपावच्छिन्नविषयता

वच्छेदककोटिप्रविष्टतया [illegible] तद्रूपावच्छिन्नविषयताशून्यत्वस्य प्रतिज्ञाजन्यबोधेप्यसत्वादसंभवः य
द्रूपावच्छिन्ननिरूपितव्यापकत्वविषयताजनकतावच्छेदिकातद्रूपावच्छिन्नव्यापकतानवगाहित्वनिवेशे च किंचिद्रूपा
वच्छिन्नव्यापकत्वं साध्यस्य पक्षस्य बाधदकं यत्र तत्स्थलीयप्रतिज्ञाया असंग्रहः यत्वतत्वनिवेशादननुगमानवकाशश्चे
ति चेन्न पक्षतावच्छेदकावच्छिन्नमुख्यविशेष्यतानिरूपितविषयतानिरूपिताया विषयतातन्निरूपितविषयतानिरू
पितविषयतायां विशेषणविधया प्रकृतानुमितिजनकतावच्छेदकतावच्छेदकतायाः पर्याप्त्यधिकरणधर्मवत्वेन हे
तुव्यापकताविशिष्टसाध्यविषयत्वसाध्याभावव्यापकताविशिष्टहेत्वभावविषयत्वे अनुगमय्य तदभावस्य निवेशने
नानुपपत्त्यभावात्। तथा हि प्रकृतानुमितिजनकतावच्छेदिकाया अन्वयिपरामर्शीयहेतुव्यापकतावच्छिन्नसाध्य
विषयतायाः पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितहेतुविषयतानिरूपिताधेयत्वविषयतानिरूपिताधिकर
णविषयतानिरूपितत्ववत्वं। व्यतिरेकिपरामर्शीयसाध्याभावव्यापकतावच्छिन्नहेत्वभावविषयताया अपि तादृ
शविशेष्यतानिरूपितसांसर्गीयविषयितानिरूपितहेतुविषयतानिरूपितप्रतियोगित्वविषयतानिरूपितत्व

२ उक्तविशेषणतया अनुमितिजनकतावच्छेदकतावच्छेदकता[illegible]याः पर्याप्त्यधिकरणं हेतुव्यापकताविशिष्टसाध्यविषयतात्वं २

गदा०अ०

८०

नसाध्याभावव्यापकताविशिष्टहेत्वभावविषयतात्वस्यापिहेतुव्यापकताविशिष्टसाध्यविषयतात्ववन्निरुक्तविषय
त्वविशेषणविधयानुमितिजनकतावच्छेदकतावच्छेदकतायोःपर्याप्त्यधिकरणत्वात्।यद्यपियथापरंपरयापक्षविशे
ष्यतयातन्निरूपितोदाहरणजन्यबोधीयहेतुव्यापकताविशिष्टसाध्यादिविषयतानामनुमितिजनकतावच्छेदिकातथा
तन्निरूपितव्यापकत्वादिविषयतानतथेतितदीयसाध्यांविषयताविशेषणतयाव्यापकत्वविषयतानिरूपितत्वस्या दि
नुमितिजनकतावच्छेदकतावच्छेदकप्रवेशेनसंभवतिजनकतावच्छेदकविषयतारतेरेवधर्मस्यतादृशविषय
ताविशेषणतयाजनकतावच्छेदकतावच्छेदकत्वसंभवादितिनिरुक्तपंचमविषयतांशेविशेषणतयावच्छेदकत्व
पर्याप्त्यधिकरणंयत्साधनादिव्यापकताविषयितानिरूपितत्वसहितंसाध्यादिविषयतात्वंतन्नोदाहरणजन्य
बोधीयसाध्यादिविषयतासाधारणंतथाचोदाहरणतिव्याप्तिर्दुर्वारैवतथापिनिरुक्तजनकतावच्छेदकतावच्छे
दकतापर्याप्त्यधिकरणधर्मावच्छिन्नविषयतावच्छिन्नायाःप्रतिबंधकतातदवच्छेदकविषयतात्वेनोदाहरणजन्य
बोधीयहेतुव्यापकसाध्यादिविषयतायाःसंग्रहोबोध्यः।अनुमितिजनकतावच्छेदकपरामर्शीयसाध्यादिवि

जनकताचसाध्यव्याप्यत्वावच्छिन्नधर्मिताकानुपरामर्शीयाप्रामाण्यानेनतद्धर्मिकपरामर्शदशायामपिनोक्तप्रतिज्ञायामव्याप्तिः॥६॥

षयतायाहेतुव्यापकत्वादिविषयतानिरूपितसाध्यादिविषयतात्वेनसाध्यंहेतुव्यापकंनवेत्यादिसंशयप्रतिबंधकतावच्छेद
कत्वात्तादृशप्रतिबंधकतायांतादृशरूपेणोदाहरणेजन्यबोधीयसाध्यादिविषयतायाअप्यवच्छेदकत्वात्।मुख्यविशेष्यता
निवेशनेतुत्वाभावःप्रमेयत्वव्यापकवाच्यत्ववत्तास्त्वाभाववान्गोत्वाभावादित्यत्रतादृशविशिष्टसाध्यकप्रकृतानुमितिजन
कपरामर्शीयस्वात्मकपक्षविशेषणतापन्नगोत्वाभावविषयतानिरूपिताधेयताविषयतानिरूपिताधिकरणविषयता
निरूपितसास्त्वाभावविषयतानिरूपितवाच्यत्वविषयतांशेविशेषणविधयावच्छेदकतावच्छेदकतायाःपर्याप्त्यधिकरण
धर्मेवत्प्रमेयत्वव्यापकवाच्यत्वविषयतायाःप्रतिज्ञाजन्यबोधेसत्वेपिनक्षतिः।नचसाध्याभावव्यापकहेत्वभावप्रति
योगिमानितिपरामर्शीयपक्षविशेष्यतानिरूपितहेतुविषयतानिरूपितप्रतियोगित्वविषयतानिरूपिताभावविषय
तानिरूपितव्यापकत्वविषयताया अपिनिरुक्तविषयतात्वात्।तादृशविषयत्वविशेषणतयावच्छेदकीभूतसाध्याभा
वव्यापकताविषयतात्वमपीतिवन्ह्यभावव्यापकमेयत्ववान्पर्वतोवन्हिमानित्यादिप्रतिज्ञायामव्याप्तिरितिवाच्यं
किंचिद्व्यापकत्वविशिष्टविषयतांशेविशेषणतयावच्छेदकत्वस्यनिवेशनीयत्वात्।एतेनतत्रचतुर्थविषयतायामभा

वनिष्ठप्रकारताभिन्नत्वस्य निवेशनीयत्वात् न कोऽपि दोषः व्यापकत्वादिविषयतायाश्च तथात्वाद्व्यतिरेकिपरामर्शीय
पंचमविषयताया एवाभावप्रकारतात्वात् । अन्वयव्यतिरेकव्याप्तिघटकव्यापकताद्वयविषयतयोर्विशिष्याभावद्वय
निवेशपरेणायं ग्रंथः । तथा सति प्रकृतहेतुतावच्छेदकेत्याद्यनुगतशब्देनोभयोः कीर्तनवैयर्थ्यापातात् । विशिष्यापि
तदुभयावगाहित्वस्य तत्त्वेसादिना दर्शनीयतया प्रथमत एव विशिष्य तदुभयानवगाहितार्थकत्वोपवर्णनानौचि
त्यात् । न चेति तादृशागमकतौपयिकविषयित्वं च सर्वथा हेत्वाविति । हेतुव्यापकताविशिष्टसाध्यविषयित्वमित्यर्थः । अ
तो नोक्तानुगमविरोधः । हेतुभूताभावप्रतियोगितावच्छेदकेति तादृशप्रतियोगितावच्छेदकं च धूमादिभावहेतुकस्थ
ले धूमाभावत्वादि वन्ह्यभावाद्यभावहेतुकस्थले च वन्हित्वादि एतदसंग्रहभयेनैव हेत्वभावत्वावच्छिन्न इति नोक्तं तथा
सति अयं निर्धूमो निर्वन्हित्वादित्यादौ यत्र धूमस्तत्र वन्हिः धूमव्यापकवन्ह्यभाववांश्चायमित्याद्याकारकयोरेवो
दाहरणोपनययोः प्रयोगाद्वन्हित्वाद्यवच्छिन्न एव साध्याभावव्यापकतायास्ततः प्रतीतिर्न तु वन्ह्यभावाद्यभावत्वा
द्यवच्छिन्न इति तत्रातिव्याप्त्यभावाप्रतिपादनेन न्यूनतापत्तेः । हेतुतावच्छेदकसाध्यतावच्छेदकनिवेशप्रयोजनमा

ह।द्रव्यत्वेतिप्रतिज्ञासंग्रहायेति।प्रथमोपदर्शितप्रतिज्ञाविषयसंयोगत्वावच्छिन्ननिरूपितव्यापकतायाअपिसंयो
गत्वेनगुणहेतुकद्रव्यत्वत्वाद्यवच्छिन्नानुमितेर्द्वितीयप्रतिज्ञाविषयगुणत्वाद्यवच्छिन्नव्यापकतायागुणत्वेनस्पर्श
साध्यकरूपत्वाद्यवच्छिन्नहेतुकानुमितेःप्रयोजकतयावच्छेदकद्वयानुपादानेतत्तत्त्वाव्याप्तिरितिभावः।नन्वेवंलिं
गत्वाविषयकत्वविशेषणेनैवोदाहरणस्यापिवारणेपूर्वोक्तानुमितिसमानविषयकत्वविशेषणस्यव्यावृत्तिर्नसंग
च्छतइति।ससंतोत्तरविषयांतभागपरित्यागस्यैवावश्यकत्वेनान्यूनानतिरिक्तपदमात्रपरित्यागपरमूलविरोधइत्या
लोच्यतादृशमूलस्यतथाविधभागपरित्यागपरत्वमेवाह।अन्यूनेति।नन्वेतत्कल्पेहेतुवारणायैवपक्षविशेष्यकत्वपर्य
वसिततादृशविशेषणोपादानमावश्यकंतज्जन्यबाधस्यव्यापकत्वाविषयकत्वेनलिंगत्वाविषयकत्वदलेनावारणा
दितिकथंसमुदायपरित्यागइत्यतआह।हेतुतामितिपंचम्यर्थपक्षकेइतितथाचपक्षमुख्यविशेष्यकत्वमपितादृश
हेतुजन्यबोधेक्षतमितिनतेनद्वारणसंभवइतिभावः।पंचम्यंताम्रतस्यनिवेशेघटोदंडात्घटोनदंडादित्यादिपंच
म्यंतप्रतिज्ञानामसंग्रहमालोच्यकल्पांतरमाह।हेतुत्वेति।अवश्यंवाच्यत्वादितितथाचततएवसकलहेतुवार

रो उक्तसमुदायपरित्यागो न क्षतिमावहतीति भावः। ननु ज्ञापकत्वं पंचम्यर्थः। स च प्रकृत्यर्थस्य विशेषणतयैव भास
ते न तु विशेष्यतया तथा च कथं पंचम्यर्थपक्षकत्वान्यायांतर्गतहेतोः पक्षमुख्यविशेष्यकबोधजनकत्वमत आह। संख्येति
विभक्त्यर्थस्यैकत्वादेः प्रकृत्यर्थस्य विशेषणतया बोध आनुभविकः तस्य विशेष्यत्वे घटमित्यादितः एकत्वं कर्मत्वं च घ
टीयमित्याकारकस्य सर्वानुभवविरुद्धस्य महालंबनबोधापत्तेरतः संख्यातिरिक्तेति सुबर्थविशेषणं तिङर्थस्य पक्षसाध
नत्वादेः प्रकृत्यर्थविशेषणतया भानात् स्वसपार्थसामान्यापेक्षा विशेष्यत्वेनैवेत्यत्र युक्तिमाह। प्रातिपदिकार्थयोरि
ति समानविभक्तिकनामार्थयोः क्रियाविशेषणीभूतद्वितीयांतनामार्थधात्वर्थयोश्चाभेदान्वयबोधो यथाभेदेने
तितयोरपि विभक्त्यर्थमंतराकृत्य परं परंपरया भेदान्वयबोधात् साक्षादिति अग्रे सत्त्वे वक्ष्यमाणत्वादिति भूतले
घट इत्यादावाधाराधेयभावादिसंबंधेन घटभूतलयोस्तंडुलः पचतीत्यादौ च क्रियाकर्मादिभावेन तंडुलपाका
द्योरन्वयबोधानुदयादिति भावः। तथा च सुबर्थस्य प्रातिपदिकार्थविशेषणत्वे विभक्त्यर्थस्यांतराऽभानेन प्रातिप
दिकार्थस्य भूतलतंडुलादेर्घटपाकादौ आधाराधेयत्वकर्मत्वादिसंबंधेन साक्षादेवान्वयबोधस्य भूतले घटस्तं

डुलंपचतीत्यादितः स्वीकरणीतयातादृशव्युत्पत्तिविरोध इत्याशयः। ननु भूतले घट इत्यादौ घटाधिकरणं भूतल
मित्याद्याकारकएवान्वयबोध उपपद्यते नातो दर्शितव्युत्पत्तिविरोध इति वाच्यं। तथा सति शाब्दबोधेनुभवसिद्धस
प्तम्यन्तार्थमुख्यविशेष्यकत्वस्य भंगप्रसंगात्। ननु विभक्त्यर्थः संसर्गतयैवभासतेन तु विशेष्यतया घटादावा
धेयत्वादि संबंधेन भूतलादिप्रकारकबोधे च सप्तम्यादिविभक्त्यंतभूतलादिवाचकपदसमभिव्याहारस्य नि
यामकत्वान्नोक्तातिप्रसंगः नन्वेवं भूतलो धूमादित्यादिभागमात्रस्याननुभावकत्वप्रसंगः इष्टत्वात् अस्तु
वा विभक्त्यर्थाधिकरणत्वज्ञापकतादिविशेषितस्यैव प्रकृत्यर्थस्य तुल्यवित्तिवेद्याधेयत्वज्ञाप्यत्वादिसंबं
धेनान्वय इति सतो विभक्त्यर्थस्याविशेष्यत्वेनेदं मैत्रस्येत्यादौ मैत्रादिविशेषितस्वत्वादिरूपस्याभावप्रतियोगि
नो वान्तरवाक्यादनुपस्थित्या नञर्थान्वयबोधानुपपत्तिमाह। चैत्रस्येदमिति मैत्रादेरेवाभावो नञा बो
ध्यते न तु स्वत्वस्येत्याशंकां निराचिकीर्षुणा तदुपगमे चैत्रीयधनेपि संयोगसमवायादिना चैत्राद्यभाव
सत्वेन यत्र चैत्रस्येदमिति व्यवहारः तत्र न चैत्रस्येदमित्यपि व्यवहारः स्यादिति सूचयितुं चैत्रस्येत्युक्तं॥

र्थ

नचस्वत्वादिसंबंधेनैवप्रकृत्यर्थस्याभावोदर्शितस्थलेनआबाध्यतेतथाचनोक्तातिप्रसंगइतिवाच्यं। स्वत्वनिया
मकतयास्वत्वादेरभावप्रतियोगितावच्छेदकसंबंधत्वाभावात्। नामार्थप्रतियोगिकाभावस्यानुयोगिनिसप्तमींवि
नाबोधयितुमशक्यत्वाच्च। स्वत्वनियामकसंबंधस्याभावप्रतियोगितावच्छेदकत्वेस्वत्वादिवाक्यभिन्नातिव्याप्तिप्रस
क्तेर्वाक्यपदोपादानमनर्थकमित्याशंकयावाक्यपदस्यैवन्यायावयवार्थकत्वमाह। वाक्यमिति। गंधवतीइतरेभ्योभि
द्यतेगंधादित्याद्यवयवातिवारणायलिंगाविषयकेति। पूर्वोपदर्शितार्थकमिति। साध्यतावच्छेदकावच्छिन्नसाध्यवि
शिष्टपक्षतावच्छिन्नपक्षविषयताबहिर्भूतलिंगविषयताशून्यार्थकमित्यर्थः। अभावहेतुकेति। वह्न्यभावादिहेतु
केत्यर्थः। यायोधूमवान्सवह्निमानित्याकारकोदाहरणस्यलिंगाविषयकत्वादितिभावः। भावहेतुकस्यव्यतिरेकि
णोप्युदाहरणस्यहेत्वभाववत्त्वेनैवव्यतिरेकबोधकतयानलिंगाविषयकत्वसंभवः। एवमभावहेतुकस्याप्यन्वय्यु
दाहरणस्यनतथात्वसंभवइत्यभावहेतुकव्यतिरेकिवानुधावनं। लिंगिसाध्यमिति। लिंगमस्यास्तीतिव्युत्प
त्त्यालिंगिपदस्यलिंगतानिरूपकार्थकत्वादितिभावः। वक्ष्यमाणोदाहरणेसाध्यविषयत्वसत्त्वादितिव्याप्तेराहन

एतत्पङ्क्तिपरि
भ्रष्टग्रंथःउत
रपत्रद्वयेलि
खितः

द्विषयकमिति। तद्वृद्धिशेष्यकं। तद्वन्मुख्यविशेष्यकं निःस्नेहत्वरत्यतं [illegible]) स्नेह एव तद्धेतुत्वे उदाहरणस्य न लिं
गाविषयकत्वसंभव इति तत्प्रकारकप्रमाविषयत्वशून्यत्वानुधावनं। तच्चाभावप्रतियोगिकतयाऽतिरिक्तमिति हृद
यं। जलत्वसंदेहदशायां जलान्यत्वस्य संदिग्धतया तत्प्रकारकप्रमाविषयत्वमपि संदिग्धमिति तच्छून्यत्वस्य हेतुत
यो पत्यासौ न संभवतीति प्रथमसाध्ये तदुपेक्षितं। उत्पत्तिकाले जलस्यापि निःस्नेहतया द्रव्यत्वसाध्यकजलान्यत्व
प्रकारकप्रमाविषयत्वशून्यत्वहेतुकस्थलांतरमनुसृतं। अत्रोक्तयुक्त्या जलसाध्यायेसा। यत्तु जलान्यत्वप्रकारक
प्रमाविषयत्वशून्यत्वमपि लाघवाज्जलत्वस्वरूपमेवेति जलत्वस्य साध्यत्वेनोदाहरणं जन्यबोधस्य साध्यविष
यकस्य लिंगाविषयकत्वसंभव इति द्रव्यत्वसाध्यकानुधावनमिति। तन्न। जलान्यत्वप्रकारकप्रमाविषयत्वशून्य
त्वस्य जलत्वस्वरूपत्वे यत्र द्रव्यं तज्जलान्यत्वप्रकारकप्रमाविषय इत्युदाहरणस्याप्यन्यत्वप्रतियोगितावच्छेद
कतया लिंगविषयकत्वेनासंगतेः। पूर्ववद्व्याप्यविषयकत्वस्य लिंगाविषयकपदार्थत्वे उदाहरणस्य व्याप्तिबा
धकतया तत्र लिंगिविषयकत्वविशेषणव्यावृत्तिर्न संभवतीत्याशयेन स्थलांतरे व्याप्तिमाह। लिंगेति। पूर्वोक्त

त्व

च

ति।उक्तानुगतस्वरूपावच्छिन्नेत्यर्थः। हेतुवारणायेति। इतरेषांत्रयाणांव्याप्तिविषयकत्वेनैव वारणादितिभावः।प्रकृ
तेनेति।हेतुतावच्छेदकहेतुहेतुत्वविषयतानांभेदनिवेशेसाध्यस्यहेतुतावच्छेदकादिरूपत्वेहेतुतावच्छेदकादिविष
यताभिन्नसाध्यविषयत्वाप्रसिद्ध्याप्तिरिति विशिष्टविषयताबहिर्भावनिवेशः।तादृशबहिर्भावः पूर्ववन्निर्वाच्यः।
नचतादृशविषयताबहिर्भूतविषयतामात्रनिवेशेनैवहेतुवारणसंभवे साध्यांशवैयर्थ्यमिति।वाच्यं।तादृशवि
षयतांतर्भूतसाध्यविषयताभिन्नत्वस्यैवात्रबहिर्भावेनसंततेनविवक्षिततयादर्शितहेतौतादृशसाध्यविषयतांत
र्भूतसाध्यविषयताभिन्नहेतुत्वादिविषयतामादायातिप्रसंगस्यवारकतयातत्सार्थक्यात्।भेदप्रतियोगिकोटौ
निविष्टस्यसाध्यांशस्यचाखंडाभावघटकतयावैयर्थ्यात्तत्रच प्रकृतहेतुतावच्छेदकविशिष्टहेतुविशिष्टहेतुत्व
विषयतांतर्भूतसाध्यविषयतायाअप्रसिद्धेस्तत्रबहिर्भूततांतमनुपादेयंमेवशब्दैक्यस्यानपेक्षितत्वादितिनाऽ
व्याप्तिः।तादृशविषयतांतर्भूतत्वसाध्यीयत्वोभयाभावएवचाबहिर्भावेनसंततार्थः।हेतुतावच्छेदकहेतुहेतु
त्वानां।निवेशस्यप्रयोजनंक्रमेणदर्शयति।तेनेति।तत्त्वेनेति।हेतुत्वेनहेतुत्वेहेनवेत्यर्थः।हेतुहेतुत्वाद्यास्तादा

५ हेत्वंशमनिवेश्य विशिष्टस्य दुर्निवेशनीयतया विशिष्टनिवेशेनैव तन्निवेशात् ५

त्वेनसाध्यत्वंबोध्यंहेतुत्वावच्छिन्नसाध्यकस्थलेहेतुत्वेनप्रमीयमाणत्वरूपप्रकृतहेतोरपिसाध्यतावच्छेदकाक्रा
न्ततयाहेतुजन्यबोधस्यसाध्यविषयकत्वमक्षतमेवसाध्यतावच्छेदकविशिष्टनिरूपितविषयितापर्यन्तस्याविवक्षि
तत्वादितिहेतुविषयताबहिर्भावनिवेशव्यावृत्तिसंगतिः।ननुहेतुविषयताबहिर्भावनिवेशापेक्षयासाध्यता
वच्छेदकविशिष्टविषयकत्वनिवेशनमेवलाघवेनोचितमितिवाच्यं।विशिष्टविषयताबहिर्भावेनिवेशनीयेहेतु
विषयताबहिर्भावस्यस्वातन्त्र्येणानिवेशनीयतयागौरवानवकाशात्हेतुत्वांशनिवेशएवहेतावच्छेदकविषयि
त्वहेतुत्वविषयित्वयोर्बहिर्भावस्यपृथक्निवेशनीयतयागौरवात्।एवंचप्रमेयत्वाद्यवच्छिन्नसाध्यकस्थलेपिहे
त्वंशनिवेशप्रयोजनसंभवादयंहेतुरित्युपलक्षणपरंबोध्यं।लिंगिविषयकेसत्यपूर्ववत्साध्यवद्विशेष्यकार्थ
कतापत्तेर्वन्हिसामग्रीमत्वात् अयंहेतुःतत्वेनप्रमीयमाणत्वादिसनयोः अतिप्रसंगवारणसंभवेपीदंहेतुत्व
मित्यादौपंचम्यर्थस्यतादात्म्यसंबंधेनसाध्यवत्तयासाध्यप्रकारकत्वानिरूपितविशेष्यताकत्वार्थकत्वेपिस्वरूप
संबंधेनहेतुत्वसाध्यकस्थलनिरूपितत्वसंबंधेनज्ञानत्वावच्छिन्नसाध्यकजन्यतातावच्छिन्नपक्षकस्थलेचहेताव

वन्हिमान्

त्व

तिव्याप्तिवारणं न संभवतीति गुरुतरारंभः। लिंगविषयतायां पूर्वोपदर्शितविषयिताबहिर्भावनिवेशनं लिंगप
दस्य धर्मपरतां विनैव लिंगबोधकप्रतिज्ञाविशेषे अव्याप्तिं लिंगपदविषयपदयोः साध्यवद्विशेष्यपरतां विनै
व दर्शितमतिरिक्तमुदाहरणातिव्याप्तिं प्रकारांतरेण वारयतां मतमुपन्यस्य दूषयति लिंगेति। निगमनस्योदाहर
णस्य च वारणाय नियतांतं तु यमर्थे वैवतावच्छेदकविशेषणं प्रतिज्ञात्वोदाहरणत्वयोरपि लिंगलिंगिविषयक
ज्ञानजनकत्वसमानाधिकरणतया असंभवातिप्रसंगावतः सामानाधिकरण्यमनुपेक्ष्योभयत्र नियतत्वप्र
वेशनं उदाहरणविशेषत्वमादायातिप्रसंगवारणायावच्छेदकांतं आदिपदात्संचमीविभक्तिमत्वानियतलिंगि
विषयकज्ञानजनकत्वनियतावयवतावच्छेदकरूपवत्वादिपरिग्रहः रूपांतरेति। यद्यपि निरुक्तस्यापि रूपस्याप
रिचयात् अंतरपदमनर्थकं तथाप्यासाक्ष्यमयेन तथाविधरूपांतरपरिचयापेक्षणीयः तत्र रूपमनुमित्यनू
नानतिरिक्तविषयकशाब्दधीजनकवाक्यत्वादिकमेव। तथा च तस्यैव तद्घटकस्य लक्षणत्वसंभवाद्व्यर्थविशेष
णता न च विशिष्याघटकत्वान्न व्यर्थविशेषणतेति वाच्यं। प्रतिज्ञात्वहेतुत्वसाधारणस्यावयवतावच्छेदकत्वस्य

तस्य दि

दुर्वैव तथा विशिष्य तन्निवेशस्यावश्यकत्वादित्यत्तल्लाभायांतरपदं अत्र च साध्यादिभेदेनाभिन्ने प्रतिज्ञातं यथाव
च्छेदकत्वेन निविशते तदा तस्य प्रकृतसाध्यविषयकत्वनियतत्वासंभवादप्रसिद्धिः यदि च साध्यादिभेदेनाभिन्नं तत्त
दाधारदृशसाध्यपक्षकप्रतिज्ञायां प्रकृतलिंगबोधकत्वं नियतं तत्त्वा व्याप्तिरित्यपि दूषणं बोध्यं ॥७॥ ॥निगमन
वारणाय्येति। प्रतिज्ञोदाहरणोपनयविशेषाणां विवक्षणीयहेतुविभक्तिमत्त्वविशेषणेन वारणसंभवान्नतदुक्तं।
ननु साध्याविषयकबोधजनकत्वनिवेशे वह्निमान्वह्निसामग्रीमत्त्वादित्याद्युक्तहेतावव्याप्तिरत आह। साध्यावि
षयकत्वं चेति बहिर्भावेणेति विवक्षणीयमिति शेषः। साध्यांशोपादानं हेतुविभक्तिमत्त्वदलसार्थक्याय। एतत्कल्प
तादृशसाध्याविषयकत्वप्रतियोगिकोटौ साध्यांशमुपादाय यद्दलांतरोपादानं प्रक्षालनाद्धीत्यादिन्यायेन संदर्भवि
रुद्धमतः कल्पांतरमाश्रयते पूर्वेति तस्माद्वह्निमानित्यादिनिगमने मत्वर्थांशेत्व साध्यांशस्य विशेषणतयाति
व्याप्तिरतः साक्षात्परंपरासाधारणेति तथा च तत्रापि परंपरया साध्यस्य पक्षविशेषणत्वान्न दोषः हेतुत्वं प्रमेयं प्र
मेयादित्यादौ प्रमेयत्वादिसाध्यकहेतावव्याप्तिः हेतुतावच्छेदकीभूतसाध्यस्य परंपरया पक्षविशेषणत्वादतः

पूर्वोपदर्शितेति। प्रकृतपक्षसाध्यकप्रतिज्ञाजन्यबोधे यादृशं यादृशं पक्षांशे साध्यस्य विशेषणत्वं तादृशेत्यर्थः। तत्र
साध्यतावच्छेदकसंबंधावच्छिन्नं साक्षात्पक्षनिरूपितं पक्षांशेऽभेदादिसंबंधेन विशेषणतापन्नसंबंध्यादिनिरूपि
तं च तादृशविशेषणतात्मकसाध्यविषयतायास्तत्त्वं समुदितार्थः। अयं वन्हिमान्वन्हिमद्वृत्तिधर्मवांश्चेत्युदा
हृते ताववव्याप्तिवारणाय प्रकृतेति पक्षतावच्छेदकावच्छिन्नार्थकं नन्वेवमननुषंगपक्षे निगमनजन्यबोधे सा
ध्यस्य पक्षतावच्छेदकावच्छिन्नविशेषणत्वादतिव्याप्तिस्तादवस्थ्यमिति वाच्यं। अननुषंगपक्षे पक्षमुख्यविशेष्य
तानिरूपितप्रकारतापन्नत्वरूपपक्षविशेषणतापन्नत्वं यदि निविशते तदा पक्षतावच्छेदकावच्छिन्नत्वावि
क्षणेपि तस्मादितरेभ्यो भिद्यत इत्यादिनिगमनादावतिव्याप्तेरशक्यपरिहारतया एतत्कल्पस्यानुषंगप
क्षाभिप्रायकत्वात्॥ अयं धूमाभाववान्वन्ह्यभावादित्यादौ यो यो धूमवान्स वन्हिमानित्यादेर्व्यतिरेक्युदा
हरणस्य यथाश्रुतहेतुविभक्तिमत्त्वनिवेशनापि वारणासंभवाद्विवक्षणीयस्य प्रकृतसाध्यान्वयबोधन
क्षमार्थोपस्थितिजनकहेतुविभक्तिमत्त्वस्याव्यावृत्तिस्थलमाह इदमिति। उदाहरणस्य साध्याविषयकत्वर

क्षणयाभावसाध्यकानुधावनं हेतुविभक्तिपदस्यज्ञापकत्वरूपहेतुत्वबोधकविभक्त्यर्थकत्वे प्रथमोदाहरणेना
तिव्याप्तिः तत्रजनिधात्वर्थोत्पत्त्यन्वितप्रयोज्यत्वस्यैव पंचम्यर्थत्वात्। अतः।स्यलांतरमाह।अथवेति। व्यतिरेक्युदा
हरणस्येति। यद्दंडाज्जातं तद्दंडसंयोगाजन्यद्रव्यत्वाभाववत् याधूमादालोकवान् सआर्द्रेंधनवानित्याकारकस्ये
तिशेषः। साध्याविषयकत्वरक्षायैव्यतिरेकिपर्यंतानुधावनं यद्यप्यन्त्ये प्युदाहरणस्य साध्यविषयकत्वेपि पक्षता
वच्छेदकविशिष्टसाध्याविशेषणकत्वादितिव्याप्तिस्तदवस्थैव द्वितीयकल्पे तथापि प्रथमकल्पे व्यावृत्तिघटना
याभावसाध्यकव्यतिरेक्यनुसरणं तादृशोदाहरणस्यसाध्यान्वितस्वार्थबोधकपदशून्यत्वनिवेशनेनैव
वारणसंभवात्तादृशविभक्तिपर्यंतस्यव्यावृत्तिस्थलमाह। हेतुत्व पक्षक इतिसाध्यान्वितेति निगमनोपस्था
प्यसाध्यान्वितेत्यर्थः। विशेषणतया साध्यान्वितत्वस्याविवक्षणादितिभावः। नचोपनयेव्याप्तिघटकतया
साध्यविषयकत्वसत्वान्नातिव्याप्तिः प्रसज्यते। अननुषंगपक्षेनिगमनोपस्थाप्यसाध्येनसममिदंपदार्थस्य
हेतुत्वस्यानन्वयात्। व्यावृत्तिदानस्याननुषंगपक्षाभिप्रायकतयाननुषंगपक्षेचनिरुक्तविषयतावहि(र्भा)

२(उपनयघटकायंपदसदृशपदांतरस्यावृत्तिरेवानुषंगइत्याशयः)

तसाध्यविषयताशून्यत्वस्यैवसाध्याविषयकत्वपदार्थतयापक्षविशेषणतयासाध्याविषयकत्वस्याप्रयोजकत्वादि
तिवाच्यं।उपनयपदस्येतरत्वव्यापकीभूताभावप्रतियोगिमदिदमित्याकारकाभावसाध्यकव्यतिरेक्युपनय
परत्वात्।प्रकृतसाध्येतिप्रकृतसाध्यान्वितस्वार्थभानप्रयोजकाकांक्षादिमत्येतुविभक्तिमत्वमित्यर्थः।उपदर्शि
तस्थलेधूमज्ञानज्ञाप्यालोकाभावादिरूपसाध्यांशेपंचम्यर्थत्वेयात्नातिव्याप्तिरितिभावः।नन्वेवंहेतुपदम
नर्थकंसाध्यान्वितस्वार्थबोधकविभक्तिशालिनोहेत्वतिरिक्तावयवस्यसाध्यविषयतानियमेनातिप्रसंगान
वकाशात्।नचपक्षविशेषणतयासाध्याविषयकत्वपक्षेज्ञानादिसाध्यकेव्या[illegible]इत्युक्ति।सज्ञानातीस्फदा
हरहरणेज्ञानादिरूपसाध्यान्वितस्वार्थबोधकत्वात्तविभक्तिशालिनिविशेषणविभक्तेरभेदार्थकत्वम
तेप्रमेयत्वादिपक्षकप्रमेयत्वादिसाध्यकोपनयपक्षीभूतसाध्यान्विताभेदबोधकप्रथमाविभक्तिशा
लिनिचातिव्याप्तिवारणायहेतुपदोपादानमावश्यकमितिवाच्यं।पक्षविशेषणतयासाध्याविषयकत्वप
क्षेहेतुपदोपादानेपियोयोधूमवान्सवन्हिमान्यथाधूमाद्वन्हिमन्महानसमितिसदृष्टांतोदाहरणति

अ

व्यासेस्तद्वारणाय प्रकृतपक्षविशेषितापन्नसाध्यान्वितार्थबोधकत्वस्यावश्यं निवेशनीयतया तादृशोदाह
णोपनययोस्तथाविधसाध्यान्वितस्वार्थबोधकविभक्तिमत्वविरहेणातिप्रसंगानवकाशादित्यत आह हे
त्विती ति। इदमुपलक्षणं पक्षविशेषणतया साध्याविषयकत्वनिवेशकल्पे विभक्तिमत्वमपि नोपादेयं तल्ल
क्षस्यानुषंगपक्षपरतया तत्पक्षे उपनयस्य निगमनेनैकवाक्यताविरहेण साध्यान्वितस्वार्थबोधजनकप
दशालित्वाभावात् दर्शितविभक्तिपदव्यावर्त्याभावादिति केचित्। वस्तुतोनुषंगपक्षेपि उपनयस्य स्वपक्ष
बोधकेदंपदस्य निगमनघटकीभूतसाध्यान्वितस्वार्थबोधकतया तादृशबोधे च प्रयोजनान्तरविरहेण स्वज
न्यत्वानिवेशाद् उपनये विभक्तिपदव्यावृत्तिः संभवतीत्यवधेयं। ननु प्रथमसाध्याविषयकत्वनिर्वचने पक्षे
पर्वतः पर्वतभिन्नत्वप्रकारकज्ञानाभाववांस्तादृशज्ञानाभावात् यः पर्वतभिन्नत्वेन ज्ञायते स पर्वतभि
न्नत्वेन ज्ञायते यथा पर्वतभिन्नत्वप्रकारकज्ञानाभावादुत्पन्नं ज्ञानमित्यादौ विशेष्यतासंबंधावच्छिन्न
प्रतियोगिताकाभावसाध्यहेतुकव्यतिरेक्युदाहरणे अतिव्याप्तिः तत्र हेतुतावच्छेदकविशिष्टहेतुविशि

गदा० अ०

५८

ष्टहेतुत्वविषयतांतर्भूतायास्तत्साध्यविषयतायाः सत्वात्साध्याभूततादृशाभावान्वितस्वार्थबोधकपंचमीवि
भक्तिमत्वाच्च। प्रथमकल्पेसाध्यपक्षविशेषणतापन्नत्वानिवेशानदृष्टांतोपस्थापकस्यतादृशसाध्यस्यपक्षानन्वि
तत्वस्यात्किंचित्करत्वादित्यतआह। यद्विनेति सिषाधयिषयात्वायप्रयोगस्य सविवादतया यद्विचक्रत्तं तस्यो
च्यत इत्यनेनान्वयः समवायसंबंधावच्छिन्नाभावस्यसाध्यत्वेज्ञानस्यसमवायेनज्ञानत्वरूपप्रतियोग्यनधिकर
णतयानव्यतिरेकदृष्टांतत्वसंभवइति विशेष्यतयेत्युक्तं। अतएवमहानसत्वप्रकारकज्ञानाभाव उपेक्षितः विशे
ष्यतयापिज्ञानस्यतादृशज्ञानवत्वाभावात् साध्यस्यहेतुतायामेवहेतुत्वविशेषणतापन्नतया विधसाध्यविषय
तायाहेतुतावच्छेदकविशिष्टहेतुविशिष्टहेतुत्वविषयतांतर्भावः संभवतीतितदादरः ज्ञानाभावादुत्पन्नमिति
असंसर्गाग्रहविधयातादृशज्ञानाभावस्यपर्वतत्वप्रकारकज्ञानोत्पादकत्वंबाध्यं व्यतिरेकिपर्यंतानुधावनं वि
शिष्टविषयताबहिर्भूतसाध्यविषयत्वाभावनिर्वाहायप्रकृतसाध्यविशेषणतयान्वितायः स्वार्थस्तद्बोधकत्वे
चेदर्शितहेतुत्वपक्षकोपनयस्थेदंपदस्यनास्तीतितद्विलक्षणविभक्तिपदेवेत्यर्थमिति विशेष्यविशेषणसाधा

रणमेवान्वितत्वं निवेशनीयमित्युक्तोदाहरणजन्यबोधे पंचम्यर्थस्य साध्यविशेष्यत्वेप्यतिप्रसंग एवेत्यभिप्रायः। अ
वयवांतरेति स्वभिन्नावयवघटकपदजन्योपस्थितिसहकारेण स्वाघटकपदजन्योपस्थितिसहकारेण वा तत्पदार्था
न्वितस्वार्थबोधकविभक्तिमत्वमित्यर्थः। तेन तादृशसाध्यस्य प्रतिज्ञाद्यवयवस्थपदोपस्थापितत्वेपि नातिव्याप्तिः
नन्वेवमनुषंगपक्षे साध्याविषयकत्वविशेषणमनर्थकं निगमनस्य तत्पक्षे उपनयैकवाक्यताविरहेण स्वाघटक
पदोपस्थापितार्थान्वितार्थबोधकविभक्तिमत्वाभावाद्व्यावृत्त्यसंगतेरिति वाच्यं चैत्रः पचति पाककृतिसामग्री
मत्वादित्यादौ पाककृत्यादिसाधकप्रतिज्ञायां हेत्ववयवस्थपंचम्युपस्थाप्यहेतुत्वान्वितस्वार्थबोधकाख्यातवि
भक्तिमत्त्वमतिव्याप्तिवारणाय साध्याविषयकत्वोपादानस्यावश्यकत्वात्। प्रथमरीत्या साध्याविषयकत्वनिर्व
चनस्यानुषंगपक्ष इवानुषंगपक्षेपिंदं ननुषंगपक्ष एवेयं विवक्षा अनुषंगपक्षे तु उदाहरणान्यत्वविशेषणाना
नुपदमुक्तोदाहरणं वारणीयमित्यपि + संभवा + वदंति साध्यघटितार्थबोधकोक्तहेतावव्याप्तिर्हेतुविभक्तिमदुक्तोदा
हरणेति व्याप्तिंच प्रकारांतरेण वारयतां मतमाह। केचित्विति निगमने हेतुविभक्तिनैय्यसामान्यातिव्याप्तिवार

णाय्यनियततां तं हेतुत्वस्यापि साध्यबोधकोक्तहेतुरन्तितया संभव इति असामानाधिकरण्यमुपेक्ष्यानियतत्वानुधाव
नं उदाहरणोपनययोः साध्याविषयकबोधजनकयोरपि संभवादुदाहरणोपनयसामान्यवारणाय नियततां तं हे
तुविभक्तिमद्दर्शितोदाहरणस्योदाहरणत्वमादाय अतिप्रसंगवारणाय सामानाधिकरण्यमुपेक्ष्य नियतत्व-
निवेशने विभक्तिमत्त्वमनुपादाय हेतुत्वप्रतिपादकपदवत्त्वनिवेशनेनैवानतिप्रसंगात् हेतुत्वप्रतिपादकपदव
त्त्वेनैव यस्यार्थप्रतिपादकविभक्तिमत्त्वे नैयस्ययोर्वैकल्पिकमुपादानं वा तत्र द्वितीयकल्पो विशेषणविभ
क्तेर्निरर्थकताभिप्रायेण उदाहरणविशेषत्वमादाय उक्तोदाहरणे ऽतिव्याप्तिवारणाय अवयवत्वावतारवच्छेद
केतिनिवेशनमिति चिन्ताबीजं पूर्ववत्। यथाश्रुते तु द्वितीयलक्षणार्थस्य निगमनसाधारणतयान्यथाव्याचष्टे।
विभक्त्यर्थेति विभक्तिजन्यहेतुत्वोपस्थितिद्वारा हेतुत्वमुख्यविशेष्यकशाब्दधीजनकत्वात् अवयवत्वमित्यर्थः
तेन हेतुत्वे विभक्त्यर्थत्वविशेषणस्याव्यावर्तकत्वेऽपि न क्षतिः निगमनवारणायेति। तत्र तिङर्थस्य विशेष्य
त्वादिति भावः। विशेष्यत्वेति हेतुत्वविशेष्यकत्वस्य तत्रापि सत्त्वेन मुख्यविशेष्यतापर्यन्तानिवेशने तत्रातिव्या

तद्धर्मेति।तद्वृत्तिधर्मस्यर्थः ६

सिरिति भावः। ननु घटो दंडादित्यादिप्रतिज्ञाघटितघटादिपक्षकनिरूपकत्वासंसर्गकदंडादिनिष्ठहेतुतासाध्य
कन्यायांतर्गतत्वस्माद्दंडादित्याकारकनिगमने ऽननुषंगपक्षे विभक्त्यर्थहेतुत्वे विशेष्यकबोधजनके तिव्याप्तिरत
आह। घटो दंडादितिज्ञापकत्वरूपहेतुत्वस्यैव प्रकृते निवेशनीयतया जनकत्वरूपहेतुत्वसाध्यकप्रथमस्थले
नातिव्याप्तिप्रसंग इत्यतो वन्हिपक्षकधूमनिष्ठज्ञापकतासाध्यकस्थलांतरानुसरणं तदवृत्तेरितितादात्म्या
तिरिक्तवृत्यनियामकसंबंधेन व्यापकत्वानुपगमादिति भावः। तादात्म्येन स्वस्य स्वधर्मव्यापकत्वसत्वाद
ह। अतदात्मन इति ज्ञाप्यत्वाया एव नवीनमते पंचम्यर्थतया ज्ञाप्यत्वसाध्यकतादृशप्रतिज्ञासंभवेस्यैव तथा
चासंभववारणाय लक्षणस्य हेतुत्वपदेनापि तादृशस्य हेतुत्वरूपार्थस्यैव विवक्षणीयतया तत्रनिगमनेति
व्याप्तितादवस्थ्यमित्याशंक्याह संप्रदायविरोधाच्चेति॥ न्यायानंतर्गतस्य धूमादित्यादिवाक्यस्य उदाहरण
प्रयोजकजिज्ञासोपधायकत्वविरहेपि तत्स्वरूपयोग्यतामादाय। तिव्याप्तिप्रसज्यमानाया वयवत्वदलंसा
र्थकी चिकीर्षुर्जनकपदस्य स्वरूपयोग्यतापरत्वे स्फुटयति कश्चिदिति अभ्युपेत्यफलोपधाननिवेशेपिन्याया।

वयवत्वनिवेशनमावश्यकमित्याह। उदाहरणत्वं चेति वैयर्थ्यात् प्रयोजनांतराभावात्। तथा च यन्नोदाहरणं तमेव
प्रयुक्तं तत्रापि उदाहरणप्रयोजकजिज्ञासाफलोपधानसंभवेनातिव्याप्तिवारणाय न्यायावयवत्वनिवेशनं जन
कपदस्य फलोपधानपरत्वे प्यावश्यकमिति भावः। चतुर्थलक्षणे प्रसिद्धप्रतिज्ञानिगमनयोः साध्याविषयक
त्वविशेषणव्यावृत्तिर्न घटते पंचम्यंतत्वाभावादिति पंचम्यंतत्वद्विशेषतव्यावृत्तिमाह। अयं न दंडादिति
अयं दंडादित्यादिप्रतिज्ञायाः संप्रदायविरुद्धत्वं प्रागभिहितमित्यभावसाध्यकानुधावनं वह्निमान्वह्निसा
मग्रीमत्वादित्यादौ यथाश्रुतव्यासेराहत्यास्यातार्थकमिति हेतुतावच्छेदकविशिष्टसादिनेसादिः उपनय
विशेषत्ति साध्याविषयकबोधजनकाभावसाध्यकव्यतिरेक्युपनयेऽसमर्थः। उदाहरणस्य पंचम्यंतस्यापि
संभवात्तद्वारणाय उदाहरणान्यत्वस्य निवेशनीयतया ततएवोदाहरणवारणसंभवादुपनयपर्यंतानु
धावनं धूमादालोकाभाववादिसाध्यके धूमादालोकव्यापकाभावप्रतियोगिमानयमित्युपनये तिव्याप्तिवा
रकतया तत्पदसार्थक्यं बोध्यं। उपनयस्य कस्यचिदपि पंचम्यंतत्वासंभवाद्धेतुपदवैयर्थ्यमाशंक्याह हेतु

त्वबोधकार्थकेतितादृशार्थकहेतुपदस्य पंचमीपदस्य चवैकल्पिकमुपादानमित्यर्थः। तथा च हेतुत्वबोधकांतत्वं
पंचम्यंतत्वं पृथक् निवेश्यं लक्षणद्वये कारणीयमित्यर्थः। नन्वेवं प्रथमलक्षणे हेतुत्वपक्षके तद्बोधकेदंपदांतउप
नयेतिव्याप्तिरित्यत आह। अन्वयस्यैवेति श्रूयमाणविभक्त्यंतत्वाभावादनुसंधीयमानेति तथा च तस्या हेतुत्वबोध
कत्वाभावादेव नातिव्याप्तिरिति भावः। ननु द्वितीयलक्षणे यं न गुणद्रव्यासमवेतत्वादित्यादौ यथा दंडादित्यादि स्व
परपंचम्यंतपदघटितदृष्टांतस्थले निव्यतिरेक्युदाहरणेतिव्याप्तिरित्यत आह। एवमिति। दृष्टांतस्य पंचम्या अनुसं
धीयमाना प्रथमैवांतद्वयानुषज्यते। अन्वययोगादिति प्रथमांतत्वं विना समानविभक्तिकत्वाभावेन तादृशांग
त्वे प्रथमांतपदोपस्थाप्यसाध्याभावसाधनाभाववद्भेदान्वयानुपपत्तेरित्यर्थः। नन्वेवमपि। अयं न घटो दंडा
जन्यत्वात्। यो घटः स दंडादिसाध्य इत्युदाहरणे लक्षणद्वयातिव्याप्तिर्दुर्वारैव साध्याविषयकबोधजनकत्वात्पंच
म्यंतत्वाच्चेत्यत आह। कस्यचिदिति पूर्वपदेति अवयवयवांतरोपस्थापितार्थान्वितस्वार्थबोधकत्वादाहर
णान्यतरयोरन्यतरविशेषणेनेत्यर्थः। ननु पंचम्यास्तत्सिलिमात्रपंचम्या इत्यस्य पंचम्यंततापक्षे पर्वतो वह्निमा

त्वन्हि प्रमातद्रूत्यादिहेत्ववयवस्य तसिलंतस्य हेतुपंचम्यंतताविरहादव्याप्तिरित्यत आह। अत्रचेति हेतुपंच
म्यंतत्वमिति हेतुत्वबोधकांतत्व पंचम्यंतत्वंचेत्यर्थः। अर्थवद्भागस्येति स्वघटकार्थवद्भागपूर्वत्वाभाववत्वे तुत्व
बोधकादिघटितत्वमेवतदंतत्वमिह विवक्षितमितिभावः। अर्थवत्वं आकांक्षानिर्वाहकत्वं तसिलं विनापि तत्पूर्व
पंचम्येवप्रकृतान्वयबोधोपयिकाकांक्षानिर्वाहान्नतसिलादेराकांक्षानिर्वाहकत्वं न तु किंचिदर्थवाचकत्वमर्थव
त्वं तसिलादेरवाचकत्वेपि तद्घटकप्रत्येकवर्णानां वाचकत्वात् एकाक्षरकोशेन समस्तवर्णानां वाचकताबोध
नात्। उक्तस्थले पंचमीपदस्य षष्ठ्यंतत्वमपि संभवतीत्यभिप्रायेण यथाश्रुतस्यैवसाधुतां समर्थयति। पंचम्या
देरिति नानुपपत्तिरिति तथा सति तसिलएव हेतुत्वप्रतिपादकत्वात् पंचमीवाच्येति भावः। तसिलादेः पंचम्यनादे
शतापक्षे उक्तहेतावव्याप्तिवारणाय पंचम्याअंतत्वमविवक्षितं मतमाह। केचित्विति हेतुत्वप्रतिपादकप
दशालित्वमिति तथा च पंचम्यंतत्वाविवक्षणात्तसिलः पंचम्यनादेशतापक्षेपि न तदंतहेतावव्याप्तिरिति
भावः। ननु हेतुत्वप्रतिपादकपदस्यांततां विवक्षणे दर्शितव्यतिरेक्युपनयेऽतिव्याप्तितादवस्थ्यमित्यतआ

आदिपदात्पंचम्यादेस्तलाद्यादेशपरिग्रहः

हा। पूर्ववदिति। प्रकृतसाध्यान्वितस्वार्थबोधकतादृशपदशालित्वरूपमित्यर्थः। एवंचप्रथमलक्षणेतादृशस्वार्थ
बोधकविभक्तिशालित्वंसाध्याविषयकधीजनकत्वंचनिरुक्तविशिष्टविषयताबहिर्भूतसाध्यविषयताशून्यधी
जनकत्वरूपंनिविष्टं अत्रचतादृशहेतुत्वप्रतिपादकपदशालित्वंसाध्याविषयकज्ञानजनकत्वंचनिर्वक्ष्यमाणम
न्यविधंप्रविष्टमितिभेदइत्यवधेयं।पर्वतोवह्निमानित्यादिन्यायांतर्गतप्रतिज्ञादेर्निर्वाच्यसाध्याविषयकज्ञान
जनकताशालिनोवारणायहेतुत्वप्रतिपादकपदोपादानेवह्नेर्द्रव्यत्ववान्वह्निमान्हेतुत्वंप्रमेयमित्यादिप्रऽ
तिज्ञादावतिव्याप्तिवारणायविशेषणंतथासाध्यान्वितत्वनिवेशनेपिसंदरवह्निमत्सधर्मापर्वतोवह्निमा
नित्यादावतिव्याप्तिवारणाययत्तदावश्यकत्वंनचैवमप्यालोकाद्वह्निमतःसधर्मापर्वतोवह्निमान्धूमादित्या
दावतिव्याप्तिर्दुर्वारैवतत्रापिविवक्षणीयप्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वविशिष्टसाध्यवि
षयकज्ञानाजनकत्वस्यापेक्षितत्वादितिवाच्यंहेतुत्वप्रतिपादकस्यप्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशि
ष्टहेतुत्वप्रतिपादकार्थत्वात्।यथाश्रुतसाध्याविषयकज्ञानजनकत्वमयंवह्निमान्वह्निसामग्रीमत्वादित्यादि

न्यायस्थहेतुत्वव्यापकंपूर्वंनिरुक्तं।तन्निवेशेनचसाध्यान्वितस्वार्थबोधकहेतुत्वप्रतिपादकपदशालित्वविशेषणेनहेतु
त्वप्रतिपादकस्यस्यवैयर्थ्यंप्रतिज्ञायानिरुक्तसाध्याविषयकज्ञानजनकताभावादेववारणादतःसाध्याविषयकज्ञा
नजनकत्वमन्यथानिर्वह्निसाध्येतिएवंचपर्वतोवह्निमानित्यादिप्रतिज्ञयाःसाध्याविषयकधीजनकत्वेपिइतर
नैरपेक्ष्येणहेतुत्वविशिष्टविषयकज्ञानाजनकतयासाध्याविषयकेत्यादिनाऽवारणात्हेतुत्वप्रतिपादकत्वंप
दविशेषणमर्थवद्भवतिहेत्ववयवस्यापिप्रतिज्ञासहकारेणहेतुत्वविशिष्टसाध्यविषयकज्ञानाजनकतयासं
भववारणायइतरनैरपेक्ष्येणेतिस्वाघटकपदासहकारेणस्वार्थकं अजनकंयस्यप्रतियोगिनिविशेषणंतथा

चस्वेतरावयवजन्यहेतुविशिष्टसाध्याविषयकज्ञानजनकंयत्तदन्यत्वमितिसमुदितार्थः।एतच्चाजनकपदस्य
जनकतावच्छेदकपर्याप्त्याश्रयसमुदायपरत्वलाभायहेत्ववयवस्यप्रतिज्ञासहकारेणतादृशबोधजनकत्वेपि
तादृशधर्मपर्याप्त्याश्रयसमुदायभेदस्याक्षततयाइतरनैरपेक्ष्याप्रवेशेपिलक्षणसमन्वयात्।अयंधूमाद्व
ह्निमान्धूमाद्वह्निमतोऽन्यत्रावर्त्तमानधर्मादित्यादिहेतौधूमनिष्ठहेतुताविशिष्टसाध्यविषयकज्ञानजनक

स्यसंग्रहाय प्रकृतेति प्रकृतहेतुतावच्छेदकावच्छिन्नविशिष्टेत्यर्थकं। प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्व
मित्तरविशेषणतयाऽवगाहिन एवज्ञानस्य इतरनिरपेक्षहेतुवाक्यजननात्तादृशहेतुत्वप्रकारकज्ञानसामान्याजन
कत्वस्यैव प्रकृतहेत्ववयवसाधारण्यात् साध्यांशोपादानमनर्थकमितितत्परिस्रजति। साध्यं चेति। अत्र साध्यान्वितस्वा
र्थबोधकत्वनिवेशेपि हेतुत्वपक्षकव्यतिरेकप्रपनया साध्यान्वितस्वार्थबोधस्वजन्यत्वनिवेशेऽनुषंगपक्षे साध्यान्वि
तपक्षबोधस्यापनयाजन्यतयातद्वारण्येऽननुषंगपक्षे निगमनोपस्थापितसाध्यान्वितहेतुत्वबोधकेदंपदशा
लिन्यतिव्याप्तिः न च हेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वप्रतिपादकपदशालित्वनिवेशान्नतत्रातिव्याप्तिरि
ति वाच्यं। गोत्वाभाववित् हेतुत्वं सास्नाभाववत्। गोत्वाभावादित्यादिन्यायांतर्गतोपनये तथाप्यतिव्याप्तेरवारणा
त्। अनुषंगपक्षे प्युक्तन्यायांतर्गतप्रतिज्ञायामतिव्याप्तेश्च विशेषणतया साध्यान्वितस्वार्थबोधकत्वे निवेश्य
तद्वारणे साध्यांशवैयर्थ्यं अननुषंगपक्षेप्युपनयस्थेदंपदार्थस्य कुत्रापि विशेषणत्वाभावात्। पदांतरोपस्था
पितेन प्रकृतहेतुना साक्षाद्विशेषितहेतुत्वप्रतिपादकपदशालित्वं निवेश्योक्तविशिष्टहेतुत्वपक्षकप्रतिज्ञापन

(हेतुत्वपक्षके तथाचायमित्युपनये हेतुत्वरूपपक्षे साध्याद्येनोपीनाद् तिव्याप्तिवारणाय साध्यांशोपादानं)

शि

ययोर्वारणेपि प्रकृतहेतुत्वविशिष्टसाध्याविषयकज्ञानजनकत्वनिवेशनेवोपपत्तौ नन्वयसामस्य इतरनैरपेक्ष्येण सन्निधानस्य चा किंचित्करत्वमित्यस्वरसः पंचम्या लाक्षणिकत्वं व्यवस्थाप्यत इत्थं च निगमनेतिव्याप्तिप्रसंजयन्पंचम्यंतपदं सार्थकयति हेतुत्वादाविति हेतुत्वं जनकत्वं आदिना ज्ञापकत्वपरिग्रहः। जनकतापादानं दृष्टांतविधया गुरुशरीरं तत्क्रियानाश्रयत्वे सति तज्जन्यविभागानाश्रयत्वरूपमपादानत्वं वा दृष्टांतविधया दिपदस्यार्थं हेतुत्वं ज्ञापकत्वमेव तत् हि कुत्रत्यक्तिरित्यपेक्षायामाह। वृक्षादिति। इत्यादाविति इत्यादिवाक्यस्थपंचमीप्रतिपाद्येविनिगमनाविरहं निराकरोति। लाघवेनेति। वृक्षादिनिष्ठावधित्वस्य निरूपकतासंबंधेन विभागत्वयसंभवेपि नवृक्षादित्यादौ वृक्षादिनिष्ठाया अवधिताया आश्रयता संबंधावच्छिन्नाभावस्य वृक्षाद्यवधिकविभागेपि सत्वेनातिप्रसंगेमिथ्याबोधोपगमासंभवात्। तत्संनियामकनिरूपकतासंबंधस्य चाभावप्रतियोगितानवच्छेदकत्वादित्यागनिष्ठं। वृक्षादिनिरूपितमवधिमत्वमेव पंचम्याप्रतिपाद्यत इति। नव्यमतानुसारेणाह। अवधिमत्वेवेतिनत्ववधिमत्वमवधितानिरूपकत्वमेव वृक्षादेरवधितायामेवान्वयस्योपगंतव्यतया एकदेशान्वयः। निरू

पकत्वंचतद्धानजनकज्ञानविषयत्वमिति।ज्ञापकत्वापेक्षयागौरवंचेदतआह।त्र्यनियमिति।संबंधविशे
षः अवधिमन्निष्ठोऽवधिनिरूपितसंबंधविशेषः अवधिमत्वमेवस्वरूपसंबंधविशेषः तन्निरूपकत्वमेवाव
धित्वमितिवैपरीत्यस्यापिसंभवेनविनिगमनाविरहादितिभावः।अन्यदत्तदिति।अनतिरिक्तत्वेपिअवधित्व
त्वादेरनुगमकधर्मस्यानुगतप्रतीत्यनुरोधेनावश्यकत्वात्तस्यप्रवृत्तिनिमित्तत्वेन[illegible]हानपायादितिभावः।न
न्ववधित्वादावेवपंचम्याःशक्तौज्ञापकत्वादाववधित्वादिसंबंधरूपवृत्त्यग्रहेपंचम्याज्ञापकत्वबोधकत्वग्रहा
संभवात्तत्रसायत्नेनतथापंचमीप्रयोगोनस्यादतआह।तदितिज्ञापकत्वादाववधित्वसंबंधाग्रहेचेत्यर्थः।व्य
वहारःज्ञापकत्वादिपरपंचमीप्रयोगःशक्तिभ्रमात्।ज्ञापकत्वादौशक्तिभ्रमात्।अपादानत्वाघटकविभा
गत्वजातिसवच्छिन्नशक्तिवादिनांमतमुपन्यस्यतिवृक्षादितिअपैतीतिअपेत्यर्थोपगमःस्पंदमात्रंनतुविभा
गावच्छिन्नस्पंदःतर्हिसजातितुल्यतयाधात्वर्थतावच्छेदकविभागाश्रयतयावृक्षाद्यपादानस्यकर्मताप्रसंगा
त्।नाप्युत्तरसंयोगावच्छिन्नस्पंदःवृक्षाद्भूमिंप्रयातीतिवत्वृक्षाद्भूमिमपैतीतिप्रयोगप्रसंगात्पततीस

गदा० अ० ६४

ऽधः संयोगावच्छिन्नस्पंदः स्पंदत्वावांतरजातिस्तदवच्छिन्नो वा पतत्यर्थः उभयत्र वृक्षादिनिष्ठविभागजनकत्वं पंचमील
भ्यमेवेति प्रवृत्तिनिमित्तलाघवाद्विभाग एव तस्याः शक्तिरित्यर्थः। नन्वेवं जनकत्वं कुतो लब्धव्यं तदंतर्भावेण शक्तौ
न ज्ञापकत्वापेक्षया लाघवमित्यत आह। जनकत्वं चेति। अथ पतनादेः स्वनिष्ठविभागानुकूलक्रियाश्रयत्वाद्विभा
गमात्रस्य पंचम्यर्थत्वे स्वं स्वस्मात्पततीसौदिति भेदप्रतियोगितावच्छेदकत्वसहित एव विभागः पंचम्यर्थो वा स्वनिष्ठ
च्यः। स्वनिष्ठक्रियायाः स्वनिष्ठविभागजनकत्वेपि स्वनिष्ठभेदप्रतियोगितावच्छेदकत्वविरहान्नोक्तातिप्रसंग
इति कलाघवमिति चेन्न। भेदप्रतियोगितावच्छेदकत्वलक्षणयैवोपपत्तौ तदंतर्भावेण शक्तेरकल्पनात्। ता
त्पर्यवशाद्धस्य लक्ष[illegible]योरपि युगपदन्वयापगमात्। लक्ष्यार्थभेदप्रतियोगितावच्छेदकत्वविनिर्मोकेणैव
म्या विभागाबोधकत्वप्रसक्तेर्न विभागमात्रतात्पर्येण स्वं स्वस्मात्पततीति प्रयोगप्रसंगः अथवा केवलविभा
गपूर्वपूर्वप्रयोगाभावादेवाप्रयोगः। वस्तुतो भेदप्रतियोगितावच्छेदकत्वस्य पंचम्यर्थत्वेपि वृक्षात्पर्णं पतती
त्यत्र पत्रात्पत्रं पततीति प्रयोगाद्दुर्वारः पत्रांतरनिष्ठभेदमादाय ततः प्रसक्तस्य यत्र निष्ठभेदप्रतियोगितावच्छेद

कत्वे सति पत्रनिष्ठविभागजनकत्वस्य पत्रक्रियायामबाधात्। न च भेद एव पंचम्यर्थः तस्य स्वप्रतियोगितावच्छेद
कत्वस्वाश्रयनिष्ठविभागजनकत्वोभयसंबंधेन क्रियान्वयो बाध्य इति नोक्तातिप्रसंगः। तस्य च निष्ठक्रियावच्छि
न्नप्रतियोगिताकभेदाश्रयपत्रांतरनिष्ठविभागजनकत्वोभयसंबंधेन तायास्तत्पत्रक्रियायामसत्वेन तस्या
उभयसंबंधेन पत्रांतरान्वितभेदान्वयायोग्यत्वादिति वाच्यं। पत्रांतरनिष्ठतत्क्रियावच्छिन्नभेदस्य वृक्षेपि सत्वे
न तद्भेदाश्रयवृक्षनिष्ठविभागजनकतायास्तत्क्रियायां सत्वेन पत्रांतरनिष्ठभेदस्योक्तोभयसंबंधेन तत्क्रिया
न्वययोग्यताया अक्षतत्वात्। अधिकरणभेदेनाभावभेदाभावात्। अथ पत्रादिसत्ताधेयतासंबंधेन पत्रविशि
ष्टाभेद उपतिष्ठते विशिष्टस्यैव च स्वाश्रयनिष्ठविभागजनकत्वघटितोभयसंबंधेनान्वयः विशिष्टस्याधिकर
णमेव विशिष्टनिरूपितपरंपरासंबंधघटकं पत्राधेयत्वविशिष्टस्य च स्वाधेयतासंबंधेन पत्रं विशिष्टस्याप्य
धिकरणं विशेषणीभूतपत्रमेव न तु वृक्षः अतो नोक्तोभयसंबंधेन पत्रविशिष्टभेदस्य तत्क्रियान्वययोग्य
ताभेदप्रतियोगितावच्छेदकसदलरक्षायै स्वपदेन पत्रांतरविशिष्टभेदस्यैवोपादेयत्वात्। तदुपादानेतद

गदा० अ०

६५

श्रयपत्रांतरनिष्ठविभागजनकत्वस्यतत्क्रियायांघटयितुमशक्यत्वादितिचेत्तर्हिविभागएवशक्तिरस्तुतस्यैवाधेय
तासंबंधेनप्रकृतार्थविशिष्टस्यस्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकत्वसहितजनकतासंबंधेनक्रियायामन्व
यउपेयतांतावतापुस्तकस्थलेपत्रात्पत्रंपततीतिप्रयोगप्रसंगवारणसंभवात् आधेयतयापत्रविभागज
नकत्वंतत्क्रियायास्तादृशविशिष्टाश्रयत्वस्यत्रनिष्ठभेदप्रतियोगितावच्छेदकत्वस्यतत्क्रियायामभावादित्यलम
धिकेन।अत्रजनकतासंबंधस्यवृक्षस्यनियामकतयापूर्ववदाकाशात्पततीतिवृक्षादित्यत्रानुपपत्तिरितिविभा
गजनकत्वमेवार्थोवाच्यइतिलाघवमित्यस्वरसः।अतइतिनिगमनस्थायास्तस्मादितिपंचम्यालाक्षणि
कत्वान्निगमनवारणायेतिशेषः।पंचम्यंतेतीतितथाचपंचमीपदस्यपंचम्यंतत्वाभावान्नातिव्याप्तिरितिभावः
नन्वेवमपिपंचम्यंततत्पदस्यतादृशधूमादिपदवद्धूमादिज्ञानेलाक्षणिकत्वात् दुर्वारैवनिगमनातिव्याप्तिरत
आह।तस्मादित्यत्रेतितत्पदेनलक्षणेतिनधूमादिज्ञानशक्तिविरहइत्यर्थः।तेनतत्पदशक्यधूमादिनांतज्ज्ञान
स्यसंबंधसत्वाद्युक्तिज्ञानेश्वरस्यकालेशक्यसंबंधग्रहात्पदांतरस्येवतत्पदस्यापितादृशार्थबोधकतायाअ

विशि

तु

नचवह्निसामग्रीघटकतया वह्नेर्हेतोः प्रक्रांतत्वेपि ज्ञानस्याप्रक्रांतत्वात्तत्पदेन बोधनासंभवः वह्नौ चायोग्यतया न हेतुत्वस्यान्वयसंभव इति वाच्यं प्रमितवह्निसामग्रीमत्वादेस्साध्यत्वेन वह्निज्ञानादरपि प्रक्रांतत्वेन पंचम्यर्थहेतुत्वान्वयोपपत्तेरिति ६

वा

शक्यापलापत्वाच्च तत्पदे लक्षणायास्तथाबोधकत्वस्य दुरपन्हवत्वेपि न क्षतिः लक्षणेव लाक्षणिकत्वं वाच्यार्थतात्प र्यराहित्समतो निगमने तत्पदस्य तात्पर्यविषयीभूतधूमज्ञाने लाक्षणिकत्वेपि नातिव्याप्तिरित्यवधेयं। शक्त्यैवेति।

व त्व

तत्पदस्य बुद्धिस्थवाचकत्वात्। धूमादिज्ञानतात्पर्येणच प्रकृततत्पदप्रयोगे एतज्ञानस्य वक्तृबुद्धिस्थतायाआ वश्यकत्वात् विशिष्टहेतुज्ञानस्याप्रक्रांतत्वेपि न क्षतिरितिभावः। नन्वेवं तत्पदेन यत्र हेतुनिर्देशः तत्र पंचम्यं तल्ला क्षणिकपदाभावादव्याप्तिरित्यत आह। पर्वतइति वन्हिमान्तस्मादित्यत्र हेतुभूतधूमादरप्रक्रांतत्वाद्धेतोः प्रक्रां तत्वारक्षायैव वन्हिसामग्रीमानिति अत्रवन्हिरूपहेतोः प्रक्रांतत्वेन तत्पदेनस्फुटतरतत्परामर्शादितिभावः। सं प्रदायाननुयायिनां तथाप्रयोगादुर्वार एवेत्यत्र लक्षणवदंतीत्यनेनास्वरसः सूचितः प्रतिज्ञास्थसाध्यवाचकपद स्यज्ञाने लाक्षणिकत्वात्प्रतिज्ञायामपि पंचम्यंतपदव्यावृत्तिः संभवतीतिमतमुपन्यस्य दूषयति यत्त्विति। अथवानि गमनस्थवन्ह्यादिपदस्य वन्ह्यादिज्ञाने लाक्षणिकतया तस्मादिति पंचम्या जनकत्वं जन्यत्वं वार्थः। तथाच पंचमी मादायन निगमने व्यावृत्तिसंगतिः अवधित्वादेरिव जनकत्वादेरपि स्वरूपसंबंधरूपतया विनिगमकाभावेन जन्य

णा
भासते

तस्यापिवाच्यत्वेन पंचम्या अलाक्षणिकत्वादिति वादिनो मतं दूषयति यतिति। एवंचाग्रे जन्यत्वे शक्तावपिज्ञाप्यत्वे
लक्षणैवेत्युपसंहारः संगच्छते हेतन्वयानुरोधादिति हेतन्नुशिष्टपंचम्या जन्यजनकभाव एवार्थः। नतुज्ञाप्यज्ञा
पकभावः। हेतुर्नाकारणंबीजमितिकोशाद्धेतुकारणपदयोः पर्यायतास्थितेः ज्ञापकतार्थकतायाः हेतुपदस्यको
शादावदर्शनात्। तथाच प्रतिज्ञास्थवन्ह्यादिपदस्यमुख्यार्थपरत्वे मुख्यार्थस्य वन्ह्यादेर्धूमज्ञानाद्यजन्यत्वेनज्ञान
लक्षणांविना पंचम्यर्थान्वयानुपपत्तिः स्यादितिभावः ज्ञानलक्षणा वन्ह्यादिज्ञानलक्षणापक्षेचतस्यविषयतासं
बंध एवमनुबर्थः ज्ञानविषयतापर्यंतमेववावन्ह्यादिपदार्थ इतिभावः। ज्ञापकत्व इति प्रकृत्यर्थस्येति कर्मत्वादी
नां सुबर्थतावादिप्राचीनमतेन ज्ञाप्यत्वेवेतिनव्यमतेन तत्र वन्ह्यादिपदे लक्षणायांलक्षणानिर्वाहकतात्प
र्यमानाभावादिति जन्यजनकभावस्य पंचम्यर्थत्वेपितल्लाक्षणिकतायाआवश्यकत्वात्तन्नैवज्ञानांतर्भाविणो
पपत्तौ उभयत्रलक्षणायाअयुक्तत्वादितिभावः। नन्वेकविभक्त्येकानुशासनिकातिरिक्तेनलक्षणा अनुशासनं
विज्ञानितत्वल्लक्षणार्थे निमित्तं साधुत्वे कर्मत्वादि [illegible] लक्षणार्थे प्रकाराचानुशासनेन प्रयोज्यत्वादि [illegible] कथनेन तादृशनिवाच्यतां हि

ताविति। तृतीयाबोधकसूत्रस्थहेतुपदस्य कारणज्ञापकोभयपरतया तदनुवृत्तिमत्ता। विभाषा गुणेऽस्त्रियामिति
सूत्रे ज्ञापकत्वेऽपि पंचम्या अनुशिष्टत्वात्। [illegible] पि तत्र गुणपदं न वैशेषिकसिद्धगुणपरं पुण्यभावान्नस्करवी
सादौ पंचम्यनुपपत्तेरिति पराश्रितपरं तत्र पराश्रितत्वं च साध्यवदधिकरणाश्रितत्वं तथा सति उक्तस्थले पुण्याभा
वादेः स्वप्रयोज्यस्फुरत्वाद्यभावाश्रयवृत्तितया तत्संयोजकत्वाव पंचम्युपपत्तेः तथा च ज्ञानकारणतावादिमते धूमा
दिपदार्थज्ञानरूपहेतुः साध्यवति न समवायादिना वर्तते तथापि विषयतयैव तत्र वृत्तिरिति नानुपपत्तिः। एवं
सति धूमज्ञानाद्वह्निमानिति प्रयोगः स्यादिति तु न देश्यं ज्ञापकताबोधकपंचम्यंत तत्तदर्थवाचकपदस्य तत्तद
र्थज्ञान एवानादितात्पर्यात् धूमज्ञानपदस्य धूमज्ञानजज्ञान एव तात्पर्यात् ज्ञानज्ञाप्यत्वस्य पंचम्यर्थतामते च ज्ञा
नविषयधूमादिरूपहेतोः संयोगादिनैव साध्यवदाश्रितत्वान्नानुपपत्तिगंधोऽपि प्रतिज्ञास्थवह्न्यादिपदस्य मु
ख्यार्थपरत्वं मणिकृतापि स्वरसं दर्शयति अत एवोक्तमिति आवृत्ताविति तेन ग्रंथेन पुनरनुसंधीयमानेन स्व
प्रतिवादिवाक्यसहकारेण बुध्यस्थसंशयजनकस्य पूर्वोक्तसाध्यवधर्मिबोधकवादिवाक्यस्य प्रतिज्ञात्वमस्तु

गदा० अ०
६७

पगतं तत्र च वन्ह्यादिपदं तत्तज्ज्ञानादिपरं तथा सति विषयसंशयकत्वासंभवात् विप्रतिपत्तिवाक्याभ्यां कोटयुप
स्थितिद्वारा मानसः संशयो जन्यत इति सिध्यांतिभिरपि वन्हिः पर्वतो भाव इत्यादित आकांक्षारहिताद्बुद्धोसंश
यानुदयेन धर्मिणि तत्तदभावकोट्योः प्रसक्तं शाब्दधीजनकसामग्रीभ्यामेव परस्परविरोधेन शाब्दबोधमनु
त्पाद्यमानस्य संशयो जन्यत इत्यभ्युपगमात्। प्रतिवादिनिवृत्तपर्वतवन्हिः साधनीय इत्यभिसंधेः प्रथमतो
नियमात् शब्दादेव पर्वते वह्निनिश्चयो भविष्यतीत्यभिप्रायेणापि प्रथमं पर्वतो वह्निमानित्यादिप्रयोगात् पूर्व
प्रयुक्तवन्हिपदस्य सर्वत्र ज्ञानपरत्वासंभवाच्चेति भावः। वर्धमानोपाध्यायानामपि पंचम्या ज्ञापकत्वार्थके
ते संवादमाह। अत एवेति। यथासंभवमिति। समभिव्याहृतद्रव्यादिपदार्थजन्यनिरूपत्वययोग्यतानुसा
रेणेत्यर्थः। नन्वावृत्तौ सैव प्रतिज्ञेति मणिकृतोऽभ्युपगमवादः। न तु तत्र निर्भरः मध्यस्थसंशयात् परतोपि
हेतुवाक्यसमभिव्याहृतसाध्यनिर्देशस्य सांप्रदायिकत्वात् हेतुत्वं यथासंभवमित्युपाध्याय ग्रंथोपि पंचमी
प्रतिपाद्यहेतुत्वं क्वचित्समभिव्याहृतपदमुख्यार्थनिरूपितं क्वचित्तु लक्ष्यार्थतज्ज्ञाननिरूपितं कारणत्वमित्य

र्थकतयोपपद्यतेयदप्युक्तमुभयपदेलक्षणानौचित्यमितितदपिशिथिलंज्ञापकतायाःपंचम्यर्थत्वेस्वत्वस्यहेतुप
दस्यउभयपरतयावाक्यभेदापत्तेरनुषंगसनानुरोधेनोभयत्रलक्षणायाएवोचितत्वादित्यतोयुक्त्यंतरमाह।अ
तएवेतिजिज्ञासाप्रश्नः।धूमवत्वादित्युत्तरंचेतिप्रयुज्यतइतिशेषः।उपष्टंभंविवृणोतिवह्नीतिज्ञानेप्रश्नइतिप्र
श्नस्यवह्निपदंवह्निज्ञानपरमित्यर्थः।वह्नेरेवजिज्ञासितत्वादितिशेषः।लक्षणयाज्ञानेनोत्तरस्येति।लक्ष्या
र्थज्ञानपरमुत्तरवाक्यमित्यर्थः।अपितुप्रश्नसमानविषयकत्वानुरोधेनमुख्यार्थवह्निपरमेवतादृशमुत्तरंप्रयु
क्तमितिशेषः।तथाचतत्रवह्नेःकुतइतिधूमादितिचप्रश्नोत्तरवाक्ययोर्यपंचम्यौतदर्थान्वयानुरोधेनज्ञा
पकत्वंज्ञाप्यत्वंवापंचम्यर्थोवाच्यइतिभावः।ननुप्रथमप्रश्नानुरोधाद्वह्निपदस्यवह्निपरत्ववत्कुतइतिप्रश्न
स्यपंचम्यर्थान्वयानुरोधात्तदुत्तरधूमादितिपंचम्यर्थान्वयानुरोधाज्ज्ञानपरत्वमप्यविरोधात्।एकदाशक्य
लक्ष्यार्थानन्वयेपिवृत्तिंबोधयित्वाज्ञानेबोधयिष्यतीत्यभिप्रायेणैव।एकपदप्रयोगेबाधकाभावात्।अत
एवतथाविधतात्पर्यानुरोधेननानार्थस्थलेप्यावृत्तिरित्यतआहनचेति।परकीयभाविप्रश्नानुरोधादितित।

दृश प्रश्नस्वीयतदुत्तरवाक्यस्य पंचम्यर्थान्वयानुरोधादित्यर्थः। अजिज्ञासिताभिधानं प्रथमजिज्ञासाविषयज्ञा
नप्रसायनेच्छयावह्निपदप्रयोगः परकीयत्वेनभावित्वेनच प्रथमं कुतइतिप्रश्नस्य अज्ञानात् परकीयवह्निज्ञानहे
तुजिज्ञासायाअज्ञानेनवह्निज्ञानप्रसायनेच्छायाः प्रथममसंभवादितिहेतुसूचनाय परकीयभावित्वाभिधानं
ननु तत्र ज्ञातमित्यध्याहारः। कुतइतिपंचम्यर्थस्यज्ञानेऽन्वयो न तु वह्नावित्यत आह। नवेतिप्रश्नस्य पदस्योत्त
रवाक्येनुषंगस्य व्युत्पत्तिसिद्धत्वात् कुतइत्यत्र ज्ञातमित्यध्याहारेणैव धूमादिसत्तापि ज्ञानान्वयसंभवात्तत्राध्या
हारांतरविरहेपिनक्षतिरित्यतः कुतइत्यत्रैवाध्याहारः शंकितः मानाभावादितिपदार्थांतरान्वयस्यवक्तुरनभि
प्रेतत्वनिश्चयेपिबाधस्यानुभाविकत्वात्। सर्वत्राश्रुतपदकल्पनासंभवादित्यर्थः। इदंत्ववधेयं गृहे वह्निमदिति
प्रयोक्तुः वह्निपदज्ञानतात्पर्यं कुतइतिवाक्यजन्येज्ञानहेतुजिज्ञासाबोधेनुपयुक्तं स्वाभिप्रायस्य बोधाहेतु
त्वात् कुतइति पृच्छकतात्पर्यस्यैव तत्रोपयोगात् तथा च स्वजिज्ञासां बोधयितुकामस्य कुतइतिप्रयोक्तुः परप्रयुक्त
वह्निपदलक्षणया वह्निपदोपस्थापितं ज्ञानमादाय कुतइतिपंचम्यर्थान्वयो भवतीत्यभिप्रायं ज्ञात्वैव प्रतिव

क्तोप्रवृर्वन्हिज्ञानहेतुजिज्ञासांकुतइतिशब्दादनुषज्यमानस्वोक्तवन्हिपदसहितात्ज्ञास्यतिएवंगृहंवन्हिमदि
तिप्रयोक्तुः प्रथमंवन्हिपदेज्ञानतात्पर्यविरहेपिकुतइतिप्रश्नानंतरंप्रवृर्वन्हिज्ञानहेतुजिज्ञासायाज्ञानेकिमर्थम
न्यद्वन्हिपदंप्रयोक्तव्यंपूर्ववन्हिपदाल्लक्षणयोपस्थितिज्ञानमादायैवधूमादितिवाक्यंधूमज्ञानेवन्हिज्ञापकतांबो
धयतीत्यभिप्रायसंभवात्तज्ज्ञानेनधूमादितिपंचम्यर्थस्यज्ञानान्वयोभविष्यतीतिकिमनुपपन्नंनहिप्रयोक्तुः
पुरुषस्यैकार्थतात्पर्यंपुरुषांतरीयान्यार्थतात्पर्यविरोधिअन्यैरन्यतात्पर्येणप्रयुक्तान्यपिपदान्यादायान्यार्थ
परश्लोकस्यमौनिनानिबंधनात्। नवास्तीयंप्राथमिकमन्यतात्पर्यमुदीश्यापरतात्पर्यविरुणद्धिबीजाभावा
त्प्रयुज्यतेत्ववन्ह्यादिपदस्यवन्ह्यादिप्रकारकज्ञानविषयत्वलक्षणसाध्यान्वयिजन्यज्ञानविषयत्वस्यपंचम्य
र्थत्वेगुणःसत्तावानद्रव्यत्वादित्यादिप्रयोगस्यदुर्वारतापातात्। द्रव्यत्वादिज्ञाप्यसत्तादेर्गुणादावपिसत्वात्
साध्यवाचकपदस्यलाक्षणिकत्वपक्षान्वयिसाध्यतावच्छेदकविशिष्टसाध्यप्रकारकज्ञानविषयत्वरूपसाध्य
वाचकपदार्थपंचम्यंतार्थलिंगज्ञानप्रयोज्यत्वान्वयात्। द्रव्यत्वादिप्रकारकज्ञानप्रयोज्यसत्तादिप्रकारकज्ञान

विषयत्वस्य गुणादौ बाधेन कथितातिप्रसंगवारणासंभवात् । न च जन्यज्ञानविषयत्वरूपपंचम्यर्थस्य साध्यविशिष्टप
क्षत्वयः स्वीक्रियते सत्तादिरूपसाध्यविशिष्टगुणादिरूपपक्षस्य न द्रव्यत्वादिलिंगज्ञाप्यतेति नातिप्रसंगः वन्ह्यादि
मतः पर्वतादेर्द्रव्यत्वादिरूपसाध्यविशिष्टस्य पृथिवीत्वादिज्ञाप्यत्वेपि वन्ह्यादिविशिष्टस्य न तथात्वमिति विशेषणा
वच्छिन्न एव एव पंचम्या ज्ञाप्यत्वबाधकत्वान्न पर्वतो वन्हिमान् पृथिवीत्वादित्यादिप्रयोगः विषयतायाः पर्याप्तिसंबंधे
न विशिष्टे त्वयोपगमात् द्रव्यत्वादिरूपसाध्यवत्वेन वन्ह्यादिरूपपक्षतावच्छेदकविशिष्टपर्वतादेः पृथिवीत्वादि
ज्ञाप्यत्वेपि न क्षतिरिति वाच्यं एवमपि द्रव्यत्ववान् पर्वतो वन्हिमान् धूमान् पृथिवीत्वादित्यादौ न अर्थान्वया
नुपपत्तेर्दुर्वारत्वात् । पृथिवीत्वज्ञाप्यतापर्याप्त्यधिकरणद्रव्यत्वविशिष्टपर्वतादौ वन्ह्यादिरूपविशेषणांतरा
वच्छिन्नेपि तज्ज्ञाप्यताविरहासंभवात् । अस्मन्मते च तत्र पर्वताद्यन्वयिनि वन्ह्यादिप्रकारकज्ञानविषयत्वे पृ
थिवीत्वादिरूपलिंगज्ञानप्रयोज्यत्वस्य पंचम्यर्थस्याभावान्वयात् । तदभावस्य तत्राबाधेनानुपपत्तिविर
हात् । एवं साध्ये ज्ञाप्यत्वान्वयपक्षेपि उक्तप्रयोगानुपपत्तिर्द्रष्टव्या वन्ह्यादेरपि प्रमेयत्वादिना पृथिवीत्वादिज्ञा

प्यत्वात् यदि च प्रयोज्यत्वं समभिव्याहृतपक्षविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नविधेयताशं च खंडशो लक्ष
णया पंचम्यर्थः अन्वयबलात्साध्ये पक्षांशे तत्तद्रूपेण हेतुज्ञाप्यतालाभः न भूसमभिव्याहारस्थले च लिंगज्ञाना
न्वित प्रयोज्यत्वरूपकार्थस्य निरुक्तविधेयतानू[illegible]पापंर पंचम्यर्थभावेन आप्रत्याय्यते इत्युच्यते न तदा साध्यता
पक्षतावच्छेदकादेर्द्विधानानाद्दौरवं साध्यान्वयिनी पक्षविशेष्यतानिरूपितविधेयता पक्षान्वयिनी साध्यवि
धेयतानिरूपितविशेष्यता वा पंचम्यर्थ इति विनिगमनाविरहः एकपदस्यार्थद्वये खंडशो लक्षणापदद्वयस्य

जनकत्व

व वा प्रत्येकमर्थद्वये लक्षणे सत्कोविशेष इति प्रसंगतः पंचम्याँ ज्ञापकत्वार्थकत्वं न भूर्थत्वयस्थलेनुपपत्तिदर्शनेन
निराकुर्वन् जन्यत्वज्ञाप्यत्वार्थकत्वं व्यवस्थापयति। दाहो दहनादित्यादिना गंधस्य ज्ञापकता पक्षधर्मताविरहेण
शब्दस्य अतथात्वं व्याप्तेरपि विरह इति प्रदर्शनार्थं उभयोपादानं न अर्थान्वयानुरोधादिति। जनकत्वज्ञापकत्वयोः
पंचम्यर्थत्वे निरूपकतासंबंधावच्छिन्नाभावाप्रसिध्या आश्रयतासंबंधावच्छिन्नाभावप्रत्यय एव हेत्वंशे स्पर्शादौ
स्वीकार्यः तथा च तत्र जलगंधनिष्ठजनकत्वज्ञापकत्वयोरविदहनरूपादिनिष्ठयोरपि तयोरभावसत्त्वेन दाहो

नदहनात्। जलंस्पर्शवन्नरूपात् इत्यपि स्यात् इतिभावः नच दाहादिविशेषित्तजनकतादेरेवाभावस्तत्र दहनजलादि
रूपप्रकृत्यर्थे प्रतीयत इतिवाच्यं। प्रथमांतार्थस्य पंचम्यर्थविशेष्यतयैव शब्दात्प्रतीतेर्दाहादिविशेषितजनकत्वादिरुप
प्रतियोगिनः शब्दानुपस्थितस्य नञाभावबोधनासंभवात्। पंचम्यर्थस्य प्रकृत्यर्थान्यपदार्थविशेषितस्यापि नञ्
समभिव्याहारस्य लभ्यानापगमे व्युत्पत्तिभेदाद्गौरवं सर्वत्रैव प्रकृत्यर्थे विभक्त्यर्थो विशेषणं तत्र निरूपकतया सम
भिव्याहृतपदार्थांतरमिति चानुभवसिद्ध प्रथमांतपदार्थविशेष्यताभंगेनासंभवदुक्तिकं इंधनस्य दाहो दहना
दित्यादौ तुल्यमुक्त्या दहनादेर्दाहजनकत्वादिविशेष्यत्ववत् इंधनादेरपि दाहसंबंधादिविशेष्यतया इंधनं दा
हसंबंधि दहनाद्दाहजनक इत्यादिसमूहालंबनबोधस्य स्वीकारेण वाक्यभेदप्रसंगात्। यत्रान्यस्य दाहो दहनान्नैत
दिंधनस्य तत्रैतदिंधनस्य दाहो न दहनादिति प्रयोगानुपपत्तिश्चेति अन्यवृत्तिजन्यतायाः पंचम्यर्थत्वेपि दाहो न पर
माणुपरिमाणादित्यादिप्रयोगानुपपत्तिः पारिमांडल्यस्य कार्यसामान्यजनकतया परमाणुपरिमाणादिजन्य
ताप्रसिद्धेर्नञर्थप्रतियोगितयान्वयासंभवात् दाहाद्यन्वपि निजन्यत्वे प्रकृत्यर्थस्य निरूपितत्वसंबंधेनाभावबो

धोपगमेऽत्र वृत्तिनियामकसंबंधावच्छिन्नाभावाभ्युपगमः लक्षणया प्रकृत्यर्थनिरूपितत्वस्याप्रकृत्यर्थस्याभावात्त्वयोपग
मेऽपि गगनं न परमाणुपरिमाणादित्यादौ गगनादौ जन्यत्वान्वययोग्यत्वादनुपपत्तिः पारिमांडल्यनिरूपितत्वस्य प्रकृ
(त्यर्थस्याभावात्त्वयोपगमेऽपि भावत्वजन्यत्वाभाववद्गगनमित्याकारकस्याद्विधानार्थावगाहिन्याः प्रतीतेरुपगमेन घटो
न पटजनकादित्यपि स्यात्। पटजनकाद्यनिरूपितजन्यत्वाभावस्य घटादावबाधात् दंडाद्यनिरूपितजन्यत्वाभावस्य
पटादौ बाधेन पटो न दंडादित्यादावप्यनुपपत्तेश्च गगनादौ जन्यत्वभ्रमदशायां गगनं न पारिमांडल्यादित्या
दिवाक्यस्याबोधकतापत्तेः। पंचम्यर्थजन्यतासामान्ये लक्षणया प्रकृतरूपस्य पारिमांडल्यनिरूपितत्वगग
नवृत्तित्वोभयत्वावच्छिन्नाभावस्य बोधोपगमे तु जनकतायाः पंचम्यर्थत्वेऽपि तत्सामान्ये लक्षणया प्रकृतरूपस्या
प्यस्य पारिमांडल्यवृत्तित्वगगननिरूपितत्वोभयत्वावच्छिन्नस्याभावबोधोपगमेन सामंजस्यं न च तत्र लक्ष
णाया आवश्यकत्वात्पि दाहो न जलादित्यादौ लक्षणां विनैवापत्तौ जन्यत्वस्य पंचम्यर्थत्वमुचितमिति वाच्यं।
जलादेरपि कार्यजनकत्वभ्रमदशायां दाहो न पारिमांडल्यादित्यादाविवान्वयबोधस्यानुभविकत्वात् तदनुरोधे

गदा०अ०
७१

नतथापिजन्यतायांजलादिनिरूपितत्वाभावबोधस्यावश्यंभावादिति अन्वेतत्वंशशविषाणंनास्तीतिवाक्यवत्ह्रदाहोन
यारिमंडल्यादित्यादिवाक्यमप्रमाणंभवतद्वाक्यस्यप्रामाण्यानुरोधेनलक्षणयापारिमांडल्यादिनिरूपितत्वाभावबो
धस्यकचिदभ्युपगमेपिह्रदाहोनजलादित्यादिवाक्यतालक्षणाज्ञानशून्यकालेप्यन्वयबोधस्यानुभविकतयाजन्यत्वा
भावबोधकतापितादृशवाक्यस्योपगंतव्येतिजन्यत्वपंचम्यर्थइति।जन्यज्ञानविषयत्वमितिजन्यत्वान्वपिप्रकृत्यर्थ
ज्ञानंभ्रमभिन्नंग्राह्यं अतोव्याप्तिपक्षधर्मतावगाहिभ्रमरूपह्रदत्वादिज्ञानस्यपर्वतादौवन्ह्याद्यनुमापकत्वेपि
पर्वतोवन्हिमान्ह्रदत्वादित्यादिप्रयोगस्यनापत्तिः नवापर्वतोवन्हिमान्धूमात्नह्रदत्वादित्यादिप्रयोगानुपपत्तिः
यद्यपियत्किंचिद्विषयकभ्रमान्यत्वंभ्रमसाधारणंभ्रमसामान्यत्वंचतदभाववतितत्प्रकारकत्वरूपभ्रमत्वस्यत
त्तत्प्रकारसंबंधविशेषघटितत्वेनाननुगततयाअगतीगतयावद्भ्रमभ्रमान्यत्वंतत्तद्भ्रमत्वावच्छिन्नभेद
कूटरूपमितिदुर्ज्ञेयं।तथापिप्रकृतसाध्यहेतुपक्षकपरामर्शप्रकारीभूतायेयेतत्तत्प्रकारकभ्रमभिन्नत्वमे
वविशेषणंदेयं यद्यपिधूमादिमत्यपिपर्वतादौसमवायादिसंबंधावच्छिन्नधूमाद्यभावसत्वात्पर्वतादौधूमा

दिप्रमायाः संग्रहाय यत्तत्संबंधेन हेतुप्रकारकज्ञानं यत्र हेतुवाचकपदेन विवक्षितं तत्र तत्संबंधावगाहितत्प्रकारक
भ्रमान्यत्वं प्रतीयत इत्युपगंतव्यं तथा च स्वरूपादिसंबंधेन प्रमेयत्वादेर्यत्र हेतुत्वं तत्र तत्तत्संबंधेन तत्तद्भ्रमाप्रसि
ध्या तदन्यत्वं दुर्ग्रहं तथापि तत्र तादृशभ्रमान्यत्वप्रतीतिरेव न स्वीक्रियते तेन न दोषः। [illegible] स्वानुयोगिनिष्ठ
विशेष्यतानिरूपितत्वस्वप्रतियोगिनिष्ठत्वस्वावच्छिन्नत्वैतत् त्रितयसंबंधेन संबंधविशिष्टान्यप्रकारताशालि
त्वमेवानुगतं भ्रमत्वं स्फुटं च अतो भ्रमविषयतयैव प्रमेयत्वं वाच्यत्वादिज्ञापकमिति भ्रमदशायां वाच्यं प्रमेयत्वादि
त्यादिप्रयोगस्य तादृशप्रयोगाधीनबाधस्य च वारणाय प्रमेयत्वादिज्ञानस्यापि तद्भ्रमान्यत्वेनैव पंचमीप्रकृत्यर्थता
वाच्यासा वाप्रसिध्या न संभवतीति दूषणमनवकाशं निगमनस्थपंचम्या लाक्षणिकत्वमुपसंहरति। [illegible]। एवं
च पंचम्या जन्यज्ञाप्यभावार्थकता स्थिता च हेतुमते जन्यत्वज्ञाप्यत्वलक्षणैवेति जन्यत्वादिपक्षे यातनस्पर्शरीरगौर
वादिति भावः। नन्वेति धूमादालोकवान् पर्वतो वह्निमानिति प्रतिज्ञाघटितन्याये आलोकादेर्हेतुत्वे प्रकृतहेतुत्वाभि
त स्वार्थकपंचमीनिवेशनापि वारणसंभवाद्धूमादिति हेत्वभिधानं अतश्च पंचम्याः प्रकृतसाध्यान्वितस्वार्थबोधकत्व

विशेषणमात्रेणातिव्याप्तिवारणासंभवात्तादृशसाध्ये विवक्षणीयोपस्थापितांतविशेषणव्यावृत्तयेस्थलांतरेतिव्या
प्तिं दर्शयति। धूमाद्वन्हिमान् इति अत्र वन्हिमत्वेन पक्षस्याभिधानात्। विवक्षणीयविशेषणे पक्षतावच्छेदकपर्यंतनि
वेशस्याप्युक्तत्वव्यावृत्तिः साध्यतावच्छेदकावच्छिन्नतांशनिवेशनायस्थलांतरेतिव्याप्तिं दर्शयति। पर्वतो धूमात् वन्हिमा
निति तत्र संनिगमने तस्माद्धूमाद्वन्हिमानित्याकारके अत्र पंचम्यर्थविशिष्टवन्हित्वमेव साध्यतावच्छेदकमिति तदव
च्छिन्नसाध्ये पंचम्यर्थानन्वयात्। साध्यतावच्छेदकविशिष्टान्वितस्वार्थबोधकत्वनिवेशेनातिव्याप्तिः धूमाद्वन्हिमतः
सम्भेत्सादौ प्रकृतपक्षतावच्छेदकावच्छिन्नयस्यसाध्यस्य द्वितीयवन्हिपदजन्योपस्थितिविश्गदन्वयः प्रथमवन्हिपदो
पस्थापितत्वेनैव प्रतिज्ञाघटकपंचम्यर्थे स्यान्वयात्। पक्षान्वितसाध्यान्वितस्वार्थबोधकत्वविशेषणेन वारणासं
भवात्। साध्ये प्रकृतपक्षान्वितत्वं विहाय प्रकृतपक्षान्वितस्वार्थबोधकपदोपस्थापितत्वं निवेशितं यद्यप्युभयव
न्हिपदेनैकमपि साध्यमुपस्थाप्यते अतो नैतावताप्युक्तातिव्याप्तिवारणसंभवः तथापि प्रकृतपक्षतावच्छेदका
वच्छिन्नविशेष्यतानिरूपितायाविशेषणतातदवच्छिन्नसाध्यतावच्छेदकविशिष्टसाध्योयविशेष्यतानिरूपि

तत्स्वार्थविषयताप्रयोजकं बोधकांतार्थ अतः पंचमीत्वम निवेश्यं प्रयोजनाभावात् उपनयोपस्थापितपक्षविशेषण
तापन्नसाध्यान्वितार्थकपंचम्यंतत्तत्पदमादायानानुषंगे पक्षेपि निगमनेतिव्याप्तेर्वारणं लाक्षणिकपदप्रयोजनं अय
मात्मा ज्ञानादिमान् ज्ञानयदमुख्यार्थपरमेव पंचम्यर्थान्वयस्य तत्रैव संभवेन लक्षणाबीजभूतान्वयानुपपत्तिविरहा
दिस्मिमानिनां उक्तलक्षणाव्याप्तिशंकामुद्धर्तुमुपन्यस्यति यत्विति शुद्धज्ञानतावच्छिन्नेनसमं पंचम्यर्थान्वयसंभ
वेपि अनुमितिजनकज्ञानविषयतया ज्ञानापस्थितावज्ञानरूपहेतौ तद्विषयतानिर्वाहकव्यापाराकांक्षायां यो ज्ञान
वान् स आत्मा इत्युदाहरणादिप्रयोगसंभव इति ज्ञानविषयकज्ञानत्वावच्छिन्नेतात्पर्यानुपपत्त्या लक्षणया आवश्य
कत्वमिति समाधत्ते तन्नेत्यादिना यद्विषयकज्ञानस्य यद्विषयकज्ञानत्वावच्छिन्नस्य हेतुत्वमनुमितिजनकत्वं तस्य व्या
प्यादितिज्ञासायां तुल्यवित्तिवेद्यतया अर्थतो वा तत्र प्रतीतानुमापकज्ञानविषयतायाः निर्वाहकाकांक्षायामिति सर्वथा उप
हत्यादिप्रयोग उदाहरणोपनयाभ्यां तन्निष्ठव्याप्तिपक्षधर्मताप्रदर्शने यद्यपि ज्ञानविषयकज्ञानत्वावच्छिन्ने ज्ञान
पदस्य तात्पर्येपि मुख्यार्थज्ञानतावच्छिन्नपरत्वमक्षतमेवेति पूर्वोपदर्शितमुख्यार्थतात्पर्यराहित्यरूपं लाक्षणिक

तन्नोपपद्यते तथापि शक्यतावच्छेदकविलक्षणरूपावच्छिन्नपरत्वमेव लाक्षणिकत्वमतो न दोषः ननु धूमादिज्ञानत्वावच्छि
न्नेऽनुमापकत्वबोधेपि तन्नतन्निर्वाहकव्याप्त्यादिमद्विषयकत्वलाभाय वस्तुगत्या तादृशज्ञानविषयीभूतज्ञानेव्याप्त्यादि
प्रदर्शनसंगतिरित्यत आह। अन्यथेति जनकज्ञानविषयतयाऽप्रतीतज्ञानेवास्तवतादृशविषयतां पुरस्कृत्य व्याप्त्यु
प्रदर्शने सम्वादेरप्यासत्वानुमापकज्ञानविषयतया अयमात्मा ज्ञानादिसन्वयः स्कृवीस आत्मेत्याद्युदाहरणादि
प्रयोगप्रसंगादित्यर्थः। तथा च सम्वादौ व्याप्त्यादिप्रदर्शनेपि ज्ञानेनुमापकत्वनिर्वाहकव्याप्त्यादिमद्विषयकत्वपर्यंता क
लाभादाकांक्षाया अपूरणात् यथा सम्वादौ न तत्प्रदर्शनं तथैतन्मते ज्ञानेपि तत्प्रदर्शनं नोपपद्यत इति भावः
उक्तप्रतिज्ञादावतिव्याप्तिवारणाय प्रकारांतरेण लक्षणं परिष्कुर्वतां मतमाह केचित्विति पंचम्यंतेति कस्याश्चित्
प्रतिज्ञायाः पंचम्यंतलाक्षणिकपदवत्वेपि धूमज्ञानज्ञाप्यालोकवान् पर्वतो वह्निमानित्यादिप्रतिज्ञायां व्यभिचारेण
वयवतावच्छेदकं प्रतिज्ञात्वं पक्षादिभेदेन भिन्नमपि न तादृशपदवत्वनियतमिति नातिप्रसंगः इति भावः तादृशाव
यवतावच्छेदकं हेतुत्वं दुर्वचं एवं च तेनैव लक्षणमित्यन्यथा परिष्कुरुते तादृशेति तादृशपदं पंचम्यंतलाक्षिक ग

पदं प्रतिज्ञात्वादिकं च तादृशपदाघटितस्यापि प्रतिज्ञादेः सत्वेन तादृशपदवत्वव्यभिचारीति तच्छून्यत्वाभावान्न प्र
तिज्ञादावतिव्याप्तिः तादृशपदवत्वव्यभिचारिमयत्वादिशून्यताप्रसिध्या अवयवतावच्छेदकेति । अत्र प्रतिज्ञात्वहेतु
त्वादिसाधारणस्यावयवतावच्छेदकत्वस्यैकस्याभावात् प्रतिज्ञात्वादिकं विशिष्याप्यादाय तच्छून्यत्वं निवेश्यं तथा
च हेतुत्वव्यावर्तनाय योपात्त तादृशपदवत्वव्यभिचारित्वविशेषणमनर्थकं यदि च प्रतिज्ञात्वहेतुत्वादिसाधारण
प्रतिज्ञात्वादिपंचकान्यतमत्वमवयवतावच्छेदकत्वं तदा तत्र हेतुत्वप्रवेशेन स्यान्यादृशस्य दुर्वचत्वात्तूक्तवत्वे
तदेवास्तु लक्षणं अन्यतममध्ये हेतुत्वमंतर्भाव्य तद्व्यावर्तये विशेषणांतरदानं च प्रक्षालनाद्धीति न्यायेनायु
क्तमिति स्वरसः ॥ पंचमत्वं तत्सादिलक्षणकर्तुरनुमतं धूमादिसादिवाक्यस्य धूमादिपदस्य ज्ञानलक्षणं स्वातंत्र्य
मादूषयति भव्यास्त्विति ज्ञानज्ञाप्यत्वलक्षणप्रतिज्ञाप्यत्वलक्षणाया आवश्यकत्वात्तत्रैव ज्ञानांशस्याप्यधि
कस्य प्रवेशेनैव धूमादिविषयस्य मुख्यार्थपरत्वेपि धूमादिज्ञानज्ञाप्यत्वलाभसंभव इत्यर्थः नप्रातिपदिकेन
पंचमीप्रकृतिधूमादिपदेनान्वयं ज्ञानस्य पंचम्यर्थैकदेशतया तत्र धूमादिपदार्थस्यान्वयायोगाद्धूमादिः

ज्ञानालाभः नचज्ञाप्युत्तस्य पंचम्यर्थत्वेपिजन्यत्वरूपतदेकदेशे कथं धूमादिपदार्थतत्ज्ञानान्वय इतिवाच्यं।चैत्रस्य
पुत्रः घटादन्यइत्यादौस्वसंबंधिकपदार्थैकदेशजन्यत्वादौपदार्थांतरस्यान्वयदर्शनात् निष्प्रतियोगिकएवपदार्थैक
देशेइतरान्वयस्याव्युत्पन्नत्वात्। नचस्वतंत्रोपस्थितएवपदार्थेइतरान्वयजिज्ञासाजायतेनतुइतरविशेषण
तयोपस्थिते अतएव गौर्नित्येत्यादौस्वातंत्र्येणाद्युपस्थितये लक्षणाइत्यत आकांक्षाविरहएवपदार्थांतरस्यप
दार्थैकदेशेनान्वयेबीजं सचसप्रतियोगिकनिष्प्रतियोगिकैकदेशसाधारणइतिवाच्यं। कलशरोधेनसप्रतियोगि नु
कपदार्थविशेषणतयोपस्थितेपिप्रतियोगिजिज्ञासाजायतइतिकल्पनात्। नचज्ञानादिस्वविषयकपदार्थोपित
थोपस्थितविषयजिज्ञासाजायतइतिमुख्यतेकल्पकाभावादिसाशंक्यसविषयकृतिदृष्टांतेनपदार्थैकदेशज्ञा
नेपिविषयाकांक्षांव्यवस्थापयतिआकांक्षावैचित्र्यादिति कुत्रचित्स्वतंत्रोपस्थितएवइतराकांक्षाकुत्रचिद्वि
शेषणतयाप्युपस्थितेकस्यचिदाकांक्षेतिविषयस्वभावाधीनतया आकांक्षावैचित्र्यादित्यर्थः। कर्तृकृत्यावतिप
त्त्यादौतन्नाद्यर्थकर्तृकदेशेकृतौयथाविषयत्वेनपाकादिक्रियान्वयइत्यर्थः। इदंतुबोध्यं जिज्ञासारूपाकांक्षा ऽ

संबंधावच्छिन्नाभावस्य षष्ठ्याद्यंतचैत्रादिपदसमभिव्याहृतनञा बोधनेऽनुयोगिनि सप्तम्या अनपेक्षणेपि द्व
योरिदं नेदमेकस्यापीत्यादावगतिः। तथा हि स्वत्वस्य विशेष्यतेस्वनिरूपकनिष्ठभेदाप्रतियोगिनिरूपितं यत्स्व
त्वं तदभावबोधननिष्ठस्तत्र प्रतीयते। अप्रतियोग्यंतमेकपदार्थः सर्वत्र समभिव्याहृतपदार्थसंसर्गिनिष्ठभेदा
प्रतियोगित्वरूपस्य सजातीयद्वितीयरहितत्वस्य एकपदार्थत्वात् स्वत्वं द्व्यर्थः तथाविधं च स्वं एकमात्रनिरूपितं
स्वत्वं न तूभयनिरूपितं तन्निरूपकस्यैकपुरुषस्य तन्निरूपकपुरुषांतरनिष्ठभेदप्रतियोगितया तथाविधभेदाप्र
तियोग्यप्रसिद्धेरिति तादृशस्वत्वाभाव उभयधने अबाधितः स्वत्वसंबंधेन एकपदार्थस्याभावो यदि नञा बो
ध्यते तदा स्वस्वामिनिष्ठभेदाप्रतियोग्येकपदार्थो वाच्यः तत्र यदि स्वमभावस्यानुयोगि धनं तदाप्रसिद्धिः
प्रमेयमात्रस्यैवोभयस्वामिकं यद्धनं तत्स्वामिनिष्ठभेदप्रतियोगित्वात् यदि धनांतरमेकमात्रनिरूपितं तदा

स्वत्वन्

तस्यसमभिव्याहृतपदार्थत्वाभावादेकपदस्यतादृशार्थेसंबंधिनिष्ठभेदाप्रतियोगिबोधकत्वव्युत्पत्तिभंगः ए
कमात्रस्वत्ववधनांतरस्वामिचैत्रमैत्रोभयधनेनेदमेकस्येतिव्यवहारानुपपत्तिश्च एतदभिप्रायेणैवद्वयोरित्या
द्यनुसृतं इत्यमत्रावधेयं नेदमेकस्येत्यतः स्वनिरूपकनिष्ठभेदाप्रतियोगिनिरूपितत्वं किंचित्स्वत्वस्याभाववा
धे एकमात्रधनेपितथाविधधनांतरनिष्ठस्वत्वाभावसत्वात्तादृशप्रयोगप्रसंगः तादृशस्वत्वसामान्यस्य
चैकाभावोनसंभवतिप्रतियोगितावच्छेदकस्यस्वत्वघटितत्वेनाननुगमात् अभावकूटस्यासर्वज्ञदुर्विज्ञेय
त्वमिसेकत्वसंख्यावच्छिन्न एकैकपदार्थः तदन्वितस्वत्वस्योभयस्वत्वानिरूपितविशेषणताविशेषेणस्वत्व
स्यसमवेतत्वेतादृशसमवायेनवाभावः प्रतीयत इत्युपगंतव्यं तथाचोभयनिरूपितस्वत्वसंबंधेनप्र
कृतार्थस्याभावबोधोपिनसंभवतिउभयानिरूपितत्वं चस्वनिरूपितत्वस्वभिन्ननिरूपितत्वोभयसंबंधेन

किंचिद्विशिष्टं यत्तदन्यत्वमिति मनु स्वत्वस्य विशेष्यत्वेपि नेदं मैत्रस्येत्यादितः कथं स्वत्वसंसर्गाभावबोधः सं
सर्गाभावमात्रबोध एव नञा अनुयोगिनि सम्बन्ध्यपेक्षणादत आह चैत्रो न पचतीति । नामार्थप्रतियो
गिकाभावबोध एवानुयोगिनि सम्बन्ध्यपेक्षणादिति भावः । यथाश्रुतलिंगाविषयकत्वनिवेशे गंधवतीतरे
भ्योभिद्यते इत्यादावव्याप्तिं प्रकारांतरेणवारयतां मतमाह हेतुविषयकेति । कस्याश्चित्प्रतिज्ञाया हेतुविष
यकज्ञानजनकत्वेपि प्रतिज्ञात्वस्य हेतुविषयकज्ञानजनकत्वानियतत्वात्तन्नियतान्यावयवत्वावच्छेद
कानि हेतुत्वोपनयत्वनिगमनत्वान्येव न तु प्रतिज्ञात्वमिति नाव्याप्तिः हेतुबोधकप्रतिज्ञानिष्ठतत्तत्प्रति
ज्ञात्वादेस्तादृशज्ञानजनकत्वनियतत्वादव्याप्तितादवस्थ्यमतोवयवत्वावच्छेदकेति अभावहेतुकव्य
तिरेक्युदाहरणस्य लिंगाविषयकज्ञानजनकस्य संभवादुदाहरणत्वस्य तादृशज्ञानजनकत्वानियत

गंधात्

त्वादुदाहरणत्वव्याप्तिरत उदाहरणान्येति प्रतिज्ञात्वादेर्हेतुसाध्यपक्षभेदेन भिन्नत्वाद्गंधवतीत्तरेभ्यो भिद्य
ते गंधादिसाध्यव्याप्तिस्तदवस्थैव तादृशप्रतिज्ञानिष्ठस्य प्रतिज्ञात्वस्य हेतुविषयकज्ञानजनकत्वनिय
तत्वात्वहेत्वादिभेदेन प्रतिज्ञात्वाद्यभेदे तु प्रकृतहेतुविषयकज्ञानजनकत्वनियतावयवत्वावच्छेदकस्ये
व सिद्धेः नानाहेतुकहेत्ववयवादिसाधारणहेतुत्वादेरप्यतथात्वादिति स्वरससूचनाय केचिदित्ति जि
ज्ञासाफलोपधायकत्वस्याव्याप्तिमाशंक्याह। जिज्ञासेति। उदासीनेतिव्याप्तिवारणायत्यायावयवत्व
स्यावश्यन्निवेशनीयतया

याः शाब्दधीहेतुत्वं अभिज्ञासैरपि शाब्दबोधोदयान्मणिकृता निराकृतं तथा चाकांक्षाविरहेण पदार्थैकदेशे पदार्थांत
रानन्वयबीजं गौर्निःसारादौ गवादिपदार्थैकदेशगोत्वनित्यादिपदार्थभेदान्वयबोधप्रयोजिकायाः समानविभक्तिकतत्त
त्पदसमभिव्याहाररूपाया आकांक्षाया असत्त्वात् अतः पदाधीनायाः स्वतंत्रतदुपस्थितेः पदार्थांतरस्य तत्रान्वयबोध
हेतुतावाच्या एवं च ज्ञानविशिष्टार्थकात्मादिपदघटितादात्मा नद्रव्यमित्यादिवाक्यात्पदार्थैकदेशज्ञाने द्रव्यभेदान्वय
बोधवारणाय दंडजन्यो न दंडजन्यघट इत्यादिवाक्यात्। पदार्थैकदेशदंडजन्यत्वादौ दंडजन्यभेदान्वयबोधवारणाय कल्पनी
यज्ञानादेर्भेदेतरान्वयबोधे स्वतंत्रज्ञानाद्युपस्थितेर्हेतुत्वे कार्यतावच्छेदककोटिप्रविष्टेतरविषयतायां विषयित्वादि
संबंधावच्छिन्नप्रकारतात्वं विशेषणं देयं वस्तुतो ज्ञानादिविषयकशाब्दबोधे स्वतंत्रज्ञानाद्युपस्थितेर्हेतुत्वेपि
पंचम्यादिजन्यज्ञाप्यत्वोपस्थितिप्रकृतिजन्य धूमाद्युपस्थितियोग्यताज्ञानघटितशाब्दसामग्र्या पदार्थैकदेशज्ञा
नादौ विषयितादिसंबंधेन धूमादिप्रकारकशाब्दबोधजनने बाधकाभावः तादृशसामग्र्यां स्वतंत्रज्ञानाद्युपस्थि
तेरनंतर्भावात्। तादृशोपस्थितेर्ज्ञानादौ द्रव्यभेदाद्यन्वयबोधप्रयोजकसामग्र्यंतरे एव निवेशात्। न चैवं स्वतंत्र

ज्ञानाद्युपस्थितेर्व्यभिचारेण हेतुत्वमेव न संभवतीति वाच्यं यत्तो यत्रैकरूपावच्छिन्नपदे पदांतराकांक्षा गृहीतान्यरूपेण
च वृत्तिर्गृहीता तत्रातिप्रसंगवारणाय तत्तदानुपूर्वीविशिष्टरूपपदविशेषत्वप्रकारेण गृहीतवृत्तिकपदजन्यतत्तदर्थो
पस्थितेर्हेतुतावाच्या तथासति तत्तद्धर्मप्रकारेणाकांक्षादिग्रहस्य तद्धर्मप्रकारेणगृहीतवृत्तिकपदाधीनोपस्थितेः प
रस्परसहकारेणैव फलजनकत्वोपगमेनोक्तातिप्रसंगवारणसंभवात् तथा च नानानुपूर्वीप्रकारकपदजन्योपस्थिती
नामेकविधशाब्दबोधे विभिन्नरूपेण हेतुतया व्यभिचार आवश्यक इति न तद्वारणवर्त्मनैव दर्शितव्यभिचारस्यापि वारण
मिति। एतेन जन्यत्वांशे इतरान्वयबोधे स्वतंत्रजन्यतोपस्थितेः कार्यकारणभावकार्यतावच्छेदककोटिप्रविष्टेतरवि
षयतायां निरूपितत्वसंबंधावच्छिन्नप्रकारताभेदनिवेशनमुभयथापि सिद्धं अन्यथा औपगव इत्यादौ तद्धितार्था
पत्यैकदेशे जन्यत्वे निरूपकत्वेन प्रकृत्यर्थान्वयानुपपत्तेः ज्ञानज्ञाप्यत्वस्य पंचम्यर्थत्वमते च स्वतंत्रज्ञानोपस्थि
तिजन्यतावच्छेदकज्ञानविषयतानिरूपितेतरविषयतापि विषयतासंबंधावच्छिन्नप्रकारताभेदनिवेशनमधि
कमिति प्रसक्तं। तदनिवेशेपि दर्शितरीत्या सामंजस्यात् वैयाकरण इत्यादौ तदधीते तद्वेदेत्यनेन विहिततद्धितार्थ

स्यज्ञातुरेकदेशेज्ञाने विषयतया प्रकृत्यर्थस्यान्वयोपपत्तये उक्तस्थले। विषयतासंबंधावच्छिन्नप्रकारताभेदनिवे
शस्य सर्वमत एवावश्यकत्वाच्चेति प्रकृते मुख्यार्थपरत्वे युक्त्यंतरमाह। यद्धर्मविशिष्टस्येति यद्धर्मविशिष्टः पंचमीप्रकृ
त्यर्थ इत्यर्थः। तद्धर्मविशिष्टस्यैव व्याप्यत्वमुपदर्श्यत इति ज्ञानज्ञाप्यत्वस्य पंचम्यर्थतामते तद्धर्मविशिष्टस्यैव पंचम्या
जनकज्ञानविषयत्वबोधनत्वादिति भावः। अन्यथा पंचम्या ज्ञानजनकत्वेन बोधिते प्रकृत्यर्थज्ञाने विषयत्वेन विशे
षणतामवलंब्य विषये व्याप्त्युपदर्शनसंगमने यथार्थधूमज्ञानादिति प्रयोगेपीति तत्रापि भ्रांत्युपस्थितज्ञाने पंच
म्यर्थज्ञाप्यत्वान्वयेन धूमादेर्ज्ञापकज्ञानविषयत्वलाभेन धूमादिव्याप्यत्वप्रदर्शनं स्यात्। अस्मन्मते च ज्ञानज्ञाप्य
त्वस्यैव पंचम्यर्थतया धूमज्ञानज्ञानस्यैव तत्त्वज्ञापकत्वं प्रतीयते न तु धूमज्ञानस्येति नातिप्रसंग इति न च पंच
म्याः केवलज्ञाप्यत्वार्थकत्वमतेपि उक्तस्थले ज्ञानपदस्य लक्षणार्थज्ञानविषयकज्ञान एव तात्पर्यान्न धूमादिज्ञा
ने मुख्यव्याप्यार्थज्ञापकतालाभ इति न धूमादौ व्याप्यत्वोपदर्शनप्रसंग इति वाच्यं। मुख्यार्थपरत्वे बाधकविरहेत
त्तात्पर्येणापि प्रयोगसंभवात्। न हि यत्र पदार्थांतरे निरूढलक्षणा तत्र भ्रांत्युपस्थापितोऽर्थस्तेन न बोध्यते तद्धि।

गदा० अ०
७६

धोपयिकाकांक्षादिसत्त्वे सामग्रीबलेन तद्बोधस्य दुर्वारत्वात्। अथ तत्र शक्यार्थबोधस्यापि संभवेन तत्रापि कस्यचित्क-
दाचित्तात्पर्यं संभवतु तथापि तत्रानादितात्पर्यविरहात्तत्तात्पर्येण न्यायांतर्गतपदप्रयोगसंभव इति चेत्। माभूत्मु-
ख्यार्थतात्पर्यकज्ञानपदघटितयथार्थधूमज्ञानादित्यादिवाक्यसमुदायस्य न्यायत्वं तथापि ज्ञाप्यत्वमात्रस्य पंचम्यर्थ-
त्वे न्यायानंतर्गतमुख्यार्थपरज्ञानपदघटितयथार्थधूमज्ञानादिति वाक्यस्य धूमादौ व्याप्याकांक्षाप्रयोजकधीजनक-
त्वं दुर्वारमेव न चानुभवविरुद्धं न च ज्ञानज्ञाप्यत्वे पंचम्या लक्षणापक्षेपि केवलज्ञाप्यत्वस्वारसिकलक्षणयोपस्थिते
धूमज्ञाने नैरोजनकताबोधसंभवादुक्तातिप्रसंगो दुर्वारस्तत्रेष्टापत्तौ च प्रकृतेपीष्टापत्तिसंभव इति वाच्यं। स्वारसिक-
लक्षणया पंचम्युपस्थापितविषयत्वादिरूपार्थांतर इव तादृशज्ञाप्यत्वेपि प्रकृतसर्थान्वये आकांक्षाया मया नाभ्युपग-
मान्न धूमज्ञानादिसतो धूमज्ञानस्य ज्ञापकताबोधनादिति भावः। यत्तु धूमज्ञानादित्यतो लक्षणयोपस्थापितधूम-
रूपविषयविशिष्टज्ञानज्ञाने ज्ञापकताभाने ज्ञापकज्ञानविषयत्वं धूमज्ञान इव तद्विषयधूमेपि भासत इति प्रकृते
लाक्षणिकतापत्तेस्तत्र धूमे व्याप्याकांक्ष्या तदुपदर्शनप्रसंगो दुर्वार इत्याशयवर्णनं तदसत्। तथापि स्वमतेपि त

द्वेषस्य दुर्वारत्वात्। पंचम्यर्थैकदेशे ज्ञाने मुख्यार्थधूमरूपविषयविशिष्टज्ञानान्वयेपि धूमे ज्ञापकज्ञानविषयताबोधस्य दुर्वारत्वा
त् न च तथापि पंचमीप्रकृत्यर्थ[illegible]बोधनोपस्थितिविशेष्यतं यस्य तस्यैव व्याप्त्यादिकं प्रदर्श्यते इति नियमस्य स्वयमुपगमान्नस्व
मते दर्शितातिप्रसंग इति वाच्यं। तत्र धूमादौ ज्ञापकज्ञानविषयताबोधादाकांक्षासंभवेन तादृशनियमाननुरोधे व्याप्त्याद्यु म
पदर्शनस्यानपवादात् वस्तुतो लिंगज्ञानं प्रकृत्यर्थे पंचम्यर्थो वा तन्मते तु उभयथा धूमज्ञान एव साध्यज्ञापकतावच्छेदक
पक्षतावच्छेदकावच्छिन्नविषयतानिरूपितप्रकारता लभ्यते सैव तस्य व्याप्तिपक्षधर्मतानिर्वाह्येति तदाकांक्षया त
त्रैव व्याप्त्याद्युपदर्शनं ज्ञानविशेषणधूमे च तादृशविषयतावच्छेदकत्वरूपविषयतैव सम्भवनत इति व्याप्त्यादिनिर्वाहा
अतो न तत्र तदाकांक्षेति धूमादित्यादिप्रयोगे धूमत्वादाविव धूमज्ञानादिस्तत्र धूमादौ व्याप्त्यादेर्नोपदर्शनमिति
मल्लोक्तलक्षणापेक्षया लघूनि प्रतिज्ञायाश्च पंचलक्षणानि स्वयमाह। इतरान्वितेति प्रथमस्य तस्य हेतूपनयनि
गमसाधारणस्य उदाहरणव्यावर्तनं स्वयमेव दर्शयिष्यते प्रतिज्ञाहेत्वोरित्यादिना इतरान्वितत्वं स्वाघटकपदोप
स्थापितार्थान्वितत्वे स्वभिन्नावयवघटकपदोपस्थापितार्थान्वितत्वं वा एवं च स्वेतरावयवसमूहकोरेण स्वाघटकपद
स्वाघटकपदोपस्थापितार्थान्वितत्वं

सहकारेणबोधकत्वं समुदायार्थः तेनोदाहरणबोध्यार्थप्रविष्टसाध्यादेः प्रतिज्ञादिजन्यबोधे इतरान्वितत्वेपि न क्षतिः
द्वितीयस्सस्यंतानंतरमग्निमन्यायावत्वमिति संबध्यते द्वितीयस्सस्यंतं च हेतूपनयनिगमनपारकं हेतुजन्येतस्मादितरे
ण्यासिद्धत इत्यादिनिगमनजन्यबोधविभक्त्यर्थस्यविशेष्यतयाविवक्षणीये विभक्त्यंतपदार्थविशेष्यकत्वाविरहा
त्वह्निव्याप्यधूमवांश्चायं तस्माद्वह्निमानित्यादावुपनयनिगमनजन्यबोधेच विभक्त्यंतपदमध्ये ऽसंभूते इदंपदमनु
वाद्यं सपदार्थयोरेव विशेष्यतया अंसभिन्नस्वीयपदार्थविशेष्यकत्वविरहात्। अन्यत्वं च स्वघटकपदेषु चरमत्वं उप
नयादिस्थेदमादिपदानामपि न पदसामान्यमध्ये चरमत्वे तदुत्तरमप्यन्यवाक्यघटकपदसत्वादित्यतः स्वघटक
त्वंयदविशेषणं संबंधनिगमनघटकपदेषु यच्चरमं तदन्योपनयस्थेदंपदार्थविशेष्यकबोधं प्रत्युपनयसहकारे
णजनके निगमने तादात्म्येन द्रव्यादिसाध्यके इदं द्रव्यं गुणकर्मान्यत्वे सति सत्वादित्यादौ स्वघटकविभक्त्यंतपदेषु
पदंत्वं सत्वादिपदं न तदन्यविभक्त्यंतप्रतिज्ञास्थद्रव्यादिपदार्थविशेष्यकान्वयबोधजनके हेतौ चातिव्याप्तिवार
णाय स्वीयत्वं समभिन्नपदविशेषणं अत्र स्वत्वपुरस्कारेण लक्ष्यव्यक्तीनां निवेशादननुगम इति प्रतियोगिनि स्वत्वं

निवेश्यलक्षणांतरमाह। अंत्यपदवत्त्वइति अत्रासमुदाहरणवारकं प्रथमसत्त्यंतमनुपपत्त्यते द्वितीयसत्त्यंतं वैकल्पिकं स
त्यंतद्वये धूमादित्यादिहेतौ विभक्त्यंतात्पदाप्रसिद्ध्यासुकपदमात्रघटितत्वात्तस्य दसाधारणस्यां सत्त्वस्य निर्वचने पंस
भिन्नविभक्त्यंतस्वीयपदाप्रसिद्ध्यास्वपदेनान्यस्यैवोपादेयतयास्वीयानंत्यपदार्थविशेष्यकशाब्दबोधाजनकं पत्तदन्य
तसत्त्वादतिव्याप्तिरतोऽन्त्यपदवत्त्वेसतीति अंत्यपदवत्त्वं च स्वघटकपदोत्तरपदाघटितत्वं स्वंतदन्यत्वेन तु स्वघटकपदो
त्तरपदवत्त्वं लक्ष्मीभूतप्रतिज्ञाप्रभृतीनां स्वत्वेन निवेशनीयतया ननुगमत्तादवस्थ्यात् अंत्यपदवत्ता हेतुविशेषस्यउ
पनयनिगमनयोः तद्धेतोः स्वीयानंत्यपदार्थविशेष्यकबोधाजनकयोस्तदन्यत्वासत्त्वान्नातिव्याप्तिः नचोपनयघटका
नंत्यपदार्थहेतुमद्विशेष्यकबोधजनकत्तदेकदेशमनुवंतादेर्भेदस्य तद्घटितसमुदायात्मकोपनयोपादानसत्त्वात्।
तादृशबोधाजनकं स्वं नोपनयादिकमितिसत्तिव्याप्तिरिति वाच्यं तादृशबोधजनकत्वं यादृशसमुदायावृत्तितादृश
समुदायरूपस्वभिन्नत्वनिवेशनानतिप्रसंगात्। उपनयाद्येकदेशवृत्तितादृशबोधजनकतायाइदमाद्यंतपदघटि
तसमुदायावृत्तितया तद्घटितपदसमुदायात्मकोपनयादेस्तादृशसमुदायात्मकत्वेन तद्भिन्नत्वाभावात्तादृशसमुदाय

तस्मादि

भिन्नत्वं च तद्भेदानुयोगितावच्छेदकावयवतावच्छेदकरूपवत्वं अतः समुदायघटकप्रत्येकसकलभागेषु समुदायभेदस
त्वेऽपि नातिप्रसंगः ईदृश्ये च रीतिरवयवांतरभेदघटितलक्षणांतरेऽपि बोध्या पृथिवी इतरेभ्यो भिद्यते इत्यादिनिगमनेऽवय
टकविभक्त्यंतपदमध्ये पदं संधातुपदं तदन्योरव्यातार्थविशेष्यकबोधजनकतयाऽतिव्याप्तिः अंसमभिन्नपदस्योभित्त्येत
रूपताविवक्षणेन वारयति पदमिति निगमन इति निगमनपदं निगमनविशेषपरं अंसपदशरीरे वृत्तिमत्त्वरूपपदत्वऽ
निवेशे पुनरुपनयनिगमनयोरेवातिव्याप्तिः स्यात् उपनयघटकायं पदं निगमनघटकमत्तपदयोरंते तद्घटकवि
भक्तिसत्वेनांशसमिन्नत्वात् । अतस्तत्र विभक्त्यंतपदमेव निवेश्यमिति साव इति केचित् व्याचक्षते तन्न मनोरमं तथा
हि स्वघटकविभक्त्यंतपदमध्ये अंसमिसस्यकोर्थः स्वघटकविभक्त्यंतपदप्रागभावासमानकालीनविभक्त्यंतपदमि
ति चेत् उपनयादिस्थ इदमादिपदस्य विभक्तिरूपपदप्रागभावसमानकालीनतया तस्यां सत्वनिर्वाहाय प्रथमं विभक्त्यं
तत्वं विशेषणमस्तु चरमविभक्त्यंतत्वविशेषणमनर्थकं तन्नैं इदमेव द्रि चेत् । तर्हि अनंसत्वं स्वीयविभक्त्यंतपदप्राग
भावसमानकालीनत्वपर्यवसितं भिन्नभिन्नत्वनिवेशस्य वैयर्थ्यात् एवं च तस्माद्भिद्यते इत्यादिनिगमनस्याख्यातपद

प्रति०स्व०
वि
राम

स्यानं सत्वमेव नास्ति किमनं सपदे विभक्त्यंतत्व निवेशनेनेति ॥ स्कतस्कतस्मान्नेतराणी स्यादौ निगमने विभक्त्यंते
तरपदप्रागभावसमानकालीननञ्पदार्थविशेष्यकशाब्दबोधजनकेऽतिव्याप्तिरेव लक्षणस्थपद पदस्य विभक्त्यंत
पदपरतया वारिता अथ नञ्पदस्यापि प्रातिपदिकत्वेन विभक्त्यंततया विभक्त्यंतत्व विशेषणेन दुर्वारता न च नि
पातस्य विभक्तिप्रकृतित्वं न स्वीक्रियते तदर्थेन विभक्त्यर्थान्वयात् स्वरार्थस्य पार्थेवानुसंधीयमानलुप्तविभक्त्य
र्थान्वयेन तादृशता दृशोव्ययोत्तरमेव विभक्तिस्वीकारस्यावश्यकत्वात् नञो स्कबंतत्वेपि नञिति तत्पुरुषविधाय
केशेषस्तत्र सामर्थ्यादेव तेन सह समासो भविष्यतीति वाच्यं विभक्तेर्निपातार्थान्वितार्थबोधकत्वेपि निर्विभक्ति
कप्रातिपदिकस्यासाधुतया साधुत्वाय विभक्तेरावश्यकत्वात् न ञो स्कबंतत्वेपि नञिति तत्पुरुषविधायकसूत्र सा
मर्थ्येन तेन सह पदांतरस्य तत्पुरुषसमर्थनेपि बहुव्रीह्यव्ययीभावयोरनुपपत्तेश्च स्कबंतत्वेपि समासो प्रविष्टप्रति
योगिपदार्थानुपरागेण ञोभावाबोधकतया तत्सापेक्षत्वेनासामर्थ्यान्न तेन सह द्वंद्व इति चेत् । ससंविभक्त्यंत
तमत्र शाब्दबोधौपयिकविभक्तिप्रकृतित्वं पर्वतो वह्निमानित्यादौ प्रतिज्ञास्थपर्वतादिपदोत्तरं स्कविभक्तेरर्थविशे

वि
न
न
अ

गदा० अ०
क्ष
७९

पपरताविरहेपिअभेदान्वयबोधौपयोग्याकांक्षानिर्वाहकसमानविभक्तिकतासंपादकत्वेनशाब्दबोधोपयोगि
तानतिप्रसक्तविभक्तेरितिनातिव्याप्तिः अघटादिशब्देनयत्रप्रतिज्ञायांघटभिन्नादिरूपपक्षनिर्देशस्तत्रनञा
देर्निरुक्तविभक्त्यंततानिरहेपिविशेष्यीभूतविशिष्टपदबोधकाघटादिपदस्यतादृशविभक्त्यंतत्वात्लक्षणसमन्व
यः यत्तुयादृशपदोत्तरं कदाचितविभक्तेःश्रवणंतदेवविभक्त्यंतपदेनविवक्षितं दध्यादिपदोत्तरंप्रथमैकवचना
श्रुतावपिदृष्टिक्वनादिश्रुतेर्दधिद्रव्यमित्यादिप्रतिज्ञासंग्रहइतितत्रपक्षवाचकस्यादिपदघटितप्रतिज्ञायामव्याप्तेः
निगमनवारणायेतिइतरान्वितस्वार्थबोधकन्यायावयवत्वमात्रनिवेशेउपनयार्थान्वितस्वार्थबोधकतयानिग
मनातिव्याप्तिःस्यात्तद्वारणाय‍स्यार्थः यद्यपिइतरान्वितस्वार्थबोधकत्वंनिगमनवत्प्रतिज्ञोपनययोरपितथा
पिविशेषणतयान्वितत्वनिवेशनेनतद्वारणसंभवान्निगमनमात्रकथनं यद्यपिनिगमनसमुदायार्थःपदएवा
न्वेतीतिसाध्यान्वितस्वार्थबोधकत्वंनिवेश्यापिप्रायशोनिगमनवारणसंभवस्तथापियत्रसाध्यस्यप्रमेयत्व
गोत्वाभावादेरेवपक्षतातत्रसनिगमनेऽतिव्याप्तिवारणायपक्षान्वितस्वार्थबोधकत्वंतार्थान्वितत्वानिवेशनंपक्षा

च

क्ष

पदोपस्थापि

४ निगमनेऽतिव्याप्तेर्वारणात् तादृशपदोपस्थापितार्थान्वितस्वार्थबोधक ४

न्वितस्वार्थबोधकत्वं पक्षतावच्छेदकावच्छिन्नविषयतानिरूपितस्वार्थविषयताप्रयोजकत्वं यथाश्रुतेउपनयस्य पक्ष
वाचकेदंपदस्य वस्तुगत्याभेदेन पक्षसंसर्गो यः पक्षः तद्बोधकत्वेन पाषाणमयः पर्वत इत्यादिवाक्यात् पाषाणमय
त्वादिरूपेण पक्षतावच्छेदकावच्छिन्नसंसृष्टतया प्रतीयमानो यः पक्षतावच्छेदकावच्छिन्नस्तद्बोधकत्वेन च तदुपस्थापि
तार्थान्वितस्वार्थबोधकत्वं च तादृशयदप्रयोज्यविषयतानिरूपितस्वप्रयोज्यस्वार्थविषयताकत्वं यथाश्रुतनिगमनार्था
न्वपि न एव पक्षतावच्छेदकावच्छिन्नस्य पर्वतो नीलपर्वत इत्यादिवाक्यस्य पक्षतावच्छेदकावच्छिन्नविषयतानिरूपि
तविषयिताप्रयोजकपर्वतपदोपस्थाप्यत्वेन निगमनातिव्याप्तेर्दुर्वारत्वात्। पक्षतावच्छेदकावच्छिन्नविषयतानिरूपि
ताया विषयतायास्तन्निरूपितविषयताप्रयोजकत्वं फलितार्थः। पक्षतावच्छेदकावच्छिन्नतानिवेशे व्याप्यवत्तावच्छिन्नायाः पक्ष
विषयतातन्निरूपितोपनयस्येदंपदप्रयोज्यविषयतानिरूपितविषयताप्रयोजकत्वमादाय निगमन एवातिव्याप्तिस्या
दिति तन्निवेशः। अथ तन्निवेशेऽपि पक्षतावच्छेदकावच्छिन्नाया उपनयस्येदंपदप्रयोज्यविषयतातन्निरूपितनिगमना
र्थविषयतानिरूपितोपनयार्थविषयतैवेरूपनयेतिव्याप्तिः नव्यचरमविषयता प्रकारत्वरूपा विवक्षणीया तेनाय

मतिप्रसंगइतिवाच्यं। एवं सतिप्रमेयत्वमभिधेयं। प्रमेयत्वादित्यत्र पक्षान्वित पंचम्यर्थविशेष्यत्वयान्वितं साध्यरूपार्थमा
दाय प्रतिज्ञातिप्रसंगाप्रसक्तेर्मेयत्वमभिधेयमित्याद्यग्रिमग्रंथानुपपत्तेः एवं प्रमेयत्वमभिधेयं प्रमेयत्वादित्यत्र प्रति
ज्ञातिव्यातिरिक्तदेशार्थविषयताव्यावृत्तस्वार्थविषयतानिवेशेन वारणेपि तत्र सनिगमनेऽभिधेयत्वव्याप्यप्रमेयत्ववां
श्चायमित्युपनयार्थप्रमेयत्वत्वरूपपक्षतावच्छेदकरूपहेतुतावच्छेदकावच्छिन्नान्विततादृशपक्षतावच्छेदकावच्छिन्ने स्वार्था
न्वयबोधकेतिप्रसंगो दुर्वारः पक्षतावच्छेदकावच्छिन्ने सत्त्व विशेषणतयान्विततत्व निवेशे प्रमेयत्वमित्याद्यग्रिमग्रंथानुपि
तेः पंचम्यर्थहेतुत्वस्य विशेष्यतयैव पक्षान्वयित्वेन प्रतिज्ञातिव्याप्त्यप्रसक्तेः विशेषणतया किंचिदन्वितत्वनिवेशेनैवो
पपत्तेः। प्रकृतपक्षनिवेशवैयर्थ्यापानाच्च निगमनार्थस्य विशेषणतया किंचिदन्वितेन न्वयेन तत्रातिव्याप्तेस्तन्मनिवे
श्यापि वारणसंभवात्तूमेवत्सु ध पक्षतावच्छेदकावच्छिन्नानन्वयित्वेन तदन्वितार्थकेप्युपनयेऽस्मु ध पक्षतावच्छेदकावच्छि ये
न्नान्वितार्थकपदोपस्थापितान्विता+न्वितत्वं विवेश्य दर्शितातिप्रसंगद्वयवारणसंभवात्। उपनयार्थव्याप्यविशिष्टप
क्षान्वयिनो निगमनार्थस्य शुद्धपक्षतावच्छेदकावच्छिन्ना+र्थकत्वविरहात्। प्रमेयत्वमभिधेयं प्रमेयत्वादित्यत्र व्याप्तिवि

विशिष्टप्रमेयत्वरूपपक्षतावच्छेदकावच्छिन्नएवइदमर्थान्वयेनतदन्वितार्थकेपिनिगमनेनिरुक्तरूपविरहात्।
एतेनपक्षसाध्ययोरभेदस्थलेनिगमनार्थघटकसाध्यरूपपक्षान्वितेदंपदार्थान्वितार्थकतयानिगमनातिव्याप्ते
रपिनावकाशः।यत्तुएकविशेषणतापन्नस्ययत्रापरविशेष्यतातत्रविशेषणत्वविशेष्यत्वरूपविषयतयोरभेदेनप
क्षविषयतानिरूपितविषयतानिरूपितसाध्यविषयतानिवेशेहेतुमात्रेलक्षणानुपपत्तिःपक्षविषयतानिरूपित
साध्यप्रकारतारूपविषयतयाहेत्वर्थप्रकारतायाःनिरूप्यनिरूपकभावविरहात्ततःपक्षविषयतानिरूपितविष
यत्वावच्छिन्नविषयतानिरूपितसाध्यविषयतैवनिवेशनीया।एवंचोक्तरीत्याउपनयातिव्याप्तिर्नावकाशः।पक्षविष
यतानिरूपितनिगमनार्थनिष्ठप्रकारतारूपविषयतायापक्षविषयतानिरूपकतन्निष्ठविषयतायाअभेदेनाव
च्छेद्यावच्छेदकभावविरहादेवंक्रमेणपक्षसाध्ययोरभेदस्थलेनिगमनातिव्याप्तेरपिनावकाशः।एवंहेतुपक्षयो
रभेदस्थलेनिगमनातिव्याप्तिरपिसमाहिता।प्रकारतानिरूपितायानिगमनार्थप्रकारतानिरूपितायाश्चइदमर्थनिष्ठ
विशेष्यतारूपविषयतायाअभेदेनावच्छेद्यावच्छेदकभावविरहादितितत्रएकविशेषणतापन्नस्ययत्रापरविशेष्यता

हेतु

गदा०अ०
८१

तत्रविशेष्यताप्रकारतयोरभेदेबाधकविरहेणलाघवेनतस्यैवोपगमात्।यद्वैकविशेषणतापन्नस्यापरविशेष्यतास्थले
प्रकारताविशेष्यतयोरभेदेदंडिपुरुषवानित्यादिबुद्धेःपुरुषादिनिष्ठप्रकारतानिरूपितदंडादिनिष्ठविशेष्यताशालित्वंदुर्वा
रमितितस्याःपुरुषवान्नवादंड इत्यादिसंशयविरोधिताप्रसंगइतितदासमूहालंबनविषयतावैलक्षण्यायतयोरवच्छेद
कभावएवस्वीक्रियतइतिमन्यतेतदाहेतुपक्षयोरभेदस्थलेनिगमनार्थधर्मितावच्छेदकहेतुप्रकारतानिरूपितायानि
गमनार्थप्रकारतानिरूपितायाश्चविशिष्टहेत्ववच्छिन्नायाइदंपदार्थपक्षविशेष्यतायाऐक्येहेतोर्हेतुधर्मितावच्छेदकताप
त्तिरितिअवच्छेद्यावच्छेदकाभावपन्नविषयतारूपस्यस्वीकरणीयत्तयातत्रसनिगमनातिव्याप्तेर्दुर्वारत्वात्।स्वार्थैकदे
शस्यापिस्वार्थत्वात्तिमाननमूलाप्रतिज्ञाविशेषातिव्याप्तिशंकांस्वार्थपदस्यस्वप्रतिपाद्यतपर्याप्त्यधिकरणविशिष्टार्थपर
तांस्फुटयन्निराकरोतिप्रमेयत्ववानितिनप्रतिज्ञार्थः।साध्यविशिष्टपक्षरूपःएकदेशार्थःसाध्यमात्रंपरंत्वपिप्रमेयत्व
मभिधेयंप्रमेयत्वादित्यादिन्यायांतर्गतनिगमनेहेतुभूतपक्षान्वितस्वार्थबोधकंपदोपस्थापितपंचम्यर्थान्वितस्वा
र्थबोधकत्वंनिगमनेक्षतमितिविशेषणतयापक्षान्वितत्वंविवक्षणीयमितिकथितस्थलेपंचम्यर्थःपक्षेनविशेष

द्वे
राम
दं
क्षा

कथने ॥

एमियतोपिनोक्तप्रतिज्ञायामतिव्याप्तिसंभवस्तथापि निगमनार्थैकदेशस्यज्ञाप्यतांतभागस्यतादृशार्थान्वितत्वयानि
निगमनेऽतिव्याप्तिसंभवारणाय स्वार्थपदस्यस्वप्रतिपाद्यविशिष्टार्थपरतायाआवश्यकत्वात् कथितस्थलेपंचम्यर्थान्वित
स्वार्थबोधकत्वाभावेनापि अतिव्याप्तिवारणसंभवात् केवलेन हेतुवाक्येन पंचम्यर्थविशेष्यकावांतरवाक्यार्थबोधो
जन्यते ततश्च प्रतिज्ञास्थवन्ह्यादिपदसहकारेण धूमज्ञानज्ञाप्यो वन्हिरित्याकारकः स्वार्थविशिष्टबोधो जन्यते ततः
समुदितप्रतिज्ञासहकारेण पक्षे स्वार्थविशिष्टसाध्यविशिष्टबोधश्चप्रत्येकमेवतादृशबोधत्रयजनकताघटितल
क्षणत्रयमाह। स्वार्थेति। प्रथमलक्षणं तृतीयबोधघटितं द्वितीयं प्रथमबोधघटितं तृतीयंच द्वितीयबोधघटि
तं मृ विशिष्टवैशिष्ट्येति स्वतात्पर्यविषयबोधीयविशेषणतावच्छेदकस्वार्थबोधजनकत्वाभावपवत्त्वमित्यर्थः। ते
न निगमनार्थान्वितान्यनयार्थबोधस्यापि निगमनार्थैकदेशविशिष्टवैशिष्ट्यबोधतया निगमनार्थबोधस्यत
जनकत्वेनयथाश्रुततल्लक्षणस्य निगमनेतिव्याप्तिरिति दूषणं प्रयुक्तं विशेषणतावच्छेदकतायाअव्यावर्त
कत्वात्। स्वतात्पर्यविषयबोधीयत्वं तद्विशेषणं विशिष्टबोधेति स्वतात्पर्यविषयबोधजनकतावच्छेदकस्वा

र्थप्रकारताशालिबोधजनकत्वापादकत्वमित्यर्थः। तेन निगमनार्थविशिष्टोपनयार्थज्ञानस्य निगमनार्थविषयकत्वेन
तादृशज्ञानस्वरूपयोग्यत्वेपि न निगमनातिव्याप्तिः। लक्षणान्तरमेवं हेतौ संगमयत्यवयवान्तरातिव्यावर्तयति एकवाक्य
तयेत्यादिना। रतरोपस्थापितेति स्वाघटकपदोपस्थापितेत्यर्थः। स्वार्थत्वं स्वजन्यप्रतिपत्तिविशेष्यत्वं अतो निगमनज
न्यप्रतिपत्तिविशेष्यमनुवाद्यर्थं तत्र घटकपदोपस्थापितसाध्यविशेषणकबोधजनकस्य निगमनस्य वारणायानुप
स्थापितान्तं अत्र लक्षणे इतरार्थप्रकारकस्वार्थविषयताकत्वेन द्वितीये च स्वार्थांशे इतरप्रकारकत्वेन बोधस्य निवेश
द्भेदः। अवयवार्थेति अवयवजन्यप्रतिपत्तिविशेष्यविशेषकस्वार्थप्रकारकबोधजनकावयवत्वमर्थः। सर्वेषामेवा
वयवानां स्वार्थघटकविशेष्यांशे स्वार्थघटकेतरप्रकारकबोधजनकतया। तिव्याप्तिवारणाय स्वार्थप्रकारेति प्रति
ज्ञार्थघटकसाध्यरूपविशेषणे हेत्वर्थस्यान्वयेपि विशेष्यपक्षे तदनन्वयात् प्रतिज्ञायां नोपनयलक्षणातिव्याप्ति
नैवाहेतौ निगमनलक्षणातिव्याप्तिः उपनयलक्षणे स्वार्थपदस्य निगमनलक्षणे चावयवार्थपदस्य विशेष्य
परत्वादित्याह हेत्वर्थश्चेत्यादिना। उक्तप्रायमिति पूर्वं हेत्वर्थैकदेशे पंचम्यर्थस्य एकदेशमात्रान्वयित्वमुक्तं अत्र हे

र्था

तुसमुदायार्थस्यतुतथात्वमितिविशेषात्।प्रायमिति॥ ॥शब्दोनित्यःसामान्यवत्वेसतिबाह्यकरणकप्रत्यक्षत्वादिति
प्रयोगेहेतुघटकदलयोःप्रत्येकव्यभिचारितयाभेदेसामर्थ्यात्तयोरेकांशेपरस्यविशेषणतयान्वयेनचवि
शिष्टहेतुत्वान्वयासंभवेनविशेष्यविशेषणभावानापन्नयोर्मिलितयोर्हेतुत्वान्वयोवाच्यः।सोपिनसंभवतिसामान्य
वत्वादेःसप्तम्यंतपदोपस्थाप्यस्यहेतुत्वार्थकपंचमीप्रकृत्यर्थत्वाभावादितिकेषांचित्पूर्वपक्षंसमाधातुमुपन्यस्य
तिमूलहेतुग्रंथेसामान्यवत्वइतिसामान्यवत्वस्यबाह्यकरणकप्रत्यक्षत्वेविशेषणत्वासंभवेपिसप्तम्यंतार्थसामान्यव
त्व[illegible]सामानाधिकरण्यस्यतत्रविशेषणतयातादृशविशेषणावच्छिन्नबाह्यकरणकरणकप्रत्यक्षत्वहे
तुत्वान्वयसंभवान्नापार्थकतेत्याह।तत्रेति।सामान्यवत्वस्येति।सामान्यवत्वस्यबाह्यकरणकप्रत्यक्षत्वविशेषणी
भूतसामानाधिकरण्यप्रतियोगितयोपस्थितावित्यर्थः।अथसामानाधिकरण्येसप्तम्याअननुशासनात्।कथमे
तत्सतीसप्तम्यर्थइतिचेन्न।यस्यचभावेनभावलक्षणमितिसूत्रानुशिष्टयासप्तम्यागोषुदुह्यमानास्वागत
इत्यादौयथागोदोहनादिसमानकालीनसमागमनादौबोध्यतेतथाप्रकृतेपिसमानदेशत्वप्रत्ययनात्नचैतादृश

२ मिति यावत्तद्वाचकपदात्समीप्यर्थकत्वात्तादृशसूत्रस्य क्रियासमानकालीनत्वादौ क्रियांतरविशेषण २

गदा०अ०

८३

ससम्याः क्रियासमानकालीनत्ववत् क्रियासमानदेशत्वस्य क्रियायां कदाचित्प्रसायन संभवः यस्य क्रियया यस्य क्रियाल
क्ष्यते विशेष्यते यद्वाचकपदसमभिव्याहृतकृदंतोपस्थापितक्रियासमानकालीनत्वादिसंबंधेन क्रियांतरविशेषण x
x तया विवक्षिते तादृशसूत्रेण सप्तमीविधानात् । सप्तमीप्रकृत्यर्थनिरूपितसामानाधिकरण्यादेरपरनामार्थविशेष
णतया विवक्षणे सप्तम्यनुशासनात् । सामान्यवत्वसामानाधिकरण्यस्य प्रसक्तत्वे कुतो लाभ इति वाच्यं । यथा गोषु
दुह्यमानास्वागत इत्यादौ गोपदोत्तरसप्तम्याः समभिव्याहृतक्रियागोदोहनरूपार्थः । तत्र समभिव्याहृतकृदंतार्थविशे

अ

षितप्रकृत्यर्थस्य कर्मतानिरूपकत्वसंबंधेनान्वयः ॥ तस्याः समानकालीनत्वसंबंधेन क्रियांतरेन्वय इति तत्र दुह्य
मानगोकर्मकदोहनसमानकालीनत्वलाभः तथा प्रकृतेपि शत्रप्रकृतसधातोराधारत्वमर्थः । अत्रास्ति घट इत्यादौ
एतद्देशनिष्ठाधारताप्रतियोगी घट इत्यादिप्रतीतिः अत्र चाधारत्वरूपक्रियार्थी सामान्यवत्वस्य प्रकृत्यर्थस्य प्रति
योगित्वेनान्वय आधारतायाः प्रसक्तत्वे समानदेशत्वसंबंधेनान्वय इति प्रसक्तत्वे सामान्यवत्वसामानाधिक

सत्व

रण्यलाभसंभवानुभावलक्षणमिति भावशब्दस्य धर्ममात्रपरतया प्रसक्तत्वस्य क्रियात्वविरहेपि सत्त्व इत्यप्या
क्षतिविरहात्

सत्व

हरेण वा प्रत्यक्षत्वसत्त्वे सामान्यवत्त्वस्य समानदेशत्वलाभेन सामंजस्यात् कुत्र चित् समानकालीनत्वं क्रियायाः संबंधः
कुत्र चित् समानदेशत्वमित्यत्र किं नियामकमिति चेत्। यत्र समभिव्याहृतकृत्प्रत्ययस्य वर्तमानत्वे तात्पर्यं तत्र च समा
नकालीनत्वं यत्र न तद्विवक्षा तत्र समानदेशत्वं संबंध इति नियमात् प्रकृते च वर्तमानताविवक्षया समानदेशत्वलाभा
त् वर्तमानताविवक्षायामपि विरोधिकालाविवक्षया लटः साधुत्वात् यत्र चातीतत्वमनागतत्वं च कृता विवक्षितं दु
ग्धास्कं दोग्ध्वा स्विसादो तत्र तदुत्तरत्वं पूर्वत्वं च संबंध इति दोहनोत्तरत्वादिकमेव प्रतीयते न समानकालीनत्वमि
त्यवधेयं। ननूदाहरणे यत्र द्विरुक्तिः प्रयोजिका या महानसत्वमहानसान्यत्वादिना वक्तुर्यावत्साधनाधिकरणप्रत्या
यनेच्छानुपपत्तिः सा यावत् किं प्रयोजनं न हि साधनस्य यावद्धिकरणे साध्यवत्त्वज्ञानं अनुमितिहेतुर्येन यत्स द्वीप्सां
विनायावद्वह्न्यधिकरणानुपस्थापने तत्सदेन तावतामधिकरणानां परामर्शसंभवात् सकलसाधनाधिक
रणे साध्यवत्ता प्रतीतेरनुमितेर्निर्वाहः स्यादिति यत्सदाद्यावदधिकरणबोधो वीप्साप्रयोजनं भवेत्। न च व्या
प्तिप्रत्यायनेच्छा वीप्सातस्याश्चानुमित्यौपयिकबोध एव प्रयोजनमिति वाच्यं व्याप्तिश्च पदार्थत्वा वाक्यार्थत्वविर

हेणतत्प्रसायनेच्छायामपि शाब्दत्वप्रसयस्यायोगात् मानसबोधे च वक्तुरभिप्रायानुपयोगात्। यदि च यत्पदसमभि
हृतवन्ह्यादिपदस्य धूमव्यापकताविशिष्टेहादिलाक्षणिकतया धूमादौ वन्हिव्याप्तिलाभ इत्युच्यते तदा मत
दद्विरुक्तिं विलापितं तुल्यत्वासंभवात्। द्विरुक्तिवैयर्थ्यमित्याक्षेपे प्राचीनसमाधानमुपन्यस्यति [illegible]ते। तदा
हरणस्य यत्पदं चेत्यर्थः। व्यभिचारस्य चारणायेति वीप्सामुद्देश्यमानस व्याप्तिज्ञानविरोधिव्यभिचारधीवारण
प्रयोजकमाहुरित्यर्थः। यावद्धेत्वधिकरणे साध्यवत्त्वनिश्चये तेन विपरीतनिश्चयात्मकेन साधनाधिकर
णे साध्याभाववत्त्वरूपव्यभिचारग्रहस्य प्रतिबंधकतेति भावः। ननु एवं वाच्यत्वादिसाध्यस्य पक्षोपायान्तरात्केव
लान्वयित्वं गृहीते अयमेतदभिन्नः एतद्वृत्ति यावद्धर्मवत्त्वादिसत्त्वहेतावेकमात्रवृत्तित्वं गृहीतं तत्र हेतौ सा
ध्यसामानाधिकरण्यग्रहादेव मानसी व्याप्तिधीः संभवति। प्रथमे अभावे साध्याभावत्वाग्रहेण द्वितीये साध्याभा
ववत्त्वाग्रहमाणे ऽधिकरणान्तरे हेतोरग्रहेण व्यभिचारग्रहासंभवादित्यभ्युपेत्य व्याप्तिसाधकतानु

मानेयथा उदाहरणं प्रयुज्यते तथातत्र सामानाधिकरण्यलाभायोदाहरणप्रयोगेऽपि द्वियत्पदं न प्रयुज्येत स

त्रेष्टापत्तियाह। यत्रचेति। सर्वत्रैवद्विरुक्तिर्नापेक्षितेतिस्वमतमाह। वीप्सायामपीति। अयमाशयः द्विर्यत्प्रयोगे
पिसकलसाधनाधिकरणपरत्वाग्रहे व्यभिचारतादवस्थ्यंव्यभिचारधियोनिवृत्तिः तत्परत्वग्रहापेक्षायांचयत्ये।
गप्राथम्यासाधननिष्ठव्याप्तितात्पर्यमेवगृह्यतांततएकत्वलक्षणयाव्याप्तिशाब्दबोधसंभवात्तत्रव्यभिचार
शंकायांअविरोधित्वात् यावत्साधनवत्तिसाध्यवत्त्वबोधेपि द्विर्वचनमनर्थकमेव अतएवचयत्रैवंतत्रैवमिति
यत्त्वामुदाहरणोपिदर्शनमपिसंगच्छते आवश्यकश्चव्यासेनशाब्दबोधः अन्यथा समानप्रकारतामपुरस्कृत्यविपरीत
धियोविरोधितायादुष्कथतयामहानसत्वादिनासकलधूमाधिकरणेसाध्यवत्त्वबोधेपिधूमत्वप्रकारेणतत्रतत्रैव
साध्याभावशंकायाःअनुच्छेदनमानसव्याप्तिग्रहासंभवात्।एवमद्विरुक्तेनापियत्पदेनएकरूपेणविभिन्नरूपेणवास
कलधूमाद्यधिकरणोपस्थितिसंभवात्तदर्थकतयाद्विरुक्तिसार्थक्यमपिदुर्घटं।ननुसकृदुच्चरितेत्यादिव्युत्पत्तिवि
रोधादेकस्मात्पदान्नानेकाधिकरणबोधःसंभवतीतिवाच्यं।सकृदुच्चरितस्यनानाशक्त्याबोधकतायामेवव्युत्प
त्तेःसर्वनाम्नांचबुद्धिस्थतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नत्वेननानाधर्मिणामनुगमान्नानार्थेषुशक्त्यैक्येनव्यु

भ्यां णो ल्प र्वचं

गदा० अ०

सत्तेरविरोधात् अन्यथा द्विरुक्तिस्थले एकपदस्यैव पदद्वयरूपादेशस्थानितया पदभेदविरहेण द्विरुक्तादपि नाना
र्थबोधानुपपत्तेः कथंचिदर्थद्वयबोधनिर्वाहेपि भूयोर्थबोधस्य निर्वाहयितुमशक्यत्वाच्चेति अथ द्विरुक्तस्थल एव
व्याप्तौ निरूढलक्षणा अत एव यत्तद्प्रयोगेपि न वादिवाक्ये स्वारसिकलक्षणाविरहेण व्याप्तिबोधनिर्वाहः वस्तुतो
व्याप्तिगोचरशाब्दबोधानुरोधेन चेदुदाहरणप्रयोगस्तदा उपनयवद्व्याप्यशब्देनैवोदाहरणेपि व्याप्तिबोधनं युज्य

यो

तेति सकलधूमाधिकरणे साध्यवत्त्वबोधनाय यो धूमवानित्युदाहरणं इत्थं च यत्पदस्य सकलधूमाधिकरणपरता
या आवश्यकतया अद्विरुक्तयत्पदस्य तत्परत्वानियमेन तत्परत्वग्रहार्थं द्विरुक्तेरावश्यकता एवं नित्यवीप्सयोरिति
सूत्रेण द्विरुक्तिविधानस्य नियततया सकलधूमाद्यधिकरणपरत्वे यत्पदस्याद्विरुक्तस्य साधुत्वमेव न स्यादित्यतो द्विरु
क्तेरावश्यकता यायेन यत्पदे द्विरुक्तिमभ्युपेयते तत्पदे द्विरुक्तिं खंडयति वीप्सा चेति। द्विरुक्तिनियमोपि कदाचिद्यत्

न

पद एव न तु तत्पदेपीत्यर्थः। सर्वत्रैव तत्पदे द्विरुक्तिरिति नार्थः। विवर्णभावं स स भूमिपाल इत्यादौ छंदोनुरोधादिना द्वि
रुक्तिदर्शनात्। न्याये तु प्रयुज्यमाने अधिकस्यान्याय्यतया साधुत्वेपि न तत्र द्विरुक्तिः सकलधर्मिप्रत्यायनेच्छारूपवीप्सा

अव०

८६ एकत्।

सत्वेपितत्पदस्याद्विरुक्तस्यसाधुतासंभवः महाकविप्रयोगेदर्शनादेतदपिसमर्थयितुंभवम्‌तिनांयास्तथाप्रयोगोदर्शयि
ष्यतेद्विरुक्तयत्पदबोधितनानाधर्मिणामेकेनतत्पदेनपरामर्शायोगइत्याशंकांनिरस्यतिविभूत्येतिमहानसमहानस
त्वादिविभिन्नप्रकारेणेत्यर्थः।तत्पदेनपरामर्शात्‌तत्पदेनपरामर्शसंभवात्‌तत्पदस्यपरामर्शकतायांव्युत्पत्तिवि
रोधेद्विरुक्तयत्पदेनोपितावद्धर्मिबोधासंभवाद्व्युत्पत्तिविरोधएवनकथमित्याकांक्षायामाहानु[illegible]वाचकतादिति
बुधिप्रकारावच्छिन्नेषुसर्वेष्वेकशक्तेरित्यर्थः।व्युत्पत्तिविरोधंदृष्टांतेनदृढयतियथेति॥१॥इत्यवयवटिप्पणीसमा
प्ता॥१॥ ॥श्रीरामचंद्रायनमः॥ १ ॥श्रीरस्तु॥१॥ श्री ॥ १ ॥श्री[illegible]॥१॥

॰॥गादाधर्यां अवयवः समाप्तः॥श्रीरस्तु॥॰